In this verse the word "*udayataḥ*" has not any special significance unless there is an allusion to the author. The whole idea suggests that Udaya is the author of the *Kaumudī*.. The imagery has no other value. The allusion to the author in this verse is too plain to need any discussion or explanation.

The *Kaumudī* as now available is only for the first of the four *Udyotas* of the *Dhvanyāloka*. At the end of the first Udyota there is the following verse.

इत्थं मोहतमोनिमीलितदृशां ध्वन्यर्थमार्गे यतां
व्याख्याभासमहोष्मलज्वरजुषां प्रेक्षावतां प्रीतये ।
उत्तुङ्गादुदयक्षमाभृत उदेयुष्याममुष्यामयं
कौमुद्यामिह लोचनस्य विवृतावुद्योत आद्यो गतः ॥

Here also the allusion to the author is equally plain. Besides the suggestion that Udaya is the name of the author, there is also the suggestion that he is a prince. The word "*kṣamābhṛt*" is used in the two meanings of "mountain" and "prince". Whether the word "*Uttuṅga*" should be taken as a part of the name, along with Udaya, is a matter on which there is room for doubt. Since the two words "*udaya*" and "*kṣamābhṛt*" are used as referring to the mountain and also to the author, there is full justification to assume that the word "*uttuṅga*" was also meant to serve a similar double purpose. But it may equally be that the word "*uttuṅga*" was used only as qualifying the mountain. Until we know something more about tbe author, it is better to leave the element "*uttuṅga*" as a doubtful point. We can with full justice say that the author is Udaya and that he was a prince. From the *Kaumudī* itself, nothing more is known of the author. Besides the verse quoted from the *Mayūrasandeśa*, there are six more of his verses cited by the author in the *Kaumudī*, so far as the portion available is concerned. The other six verses are given below :

1. अरुणमणिसहोदराधरोष्ठं
हसदसितोत्पलपत्रदीर्घनेत्रम् ।
मदयति मधुरं मृदुस्मितं ते
वदनमिदं मदिराक्षि मानसं मे ॥ P. 68

2. कुचसीमनि कुटिलदृशां
भ्रमणरम्याः शारदीव रजनीव ।

चन्द्ररुचः सुन्दरतां
व्यङ्ग्येषु चैव सुकविगिरः ॥ P. 202

3. सत्यं संहतिशालिशीतलपलाशालीकरालीकृतः
स्निग्धोदारफलावनम्रितमहाशाखोपशाखाञ्चितः ।
चूतद्रो न न भासि भाति न पुनश्चेतश्चमत्कारिणी
रीतिस्ते गिरिदुर्गसङ्कटदुरारोहस्थलीतस्थुषः ॥ P. 227

4. मुखमिदमलसाक्ष्या मुक्तलक्ष्मोपरोध-
व्यतिकरमिव बिम्बं भाति पीयूषभानोः ।
इदमपि विधुबिम्बं कम्रघर्माम्बुलेश-
स्फुरितमिव रतान्ते वक्त्रबिम्बं प्रियायाः ॥ P. 234

5. वाणी वाणीव परं
वेणी वेणीव केवलं तस्याः ।
एणीदृशः समिन्धे
श्रोणी श्रोणीव चैव सखे ॥ P. 234

6. कन्दर्पोपनिषद्रहस्यनिगदव्याख्याननैरन्तरी-
निष्णाते दरहृष्टनीलकमलस्पर्धालुनी लोचने ।
निस्तन्द्रोदयमानशारदशशाङ्काभं मुखाम्भोरुहं
मुग्धाक्ष्या बहुवर्णितैरलमहो विश्वैकरम्यं वपुः ॥ P. 261

If any of these verses should be traced to any work of known authorship, then that would help us in deciding the particulars about the author.

As things are, we have to search in the *Mayūrasandeśa* itself for further details about the author. We have first of all to decide the question whether the hero and the author of a *Sandeśakāvya* are identical. Unless there is something definite to the contrary, as in the case of the *Meghasandeśa*, we naturally assume that the hero is the author himself. If there are any personal allusions

in a *Sandeśakāvya*, we take them as evidences to settle the identity of the author.

In the *Mayūrasandeśa*, the house-name and the personal name of the hero's wife are definitely given. She belonged to a house called Taccappili (Part II, verse 16). Her personal name was Umā and she was known among poets as Māracemantikā (Part II, verse 36). She belonged to a village called Annakara (mentioned in the *Sandeśakāvya* as Śvetacchadataṭa in Part I, verse 23, and as Sitagaruttīra in verse 106). A family of this name still continues in that village. But in Malabar, there is the matriarchal system, and the wife's family is not identical with the husband's family. Therefore from this mention of the heroine's family, nothing can be settled about the family of the hero, and as such, of the author.

The only clue that we get regarding the author is the mention of the name Śrīkaṇṭhorvīpati, in the second verse. The heroine Māracemantikā is described as श्रीकण्ठोर्वीपतिबहुमता ।. In the fourth verse, it is also said that a few celestial beings mistook him to be the real Śrīkaṇṭha in the company of the Goddess Umā on the top of the Kailāsa, as he was sporting on the top of his mansion in the company of his wife. There can be propriety in the celestial beings mistaking him to be the *real* Śrīkaṇṭha, only if he is also a Śrīkaṇṭha in some way. The natural way of interpreting the verses is to say that he was Śrīkaṇṭhorvīpati himself. I have given the commentary according to this natural way of interpretation.

Taking it for granted that the hero, Śrīkaṇṭhorvīpati, is also the author of the poem, we come to the equation that Udaya-kṣamābhṛt who is suggested as the author of the *Kaumudī* is identical with Śrīkaṇṭhorvīpati. Udaya

must be his real name and Śrīkaṇṭha must be the hereditary Family Title. It can also be taken for granted that the author is a king in Malabar. There are many royal families and also other noble families with such hereditary Family Titles. Thus the king of Ampalapuzha, who patronised Nārāyaṇa Bhaṭṭa, the author of the *Prakriyāsarvasva*, is called Devanārāyaṇa; all the kings assumed this Title. (For Devanārāyaṇa, see Introduction to my edition of the *Taddhita* portion of the *Prakriyāsarvasva* in the Madras University Sanskrit Series.)

I have already said that the *Mayūrasandeśa* has a close resemblance to a Malayalam *Sandeśakāvya* called *Uṇṇunīlīsandeśa*. In that *Sāndeśakāvya*, the heroine is described as a pearl necklace worn by Maṇikaṇṭha, the king of the Bimbili country. The second verse in the *Mayūrasandeśa* is in imitation of the introductory verses in the *Uṇṇunīlīsandeśa*. And in the *Uṇṇunīlīsandeśa*, king Maṇikaṇṭha of Bimbili is not the husband of the heroine. The heroine is only the wife of a junior member of the Bimbili royal family. On this analogy, the expression श्रीकण्ठोर्वीपतिबहुमत can be interpreted to mean that the heroine Māracemantikā is an honoured citizen of the country ruled by Śrīkaṇṭhorvīpati and need not be his wife. In this connection I have to introduce some other points also. We know definitely that the *Mayūrasandeśa* was written by the poet before he wrote the commentary called *Kaumudī* on the *Dhvanyālokalocana*, in so far as he quotes a verse from the former work in the latter work. So the *Mayūrasandeśa* must be taken as a comparatively early work of the author.

A character bearing the name Māracemantikā appears in a Malayalam poem called *Candrotsava*. All that we know from the description there is that she is connected

with royal families. Among the many ladies coming from the circle of the local nobility, that appear in this Malayalam poem, it is found that Māracemantikā is the third in rank. In celebrating the Candrotsava (Moon-festival), King Kaṇṭan Kota appears as the protector. Śrīkaṇṭha is the Sanskrit form of the Malayalam Kaṇṭan Kota. There is evidence to show that the Malayalam poems *Candrotsava* and *Mayūrasandeśa* belong to more or less the same period. The scene where the festival Candrotsava was performed is not far from the place where Māracemantikā the heroine of the *Mayūrasandeśa* lived. From these associations, we may conclude that the Māracemantikā of the Malayalam poem *Candrotsava* and the Māracemantikā, the heroine of the *Mayūrasandeśa* are identical.

If Māracemantikā in the *Candrotsava* had been the wife of King Kaṇṭan Kota (Śrīkaṇṭhorvīpati), she would have been given the first rank. In so far as she occupies only the third rank, we have to assume that she was the wife of a junior member of the royal family. Besides the information we get about the hero of the *Mayūrasandeśa*, who is the husband of Māracemantikā, from the *Candrotsava*, the affinity between the two works helps us in settling the date of the *Mayūrasandeśa*. This point will be taken up later. There is one more point of affinity between the *Mayūrasandeśa* and the Malayalam poem *Candrotsava*. The author of the *Mayūrasandeśa* is also the commentator on the *Locana* which is itself a commentary on the *Dhvanyāloka*. Thus, the author, who is a prince and as such a very influential personage, must have been very partial towards *Dhvani*, in the matter of appreciating poetry. There is a very subtle reference to

the *Candrotsava*, there is a verse, which I freely render into English as follows :

> Those who, with charming poems, give satisfaction to erudite persons (*kovidānām*), who always talk about *Dhvani*, may many of them view with favour this new and attractive poem about the Moonlight-on-earth (Medinīcandrikā).

Evidently the author of the *Candrotsava* must have been a little jealous of the other poets whose works were appreciated by a patron who always talked about *Dhvani*, and the reference to the ध्वनिमुखरमुखानां कोविदानां in the *Candrotsava* may be to the prince who is the author of the *Mayūrasandeśa* and the *Kaumudi*. There is a Sanskrit work, of which only the few indroductory verses are known. They are given in a manuscript of the *Kumārasambhava* in the Library in the Palace at Trivandrum (see descriptive catalogue of the Palace Library at Trivandrum by K. Sambasiva Sastri, Vol. VIII, No. 1706). This introductory portion very closely resembles the introductory portion of the *Candrotsava*. The similarity cannot be an accident. One has borrowed from the other. Perhaps the *Candrotsava* and this Sanskrit work are by the same author. My own view is that this Sanskrit work is by the author of the *Mayūrasandeśa*, that the author of the *Candrotsava* is another junior member of the same family, younger than the author of the *Mayūrasandeśa* and that the Sanskrit work was imitated in the *Candrotsava*. It is also very likely that the other six verses quoted by the author in the *Kaumudī* as his own, may be from this Sanskrit work. This is only a hypothesis, formed as a guide for my future research.

In so far as the husband of Māracemantikā in the *Candrotsava* is only a junior member of the family of the

King Śrīkaṇṭha ( Kaṇṭan Kota ) according to *Candrotsava*, and in so far as the *Mayūrasandeśa* is an early work of the author, who is himself the hero of the *Sandeśakāvya*, it is better to assume that Śrīkaṇṭhorvīpati is not the hero and husband of Māracemantikā in the *Sandeśakāvya* also, but that the hero is only a prince of the family of Śrīkaṇṭhorvīpati, mentioned in the second verse of the poem.

There is a family in Malabar that has the hereditary Title of Śrīkaṇṭha. The family is called the Manakkulam Family, in the Cochin State in the Malabar country. The senior Raja of this royal family is even now called Ārya Śrīkaṇṭha. There is a branch of this family named Chittenjore, in the same locality, in which the senior Raja is called Kaṇṭan Kota. Ārya Śrīkaṇṭha is the Sanskrit form of Kaṇṭan Kota. Kaṇṭan is equal to Kaṇṭha or Śrīkaṇṭha and Kota is a Title assumed by various royal families in Malabar, and may be equated with Ārya. Kaṇṭan Kota is the Title assumed by the senior member of the Chittenjore Family as king of Chittilappalli, and in the *Candrotsava*, Kaṇṭan Kota is the king of Chittilappalli. I belong to this family. I am a junior member of this family, eligible to assume the Title of Kaṇṭan Kota (which is to be equated with Śrīkaṇṭhorvīpati ), when I become the senior member of the family. Śrīkaṇṭhorvīpati had domain over what is now a sub-division of the Malabar District of the Madras Presidency, called the Ponani Taluka ( or subdivision ) and the northern half of the Cochin State—the area bounded by the Ponani river on the north and the Arabian sea on the west, extending about thirty miles to the east and to the south from these respective boundaries. The Ponani river starts from the western Ghats near the modern town of Palghat and joins

the sea at the coastal town of Ponani. These further details about the author can also be safely deduced from evidences now available.

### Date

About the date of the work, nothing definite can be stated. Here also we have to depend on various pieces of evidences, none of which by itself is strong enough to prove anything, but all of which together can take us to the region of probabilities. There is the Malayalam *Uṇṇunīlīsandeśa*, which can safely be assigned to the fourteenth century, since the messenger there is Prince Āditya Varma of Quilon, heir-apparent to the throne; Āditya Varma succeeded Iravi Varma, who is mentioned in that *Sandeśakāvya* as the king who ruled Quilon at that time. Their dates are known. There is a mention of Āditya Varman having defeated the Tuluṣka Army, which must be a reference to the Muslim invasion of South India. From such evidences we know that the *Uṇṇunīlīsandeśa* could be safely assigned to the fourteenth century. In the *Mayūrasandeśa*, there is an imitation of the technique of the *Uṇṇunīlīsandeśa*, in the beginning of the poem.

The only other clue we have to fix the date of the *Mayūrasandeśa* is the reference to the poet Uddaṇḍa in the first part of the poem. All that we know from verse 83 there is that this poem is contemporaneous with that great poet. But the date of Uddaṇḍa himself is not known. Uddaṇḍa mentions a Śaṅkarakavi at the Kola country (the Cirakkal country in North Malabar) in the following verse in his Kokilasandeśa :

कोलानेलावनसुरभिलान् याहि यत्र प्रथन्ते
वेलातीतप्रथितयशसः शङ्कराद्याः कवीन्द्राः ॥ 60

This Śaṅkarakavi has written a poem called *Śrīkṛṣṇa-vijaya*, in which he says that he wrote it under the patronage of King Udaya Varma of the Kola country. This King Udaya Varma is assumed to have ruled the country in the first-half of the fifteenth century. A Śaṅkarakavi is mentioned in the *Candrotsava*, the Malayalam poem, and there is no doubt about this Śaṅkarakavi being identical with the Śaṅkarakavi mentioned by Uddaṇḍa. There is a very popular tradition in Malabar about Uddaṇḍa being a contemporary of another Malayalam poet called Punam, and a Punam is also mentioned in the *Candrotsava* as a very famous poet. Tradition also records that the author of *Tantrasamuccaya* (Trivandrum Sanskrit Series, Nos. 67 and 71) is also a contemporary of Uddaṇḍa. For this there is no such evidence, as in the case of the relation of Punam with Uddaṇḍa. But we know that Uddaṇḍa is a contemporary of Śaṅkarakavi and that Śaṅkarakavi is a contemporary of Punam. Thus the tradition of the relation of Uddaṇḍa with Punam is indirectly supported by other literary evidences. For this reason we shall not be wrong in accepting the authenticity of the tradition regarding the relation of Uddaṇḍa with the author of *Tantrasamuccaya*. The *Tantrasamuccaya* gives its date as Kali 4529 in a verse given at the close of the work :

कल्येऽब्देष्वतियत्सु नन्दनयनेष्वम्भोधिसंख्येषु यः
संभूतो भृगुवीतहव्यमुनियुङ्मूले सवेदोऽन्वये ।
प्राहुर्यस्य जयन्तमङ्गलपदेद्धं धाम नारायणः
सोऽयं तन्त्रमिदं व्यधाद्बहुविधादुद्धृत्य तन्त्राणवात् ॥

( नन्द = 9 ; नयन = 2 ; इषु = 5 ; अम्भोधि = 4 )

The Kali year 4529 corresponds to 1428 A. D., and this fits in well with the date of Uddaṇḍa calculated by

his relation with Śaṅkarakavi, who is related to King Udaya Varma of the Kola country, supposed to have reigned in the first-half of the fifteenth century.

It has already been said that, in point of technique, the *Mayūrasandeśa* follows the Malayalam *Sandeśakāvya* named the *Uṇṇunīlīsandeśa*. This *Sandeśakāvya* must be placed at the end of the fourteenth century. There, the bearer of the message is prince Ādityavarma, the heir-apparent to the throne of Quilon and King Ravi Varma was ruling the country of Quilon. This Ādityavarma is said to have destroyed the Tuluṣka army, which must be the Army of the Muslim Sultans of Madura. The Madura Sultanate came to an end in the third quarter of the fourteenth century.

King Ravi Varma of Quilon is known to have defeated Vikrama Pāṇḍya and after giving his daughter to the Pāṇḍya king, took the daughter of the Pāṇḍya king as his own consort. This is found in a verse quoted in a Malayalam grammar in Sanskrit called the Līlātilakam. I give a free English rendering :

> As Arjuna gave Drupada to Droṇa, so the heroic Ravi Varma of Veṇāṭ, the chief of the Yādava kings, defeated Vikrama Pāṇḍya in battle and gave his daughter to the king of the Pāṇḍyas ; and he received his daughter himself.

Elsewhere in the same grammar there is a verse which says that Vikrama Pāṇḍya defeated the Tuluṣkas. The following is a free rendering of it :

> The king of the Pāṇḍyas shattered the army of the enemy. And those of them that were on horse-back fled in haste.

In the annotation of this verse it is said that the king of the Pāṇḍyas mentioned here is Vikrama Pāṇḍya and that the Tuluṣkas are the enemies. The second verse is appropriate only after the termination of the rule of the Sultans in Madura. The defeat of Vikrama Pāṇḍya by King Ravi Varma of Quilon must be still after that, since there another person is mentioned as king of the Pāṇḍyas, as opposed to Vikrama Pāṇḍya.

From this it is clear that King Ravi Varma and the heir-apparent prince Ādityavarma belong to the close of the fourteenth century. If on these grounds the Malayalam *Sandeśakāvya* called the *Uṇṇunīlīsandeśa* is put to the close of the fourteenth century, then the *Mayūrasandeśa* can be put to any time round about 1400 A. D.

If the great Śaṅkara mentioned in the seventy-sixth verse of the *Pūrvabhāga* of the *Mayūrasandeśa*, who is mentioned as a great authority in *Nītiśāstra*, is identical with Śaṅkara, the author of the *Jayamaṅgalā* commentaries, and if the date of the *Jayamaṅgalā* commentaries could be fixed from reliable evidences, that would be an evidence for fixing the date of the *Mayūrasandeśa* also. But as things are, nothing is known definitely about these commentaries and perhaps their date has to be fixed upon the basis of the *Mayūrasandeśa*.

## An Appreciation of the Poem

The *Mayūrasandeśa* must be recognised as one of the most successful imitations of the *Meghasandeśa*. It is true that no poem in this type can approach the *Meghasandeśa* in its artistic beauty and perfect workmanship. In the *Meghasandeśa*, the circumstances under which the hero had to live apart from his beloved, the long eight months he spent in the far off south, the approach of the

rainy season and the appearance of the cloud as a fit messenger in so far as the cloud naturally moves to the north in that season and also in so far as it is the cloud that can destroy the heat ( here the heat of separation )—all these factors create a naturalness that is not found in any other poem of this type. Further, in the description of the various places on the route, a sort of appropriateness is brought about between the place and the messenger. The mountains are the friends of the clouds ; the rivers are the beloved of the cloud. There is no description at all that does not fit in with the cloud. Further throughout the description in the whole of the first part of the *Meghasandeśa*, the main theme of the poem is kept in view. Separation from the beloved, the grief consequent on such separation, the help given by the cloud in such a state of sorrow—these factors are ever kept before the reader. Cities, mountains and rivers are not described as isolated factors in a poem ; they are all united into an artistic whole in the poem, while they have every chance of being a series of disconnected descriptions.

When one thinks of other *Sandeśakāvyas*, one must keep the *Meghasandeśa* as a specimen by itself and the others must be dealt with as a separate group. In the *Mayūrasandeśa*, the circumstances under which the hero had to live apart from the heroine is extremely artificial. Further the period of separation is only a month One does not know how many days the hero spent in Trivandrum before he met the pea-cock. Perhaps it is after a day or two. Is it possible that the hero and the heroine should have come to such a stage of despondency described in the second part of the poem ? It is true that the poet attempts a justification in the seventeenth

verse of the first part, in so far as even when the eyes are closed the heroine is afraid of separation ; and as such the separation for a few days must be really unbearable. Still the fact that the separation had been only for a very few days and that it had to continue also only for a few days, takes away much from the naturalness of the situation. This is a defect that is found in all the *Sandeśakāvyas* and, as such, it ceases to be a defect. Ignoring this one factor, we have to judge the poem in respect of other points. From the point of view of good poetry, this *Sandeśakāvya* deserves a high place among poems in Sanskrit.

The style of the poem is superb. There is not a single place where there is any jerk in the even flow of the language. The words are all very simple ; the construction is straightforward and the meanings of the passages are quite clear. The alliterations are very pleasing to the ear. The description हृष्यन्मल्लीमधुरमधुनिष्यन्दि about the poem in the second verse of the first part is not at all an exaggeration. The occasional *Yamakas* are easy, natural and effortless. One has only to look into specimens of *Yamaka* like the 16th and 21st verses in the first part to find out what a command the author has of the language. There is a particular kind of alliteration found in this poem which is quite characteristic of Dravidian metre, namely the alliteration on the second syllable of each verse. Even when Malayalam poetry began to be written in Sanskrit metres, the poets kept up this Dravidian feature, and that is here introduced into Sanskrit poetry itself written in Malabar. I draw the attention of the readers to the 21st, 52nd (only alliteration in each half), 67th, 68th, 74th (only in the two halves separately), and 87th verses in the first part, and

26th, 37th, 38th (only in each half), and 55th verses (there alliteration in the first two syllables of each line) to take note of this peculiar Dravidian alliteration.

The author is very fond of alliteration, and for the sake of alliteration, he even uses some words not very familiar, even in places where a more familiar word would have equally well served the purpose, if not better. It is very seldom that the author uses words that are unhappy. The use of the *matup* termination to a *Karmadhāraya* compound in त्वरितगतिमान् in verse I-73 is not warranted by grammar; the word त्वरितगति as a *Bahuvrīhi* compound is the proper usage. But such cases are rare; perhaps this is the sole case where one could take some legitimate objection. But when it is a case of alliteration, the author sometimes goes out of his way. In verse 54 in the first part, he could have used the more familiar word सूर्यचन्द्रौ instead of the unfamiliar पुष्पवन्तौ। But after पुष्यतः it is पुष्पवन्तौ that serves the purpose of alliteration. Similarly in verse 21 of the second part, the word नक्रकेतु is not quite happy. मीनकेतु would have been a better word. Here also alliteration requires the less happy word.

One may also feel sometimes that the exaggerations in the poem are a little over-drawn. The gems and precious stones which make the sun and moon functionless (I-54, II-9, 24), the lips and the faces of the ladies taking the place of the sun and the moon (II-3), the *Candrakānta* stone (I-24, 75), the eastern mountain (I-41, 42, 56, II-33, 47), the sky getting dark through the colour of the pea-cock or of the eyes of the ladies (I-59, 70)—in all these cases one feels that the idea has been repeated. But it is to be admitted that there is no real repetition in so far as there is something new in each of the cases. A usage like पार्वती शैलकन्या (I-63) is also not

quite happy ; both mean, both literally and in usage, the same thing. There are many places where the poet has drawn his inspiration from the *Meghasandeśa*. Thus there is some similarity between I-89 in *Mayūrasandeśa* and I-46 in *Meghasandeśa*. *Mayūrasandeśa* I-34 may be compared with *Meghasandeśa* I-35 and *Mayūrasandeśa* I-70 may be compared with *Meghasandeśa* I-37. In the second part, *Mayūrasandeśa* 85 may be compared with *Meghasandeśa* 41. These are only a few cases, noted to enable the readers to easily compare this *Sandeśakāvya* and its model. There are places where the poet has drawn ideas from works like the *Rāmāyaṇacampū* and readers can compare verse 91 in the second part with the *Rāmāyaṇacampū*, Kiṣkindhākāṇḍa, verse 27. In all these cases the presentation is original though the main idea was taken from an earlier poet. Art lies in presentation and as such there is no lack of originality on this account.

There are not very many works where the author has recognised that there must be some artistic unity in the whole poem. A character should not be a mere passive spectator but must be an active participent in the events of the poem. Thus in the *Meghasandeśa*, the cloud is not a mere spectator of the scenes that are described as having to be traversed by him during his journey. The cloud is brought into intimate relation with the places. The cloud is described as a character in a poem with *Śṛṅgāra* as its *rasa*. In the *Mayūrasandeśa* also, the author has understood this aspect of art, and in describing the various scenes, he brings the pea-cock into some intimate relation with the scenes. Thus in the description of Kaṇṭiyūr in verse 59, in the description of Sindhudvīpa in verse 70, in the description of Mahodayapurī in verse 91 and in the description of Irinjalakkuda

( Saṅgamagrāma ) in verse 97, the pea-cock is brought into intimate relation with the scene. Further in the description of Cūrṇī river the pea-cock is described as a character in a *Śṛṅgārakāvya*. This verse ( 87 ) is in imitation of the description of the river Nirvindhyā in the *Meghasandeśa* ( verse 29 ). The description of the morning in verse 42 and of the sea-shore in verse 49 are quite appropriate in a *Sandeśakāvya*. The poet has realised that a *Sandeśakāvya* is not a mere string of disjointed descriptions of places. The entire poem must form a unitary *Śṛṅgārakāvya*. From this point of view, this *Sandeśakāvya* is a far nearer approach to the *Meghasandes'a* than the other two poems of this type that are popular in Malabar, namely, the *Śukasandeśa* and the *Kokilaśandeśa*.

If we compare individual verses also, it would be found that this poem keeps up a high standard. Take, for example, the apology that the hero gives to the messenger for putting him to the trouble. In the *Meghasandeśa* there is the verse beginning with धूमज्योतिस्सलिल ( 6 ) and in the *Śukasandeśa* there is the following verse :

आस्था लोके विपुलमनसामन्यसामान्यमभ्ये–
स्यर्थांनर्थोपगमविगमेष्वार्थिता चातुराणाम् ।
न्यक्षेणैषा निजगुरुतया नेक्षते तद्वियोगं
सान्द्रा तस्मिन्नपि च सदृशं द्वन्द्वमेतद्द्वयेषु ॥

This may be compared with verse 22 in the *Mayūrasandeśa*. There are various descriptions where the author has drawn inspiration from Kālidāsa and in all such cases he has done his part creditably. This applies both to the description of places in the first part and to the description of the heroine and of the condition of the hero and of the heroine in the state of separation in

the second part. When we come to the *abhijñāna* by which the messenger is to give confidence to the heroine about the authenticity of the message, I must confess that the author has been able to surpass even Kālidāsa. In most of the poems of this type, this particular item is rather tame and insipid and even Kālidāsa's performance is rather unfortunate. In the *Mayūrasandeśa* also, the first two verses ( 87 and 88 in the second part ) are not up to the mark and remain in the level of Kālidāsa ( *Megha-sandeśa*, II–48 ). But the third verse in the *Mayūra-sandeśa* ( 89 ) is a master-piece. I have not seen another *abhijñānavākya* that could be placed along with this.

One may say that in the description of the heroine's home, the poet has slightly overdrawn the picture. The description of the mango tree ( 19 ), the garden ( 20 ), a *Bakula* tree in the garden ( 21 ), an *Asoka* tree by its side ( 22 ), a small tank there ( 23 ), a well nearby ( 25 ), another garden there ( 26 ), a platform ( 27 ), a creeper near it ( 28 ), a bower of creepers there ( 29 )—these things make the description a little tedious. But there is order and continuity and also a unity in the description of the heroine, her form, and her condition in the state of separation. This portion is one of the most successful performances of the author. There is no repetition in this beautiful description ; there is no confusion either.

Among individual items in the second part, one may point out to verses 4, 7, 58, 61, and 63 for beautiful ideas where there is originality and also cleverness in express-ing beautiful ideas in a beautiful way. There is also a sort of humour which only supports the *Śṛṅgāra* ; the humour does not obstruct it. It is true that in many cases the author has drawn ideas from earlier poems,

apart from the inspiration that he has received from Kālidāsa. He closely follows the *Śukasandeśa* and the *Kokilasandeśa* in many descriptions. But in all such cases there is also an originality descernible throughout.

Kālidāsa used the words in their accepted sense and not in their etymological sense; yet in his usage the etymological sense retained a significance and propriety. In later times, Sanskrit lost its definiteness. Metaphors meant nothing but an embellishment. Take for example वक्त्रपद्मैर्दधानाश्चन्द्राद्वैतम् (1. 32) Here the ladies cannot bring about identity with the moon through their lotus-faces. Lotus has no identity with moon. Similarly, in हस्ताम्भोजैर्दधदरिगदे (1. 96) it is not a lotus-hand that can bear disc, club etc. In हेलोद्यच्चरणनलिनोत्पिष्टदैत्योत्तमाङ्गम् (2. 14) it is not a lily-foot that is fit for crushing the demons. Again नीरन्ध्रपात of अस्त्र (1. 40) is not a happy description. Words like नीरन्ध्र and मांसल are used simply in the sense of "thick". But these are features of later-day Sanskrit poetry when the language had become a mere artificial one without its natural senitiveness and delicacy of touch.

In spite of some defects that are occasionally met with in the poem, one has to admit that on the whole it is a very successful imitation of Kālidāsa; he has attempted the right thing and he has also succeeded in his attempt to a creditable extent.

C. Kunhan Raja

# संस्करणसूची

## Part I.

Verse 11. Com. L. 6 For कुसुमवन्तः read फलवन्तः ।

L. 7 after इत्यर्थः add फल्धातोः चरफलोश्च (7. 4. 87) इति नुकि, उत्परस्यातः (7. 4. 88) इति अभ्यासात्परस्य अतः उत्वे च पम्फुल्यन्ते इति रूपम् ।

Verse 103. Com. L. 6. for क्षेत्रे कृता read क्षेत्रे विहिता कृतां and for सः कृत- read सः विहित-.

Verse 104. Com. L. 6 omit सूनस्य in the beginning and read पुष्प for सून at the end of the line.

## Part II.

Verse 5. At the end of the commentary add: अमुमिति वा पाठः । अमुं परिमलभरं इति च योजना ।

Verse 15. Com. L. 7 for कामदेवः विलसति read कामदेवः विहरते विलसति.

Verse 23. Com. L. 8 for जनयति read घटयति.

Verse 37. Com. L. 3 for मुखश्रीः read मुखस्य परमा श्रीः.

Verse 38. Com. L. 6 for श्रोणिभारादिति read कुचभारादिति.

Verse 65. Com. L. 4 for अङ्गनानां read अङ्गनायाः । L. 5 for तासु read तस्यां. L. 6 for तासां read तस्याः.

Verse 89. First pāda. Read भुक्त्वासार्यं together (= भुक्त्वा + आसार्यं).

apart from the inspiration that he has received from Kālidāsa. He closely follows the *Śukasandeśa* and the *Kokilasandeśa* in many descriptions. But in all such cases there is also an originality descernible throughout.

Kālidāsa used the words in their accepted sense and not in their etymological sense; yet in his usage the etymological sense retained a significance and propriety. In later times, Sanskrit lost its definiteness. Metaphors meant nothing but an embellishment. Take for example वक्त्रपद्मैर्ददानाश्चन्द्राद्वैतम् ( 1. 32 ) Here the ladies cannot bring about identity with the moon through their lotus-faces. Lotus has no identity with moon. Similarly, in हस्ताम्भोजैर्दधदरिगदे ( 1. 96 ) it is not a lotus-hand that can bear disc, club etc. In हेलोदञ्चच्चरणनलिनोत्पिष्टदैत्योत्तमाङ्गम् ( 2. 14 ) it is not a lily-foot that is fit for crushing the demons. Again नीरन्ध्रपात of अस्त्र ( 1. 40 ) is not a happy description. Words like नीरन्ध्र and मांसल are used simply in the sense of "thick". But these are features of later-day Sanskrit poetry when the language had become a mere artificial one without its natural senitiveness and delicacy of touch.

In spite of some defects that are occasionally met with in the poem, one has to admit that on the whole it is a very successful imitation of Kālidāsa; he has attempted the right thing and he has also succeeded in his attempt to a creditable extent.

C. KUNHAN RAJA

# संस्करणसूची

## Part I.

Verse 11. Com. L. 6 For कुसुमवन्तः read फलवन्तः ।

L. 7 after इत्यर्थः add फल्धातोः चरफलोश्च (7. 4. 87) इति नुकि, उत्परस्यातः (7. 4. 88) इति अभ्यासात्परस्य अतः उत्वे च पम्फुल्यन्ते इति रूपम् ।

Verse 103. Com. L. 6. for क्षेत्रे कृता read क्षेत्रे विहिता कृतां and for सः कृत- read सः विहित-.

Verse 104. Com. L. 6 omit सूनस्य in the beginning and read पुष्प for सून at the end of the line.

## Part II.

Verse 5. At the end of the commentary add : अमुमिति वा पाठः । अमुं परिमलभरं इति च योजना ।

Verse 15. Com. L. 7 for कामदेवः विलसति read कामदेवः विहरते विलसति.

Verse 23. Com. L. 8 for जनयति read घटयति.

Verse 37. Com. L. 3 for मुखश्रीः read मुखस्य परमा श्रीः.

Verse 38. Com. L. 6 for श्रोणिभारादिति read कुचभारादिति.

Verse 65. Com. L. 4 for अङ्गनानां read अङ्गनायाः । L. 5 for तासु read तस्यां. L. 6 for तासां read तस्याः.

Verse 89. First pāda. Read भुक्त्वासार्यं together (= भुक्त्वा + आसार्यं).

श्रीः

# मयूरसन्देशः

## पूर्वभागः

१

अविरतमदधाराघोरणीपारणोद्य-
न्मदमधुकरमालाकूजितोद्घोषिताशम्।
मम मनसि समिन्धां सिन्धुरेन्द्राननं तत्
किमपि कनकशैलप्रस्थसच्छायमोजः ॥ १ ॥

सिन्धुरेन्द्रस्य गजश्रेष्ठस्य आननमिव आननं यस्य तत् किमपि ओजः। विघ्नेश्वर इति यावत्। मम मनसि समिन्धां दीप्यताम्। कीदृशं ओजः। अविरता अविच्छिन्ना मदधारा एव घोरणी नदी। तस्याः पारणेन पानेन उद्यन् मदः येषां तेषां मधुकराणां मालायाः श्रेण्याः। मालारूपेण स्थितानां मधुकराणामित्यर्थः। कूजितेन उद्घोषिताः घोषवत्यः कृताः आशाः दिशः यस्य तत् अविरतमदधाराघोरणीपारणोद्यन्मदमधुकरमालाकूजितोद्घोषिताशम्। कनकशैलप्रस्थेन सुवर्णगिरेः सानुप्रदेशेन समाना छाया दीप्तिः यस्य तत् कनकशैलप्रस्थसच्छायम्। मालिनीवृत्तम्॥ १

श्रीकण्ठोर्वीपतिबहुमतं मारचेमन्तिकाख्यं
मारस्थाङ्कं महितमधिकृत्याधुना साधु बद्धम्॥
हृष्यन्मल्लीमधुरमधुनिष्यन्दि संदेशकाव्यं
नव्यं विद्वत्कविपरिषदामस्तु कर्णातिथेयम् ॥ २ ॥

श्रीकण्ठ इति नाम्ना प्रसिद्धः उर्वीपतिः राजा श्रीकण्ठोर्वीपतिः। तेन बहुमतं श्रीकण्ठोर्वीपतिबहुमतम्। तस्य बहुमतिस्थानमित्यर्थः। मार-

---

१. घोरणीप...

चेमन्तिका इति आख्या नामधेयं यस्य तत् मारचेमन्तिकाख्यम्। महितं प्रशस्तम्। मारस्य कामस्य अस्त्रम्। तदधिकृत्य अधुना साधु अविकलं यथा तथा बद्धं विरचितम्। नव्यं सन्देशकाव्यम्। विद्वांसश्च अमी कवयश्च विद्वत्कवयः। विद्वांसश्च कवयश्च इति द्वन्द्वसमासो वा। तेषां परिषदां समाजानाम्। अतिथिषु साधु आतिथेयम्। कर्णेषु आतिथेयं कर्णातिथेयं अस्तु। अतिथीनामिव तेषां कर्णानां प्रीतिं ददातु इत्यभिप्रायः। कीदृशं सन्देशकाव्यम्। हृष्यन्ती विकसन्ती या मल्ली तस्याः मधुरं मधु निष्यन्दते इति हृष्यन्मल्लीमधुरमधुनिष्यन्दि। निपूर्वात् स्यन्दतेः ताच्छील्ये णिनिः। मारचेमन्तिकाख्यं मारस्यास्त्रं इत्येतत् उत्तरभागे "लब्धोमायाः" इति श्लोके (३६) विशदं भविष्यति। सेवन्तिका नाम पुष्पविशेषः यः केरलभाषायां चेमन्तिका इति व्यपदिश्यते। मारेण स्वीकृता चेमन्तिका मारचेमन्तिका। इत आरभ्य आकाव्यसमाप्ति मन्दाक्रान्ता वृत्तम्॥ २

स्वर्गारामद्रुमनवलतासूनसौरभ्यलोभ[1]-
भ्राम्यत्पुष्पन्धय[2]कलकलध्वानवाचालिताशे।
सौधे साधीयसि परिलसच्चन्द्र[3]पादाभिरामे
रेमे व्योमस्पृशि दयितया[4] लालितः कोऽपि कामी[5]॥ ३॥

साधीयसि नितरां सुखप्रदे। व्योमस्पृशि। अत्युन्नते इत्यर्थः। सौधे कोऽपि कामी दयितया लालितः सन् रेमे। कीदृशे सौधे। स्वर्गारामे नन्दनवने यः द्रुमः वृक्षः। कल्पकवृक्ष इत्यर्थः। तस्य नवलतायाः यानि सूनानि पुष्पाणि तेषां सौरभ्ये लोभात् भ्राम्यन्तः ये पुष्पन्धयाः मधुकराः तेषां कलकलध्वानेन वाचालिताः शब्दपूर्णाः कृताः आशाः दिशः यस्मिन् तस्मिन् स्वर्गारामद्रुमनवलतासूनसौरभ्यलोभभ्राम्यत्पुष्पन्धयकलकलध्वानवाचालिताशे। अथवा सौरभ्यलाभ इत्येवास्तु पाठः। सौरभ्यस्य लाभार्थं भ्राम्यन्तः इति तदा योजना। परिलसद्भिः परितो दीप्यमानैः चन्द्रपादैः चन्द्रकिरणैः अभिरामे

---

१. लाभ. २. भ्रामं पुष्पंधय. ३. साधीयसि...रिलसच्चन्द्र. ४. मयितया. ५. कोपि का......

मनोहरे । व्योमस्पृशि इत्येतस्य विशेषणस्य सार्थक्यं स्वर्गारामद्रुमनवलतासून-सौरभ्यलोभे हेतुत्वेन । श्रीकण्ठोर्वीपतिरेव कामी । दयिता च मारचेमन्तिका इत्यवधेयम् ॥ ३

कुर्वन्निच्छाविहृतिमुमया सङ्गतः स्फाटिकाद्रा-[1]
वास्ते चिल्लीचलनकणिकाक्लृप्तविश्वव्यवस्थः[2] ।
श्रीकण्ठोऽयं स्वयमिति धृतभ्रान्तिरेनं कदाचित्
प्रक्रान्तोरुप्रणुतिमुखरः[3] खेचरौघः सिषेवे ॥ ४ ॥

अयं पूर्वोक्तः कामी स्वयं श्रीकण्ठः साक्षात् शिव एव । उमया पार्वत्या सङ्गतः । स्फाटिकाद्रौ स्फटिकमये पर्वते । कैलासे इत्यर्थः । इच्छाविहृतिं कुर्वन् यथेच्छं क्रीडां कुर्वन् आस्ते । कीदृशः श्रीकण्ठः । चिल्लीचलनकणिकया भ्रुवः ईषच्चलनेन क्लृप्ता विश्वस्य जगतः व्यवस्था येन सः चिल्लीचलनकणिकाक्लृप्तविश्वव्यवस्थः । इति एवम् । धृता भ्रान्तिः येन सः धृतभ्रान्तिः । खेचराणां विद्याधराणां समूहः कदाचित् एनं श्रीकण्ठं सिषेवे सेवितवान् । कथंभूतः खेचरौघः । प्रक्रान्ता आरब्धा उर्वी महती या प्रणुतिः स्तुतिः तया मुखरः शब्दवान् प्रक्रान्तोरुप्रणुतिमुखरः । न केवलमयं नाम्ना श्रीकण्ठः । अपि तु अनुभावैरपि इत्येतदत्र स्पष्टं कृतम् । मारचेमन्तिकायाः उमा इत्येव पितृकृतं नाम इति "लब्धोमायाः" इति श्लोके ( ३६ ) उत्तरभागे उक्तं भविष्यति । अतश्च उमया सङ्गतः इति प्रयोगस्य औचित्यं विभावनीयम् ॥ ४

हा हन्तासौ हतविधिविपर्यासितात्मा तदीयं
दृष्ट्वा जाड्यं मुहुरपि मिलद्धस्ततालं जहास ।
सोऽयं[4] दूरीभवदसुसमो मासमास्वेति[5] तस्मै
शापं प्रादान्महदवमतिः[6] कस्य नार्तिं प्रसूते ॥ ५ ॥

हा हन्त अहो कष्टम् । असौ कामी हतविधिना दुर्विधिना विपर्यासितः विपर्यासं दुर्मार्गं प्रापितः आत्मा यस्य सः हतविधिविपर्यासितात्मा सन् तदीयं

---

१. संगत स्फाटिकाद्रा. २. क्लृप्त...स्थः. ३. प्रक्रान्तोति...मुखः.
४. सेयं. ५. मासमासेति. ६. प्रादान्मह...वमतिः.

विद्याधरसमूहसंबन्धि जाड्यं मौढ्यं आत्मनः महेश्वरत्वेन अवगतिरूपं दृष्ट्वा मुहुरपि पुनः पुनः। मिलन् हस्तयोः तालः यस्मिन् तत् मिलद्धस्ततालं यथा तथा जहास हासं चकार। सोऽयं विद्याधरसमूहः तस्मै कामिने शापं प्रादात् तं शशाप। कः शापः इत्युच्यते—दूरीभवन्ती वियुक्ता दूरे वर्तमाना असुसमा प्राणसदृशी प्रियतमा यस्मात् सः दूरीभवदसुसमः सन् मासं एकमासं आस्व वर्तस्व। इति एवं शापं प्रादात् इत्यन्वयः। अत्र अर्थान्तरन्यासेन उक्तिः। महदवमतिः महतां महाजनानां अवमतिः। कर्मणि षष्ठी। कस्य आर्ति दुःखं न प्रसूते। महदवमतिः सर्वथा दुःखमूलमेवेत्यर्थः॥ ५

तेनावासो मम मधुजितः सन्निधौ क्वापि पुण्ये
क्षेत्रे स्यादित्यथ सविनयं प्रार्थ्यमानस्तथेति[1]।
प्रोच्यै प्रायादयमपि समैक्षिष्ट सद्यस्सुदूरे
स्यानन्दूरे विगतदयितं दूनमात्मानमेव[2]॥ ६॥

मधुजितः विष्णोः सन्निधौ क्वापि पुण्ये क्षेत्रे मम आवासः स्यात्। इति इत्थं अथ तेन कामिना सविनयं प्रार्थ्यमानः। विद्याधरसंघः इति शेषः। तथा इति तथा भवतु इति प्रोच्य प्रकर्षेण उक्त्वा प्रायात् निर्ययौ। अयमपि कामी सद्यः सुदूरे स्यानन्दूरे अनन्तपुरे। अनन्तपुरमिति केरलेषु काचन नगरी। विगता दयिता यस्मात् स विगतदयितः। तथा सन्तं ततश्च दूनं आत्मानमेव। न तु दयितामिति भावः। समैक्षिष्ट ददर्श॥ ६

दैत्याराति दलितशतमन्यूपलोदारशोभं
पश्यन्नेनं भुजगशयने कल्पितस्वापसौख्यम्।
तापोद्रेकं दधदपि मुहुः प्रेयसीविप्रयोगा-
द्दीर्घश्वासः क्षणमिव[3] शनैरेष संजातसंज्ञः॥ ७॥

एषः कामी प्रेयसीविप्रयोगात् क्षणमिव। दीर्घः श्वासः यस्य स दीर्घश्वासः। दीर्घनिश्वासं कुर्वन्नित्यर्थः। मुहुः पुनः पुनः तापोद्रेकं अत्यधिकं तापं

---

१. प्राप्य. २. विगतदयितादीन...त्मानमेव. ३. दृच्छ्श्वासक्षणमिव.

दधत् अनुभवन् अपि शनैः क्रमेण । संजाता संज्ञा बोधः यस्य सः संजातसंज्ञः । तथा अभवदिति शेषः । कथंभूतः सन् । एनं अनन्तपुरस्थं दैत्यारातिं विष्णुं पश्यन् । कीदृशं दैत्यारातिम् । भुजगः सर्पः । अत्र अनन्तः । स एव शयनं शय्या भुजगशयनम् । तस्मिन् कल्पितं संपादितं स्वापः एव सौख्यं येन तं कल्पितस्वापसौख्यम् । दलितः भिन्नः शतमन्यूपलः इन्द्रनीलः । तद्वदुदारा नितरां दीप्यमाना शोभा यस्य तं दलितशतमन्यूपलोदारशोभम् ॥ ७

सोऽयं कान्ताविरहजलधौ वीतपारे निमग्नः
स्वं वृत्तान्तं सरसिजदृशे[1] हन्त सन्देष्टुकामः ।
विद्युद्वल्लीकवचितनवाम्भोदनीरन्ध्रिताशे
काले कान्तं कमपि शिखिनं संपतन्तं ददर्श ॥ ८ ॥

सोऽयं कामी । वीतः अपगतः पारः परकूलं यस्मात् सः वीतपारः । तस्मिन् । कान्ताविरह एव जलधिः समुद्रः कान्ताविरहजलधिः । तस्मिन् निमग्नः सन् स्वं वृत्तान्तं सरसिजदृशे स्वप्रियायै सन्देष्टुकामः सन्देशरूपेण निवेदयितुमिच्छन् । विद्युत एव वल्ल्यः विद्युद्वल्ल्यः । वल्ल्य इव विद्युतः इति वा । ताभिः कवचिताः कवचवन्तः कृताः । आवृता इति यावत् । नवाम्भोदाः सजलमेघाः । तैः नीरन्ध्रिताः निबिडिताः आशाः दिशः यस्मिन् तस्मिन् विद्युद्वल्लीकवचितनवाम्भोदनीरन्ध्रिताशे काले । वर्षाकाले इत्यर्थः । कान्तं कमनीयरूपं कमपि शिखिनं मयूरं संपतन्तं ददर्श ॥ ८

पत्त्रीन्द्रं तं प्रवरपुरुहूतोपलस्पर्धिशोभै-
रम्भोजाक्षीघनकचसखैरञ्चितं बर्हभारैः ।
आलोक्याराद्विरहविधुरां संस्मरन्नात्मकान्तां
कामाक्रान्तः कथमपि शनैः प्राप तस्योपशल्यम् ॥ ९ ॥

स इति शेषः । सः कामी तं पत्त्रीन्द्रं पक्षिश्रेष्ठ मयूरं आरादटूरे आलोक्य विरहविधुरां स्वस्य वियोगेन पीडितां आत्मकान्तां संस्मरन् । संस्मरणे

1. दृशो.

हेतुमाह। प्रवरेण उत्कृष्टेन पुरुहूतोपलेन इन्द्रनीलेन स्पर्धिनी। तत्सदृशीति भावः। शोभा येषां तैः। अत एव अम्भोजाक्ष्याः स्वप्रियायाः घनस्य निबिडस्य कचस्य केशस्य सखिभिः। तत्समैरिति यावत्। बर्हभारैः अञ्चितं पत्रीन्द्रं आलोक्य इति योजना। कामाक्रान्तः सन् कथमपि महता प्रयत्नेन शनैः मन्दं तस्य मयूरस्य उपशल्यं समीपं प्राप ॥ ९

सन्त्यज्यान्यानिह सहचरान् मत्समानप्यकस्मात्[१]
कस्मादस्मत्सविधमधुना सोऽयमाक्रामतीति।
यावन्नाशङ्कत खगपतिस्[२]तावदभ्याशमेत्य
स्मित्वा मन्दं तदनु कुशलप्रश्नपूर्वं जगाद ॥ १० ॥

इह अन्यान् मत्समान् सहचरान् अपि संत्यज्य। यद्यप्यन्येऽपि मत्सदृशाः सन्ति तथापि तान् उपेक्ष्य इत्यर्थः। अकस्मात् कमपि कारणविशेषं विना। कस्मात् केन हेतुना अस्मत्सविधं अधुना इदानीं सोऽयं पुरुषः आक्रामति अभिगच्छति। इति एवं खगपतिः पक्षिश्रेष्ठः मयूरः यावत् न अशङ्कत तावत् तदा। अयमिति शेषः। अयं कामी अभ्याशं मयूरस्य समीपं एत्य स्मित्वा मन्दहासं कृत्वा तदनु मन्दहासानन्तरं कुशलप्रश्नपूर्वं आदौ कुशलप्रश्नं कृत्वा तदनन्तरं जगाद एवं उक्तवान् ॥ १०

भाग्याम्भोधे यदिह स भवान् प्रार्थनीयानुभावः
प्राप्तस्त्वद्दर्शन[३]कुतुकिनोर्नेत्रयोरद्य मार्गम्।
प्राप्नस्तन्मे नियतमनवद्याकृते यौगपद्या-
त्सम्फुल्यन्ते[४] किमपि सुभगंभावुकाः पुण्यपुञ्जाः ॥ ११ ॥

हे भाग्याम्भोध इह प्रार्थनीयः स्पृहणीयः अनुभावः तेजोविशेषः यस्य सः प्रार्थनीयानुभावः। सः भवान्। कुतुकमस्यास्तीति कुतुकी। त्वद्दर्शने कुतुकिनोः नेत्रयोः मम चक्षुषोः मार्गं अद्य प्राप्तः। त्वं मया दृष्ट इत्यर्थः।

१. संत्यज्यानिह......मत्समानोप्यकस्मात्. २. यावन्नाशङ्कत इति खगपति. ३. प्राप्यस्त्वद्दर्शन. ४. यौगपद्यात् संफुल्लन्ते.

इति यत् तत्। हे अनवद्याकृते मे प्राञ्चः पूर्वजन्मसु भवाः। सुभगं भवितु-मेषां शीलमिति सुभगंभावुकाः पुण्यपुञ्जाः सुकृतसमूहाः यौगपद्यात् युगपदेव किमपि किञ्चिदिव पम्फुल्यन्ते अतिशयेन कुसुमवन्तः भवन्ति। फलोन्मुखा भवन्ति इत्यर्थः ॥ ११

आनन्दाम्भोनिधिमुपनयन्त्याशु वर्धिष्णुभावं
क्लान्तां चेतःकुवलयवनीं स्वैरमुन्मीलयन्ती।
शोकध्वान्तं मुहुरपि निराकुर्वती सर्वतो मे
मूर्तिः सेयं तव खगपते भाति चान्द्री कलेव ॥ १२ ॥

हे खगपते पक्षिश्रेष्ठ तव सा इयं मूर्तिः चान्द्री चन्द्रसंबन्धिनी कला इव मे भाति। कीदृशी मूर्तिः। आनन्द एव अम्भोनिधिः समुद्रः आनन्दाम्भो-निधिः। तं आशु वर्धिष्णुभावम्। वृद्धिमित्यर्थः। उपनयन्ती। क्लान्ताम्। चेत एव कुवलयं चेतःकुवलयम्। तस्य वनीं स्वैरं उन्मूलयन्ती। मुहुरपि। शोक एव ध्वान्तं अन्धकारः शोकध्वान्तम्। तत् सर्वतः निराकुर्वती। विशेषणत्रयेण चन्द्रकलया साम्यमुक्तम् ॥ १२

प्रीतिस्थानं ननु भगवतः पुण्डरीकेक्षणस्य
भ्रातस्तार्क्ष्यः स खलु पतगाधीश्वरस्त्वत्प्रसूतिः।
खण्डं खण्डं भुवनभयदं भोगिषण्डं प्रचण्डै-
स्तुण्डाघातैस्तुलितकुलिशैर्देहिनस्त्वं धिनोषि ॥ १३ ॥

हे भ्रातः भगवतः पुण्डरीकेक्षणस्य विष्णोः प्रीतिस्थानं प्रीतिविषयः सः पतगाधीश्वरः पक्षिश्रेष्ठः तार्क्ष्यः गरुडः त्वत्प्रसूतिः त्वत्कुले जातः। खलु ननु इति च निश्चये। पतगाधीश्वर त्वत्प्रसूतिः इति वा पाठः। पतगाधीश्वर इति तदा संबोधनान्तम्। प्रचण्डैः प्रकर्षेण तीक्ष्णैः। तुलितः कुलिशः वज्रायुधः यैः तैः। वज्रसमैः इत्यर्थः। तुण्डाघातैः। भुवनस्य लोकस्य भयं ददाति इति भुवनभयदः। तं भोगिषण्डं सर्पसमूहं। खण्डं खण्डं खण्डशः कृत्वा देहिनः मनुष्यान् त्वं धिनोषि प्रीणयसि ॥ १३

सेनानीरप्यमरसदसामौपवाह्यं स्वयोग्यं
लब्ध्वा मध्येरणमरिगणै[1]र्दुर्निरीक्ष्यं भवन्तम् ।
दर्पोद्रिक्तान् दलयति सुरद्रोहिणस्तादृशस्ते
तुष्टूषायां कथमिव नृणां प्रह्वतां याति जिह्वा ॥ १४ ॥

अमरसदसां सेनानीरपि स्कन्दोऽपि स्वयोग्यं आत्मनः उचितं अरिगणैः शत्रुसमूहैः दुर्निरीक्ष्यं ईक्षितुमशक्यम् । भयप्रदत्वादित्यभिप्रायः । भवन्तं औपवाह्यं वाहन लब्ध्वा मध्येरणं युद्धमध्ये । असुरैः सह इति भावः । दर्पेण कोपेन उद्रिक्तान् उद्धतान् सुरद्रोहिणः असुरान् तारकादीन् । दलयति हन्ति । तादृशः तथाभूतस्य ते तव तुष्टूषायां त्वां स्तोतुं इच्छायां विषये । नृणां जिह्वा कथमिव प्रह्वतां याति प्रवणा भवति ॥ १४

वृष्ट्या तुष्टिं भजति भुवने हृष्यसि त्वं हि नृत्यन्
मन्ये तस्माद्विपुलहृदय ग्लायति ग्लायसीति ।
सोऽहं यातः शरणमधुना त्वां विपन्नैकमित्रं
मित्रं पद्माकर इव पतत्रीन्द्र[3]वंशावतंस ॥ १५ ॥

भुवने लोके वृष्ट्या हेतुना तुष्टिं भजति सति त्वं नृत्यन् हृष्यसि । हि यतः हे विपुलहृदय तस्मात् अहं मन्ये विभावयामि । किमिति । लोके ग्लायति ताम्यति सति ग्लायसि त्वं ग्लानिं प्राप्नोषि इति । सः अहं अधुना विपन्नानां एकमित्रं विपन्नैकमित्रं त्वां शरणं यातः । कमिव । पद्माकरः मित्रं सूर्यमिव । हे पतत्रीन्द्रवंशस्य अवतंस शिरोभूषणभूत ॥ १५

जानीहि त्वं जनितजनतानन्द जायावियुक्तं
मध्येदुःखाम्बुधि[4] विशरणं वर्तमानं सखे माम् ।
आपन्नानां प्रथमगणनापात्रतां गात्रभाजा-
मापन्नानागुणगणनिधे वामभावाद्विधातुः ॥ १६ ॥

---

१. लक्ष्मोमन्यैरणमरिगणै. २. वृष्ट्वा. ३. पद्माकर...पत्रीन्द्र. ४.मध्ये...बुधि.

जनितः जनतायाः जनसमूहस्य आनन्दः येन सः जनितजनतानन्दः । हे जनितजनतानन्द मां जायावियुक्तं जायया विरहितम् । अत एव मध्येदुःखाम्बुधि । दुःखमेव अम्बुधिः दुःखाम्बुधिः । तस्य मध्ये वर्तमानं विशरणं आश्रयरहितं च त्वं जानीहि हे सखे । विधातुः विधेः वामभावात् प्रतिकूलत्वात् आपन्नानां गात्रभाजां देहिनां प्रथमगणनापात्रतां प्रथमः इति गणनायाः योग्यतां आपं प्राप्तवानस्मि हे नानागुणगणनिधे नानागुणानां गणस्य निधे आधारभूत ॥ १६

आतन्वानात् क्षणमपि दृशोर्मीलनाद्विप्रयोगं
गाढाश्लेषादपि सुमहतीं भीतिमन्तर्बिभर्मि ।
काले नीलाम्बुदचयनिचोलावृताशान्तराले
सोऽहं जातः सपदि सुदृशो हन्त दूराद्दवीयान्[1] ॥ १७ ॥

दृशोर्मीलनाद्धेतोः क्षणमपि विप्रयोगमातन्वानात् गाढाश्लेषादपि सुमहतीं भीतिं अहं अन्तः बिभर्मि । यदा गाढाश्लेषोऽनुभूयते तदा दृशोर्मीलने सति विप्रयोगः क्षणमपि आपद्यते । अतश्च मे महती भीतिर्जाता इत्यर्थः । सः अहं नीलाम्बुदानां सजलमेघानां चयः समूह एव निचोलं आवरणवस्त्रम् । तेन आवृताः आशान्तरालाः दिगन्तर्भागाः यस्मिन् तस्मिन् काले वर्षाकाले । सुदृशः प्रियायाः दूराद्दवीयान् अत्यन्तं विप्रकृष्टः सपदि जातः । हन्त कष्टम् ॥ १७

भ्रातः शङ्के[2] शशधरमुखी सापि मद्भाग्यदोषै-
राबिभ्राणा स्मरशरशरव्यायमाणं शरीरम् ।
वेलातीते बलवदबला हन्त सन्तापसिन्धौ
बाला वीतावधि वितनुते मज्जनोन्मज्जनानि ॥ १८ ।

हे भ्रातः अहं शङ्के । किमिति । सापि शशधरमुखी चन्द्रमुखी अबला बाला मद्भाग्यदोषैः हेतुभिः । स्मरस्य कामस्य शराणां शरव्यायमाणं लक्ष्यभूतं शरीरं आबिभ्राणा वीतपारे अपारे सन्तापसिन्धौ दुःखसमुद्रे । बलवत् वीता-

---

१. दूराद्दवी... २. आतश्शंके.

वधि अवधिं विना । एते क्रियाविशेषणे । मज्जनोन्मज्जनानि वितनुते । हन्त कष्टम् । एवं शङ्के इति योजना ॥ १८

प्रत्यग्रोऽयं परिमलभरः प्रोन्मिषत्केतकीनां
प्रत्याशान्तं प्रसरति परिभ्रान्तलोलम्बमालः ।
त्वज्जातीयास्तरुषु विदधत्युद्धतां नृत्तलीलां
शक्यः सोढुं कथय स कथं प्रोषितैरेष कालः ॥ १९ ॥

प्रोन्मिषत्केतकीनां प्रकर्षेण उन्मिषन्तीनां फुल्लन्तीनां केतकीनां अयं प्रत्यग्रः अभिनवः परिमलभरः । आशायाः दिशः अन्तः आशान्तः । आशान्ते आशान्ते प्रत्याशान्तम् । सर्वास्वपि दिक्षु इत्यर्थः । प्रसरति । कीदृशः परिमलभरः । परिभ्रान्ता समन्तात् गच्छन्ती लोलम्बानां भ्रमराणां माला यस्मिन् सः परिभ्रान्तलोलम्बमालः । त्वज्जातीयाः तव जातौ मयूरजातौ भवाः । अन्ये मयूराः इत्यर्थः । तरुषु वृक्षेषु उद्धतां नृत्तलीलां विदधति कुर्वन्ति । स एष कालः प्रोषितैः विरहिभिः कथं सोढुं शक्यः । कथय । न शक्य इत्यर्थः ॥ १९

कन्दर्पो निर्दहति न यथा कम्ररूपं कृशाङ्ग्या
धत्ते प्राणान् कथमपि यथा सङ्गमाशानुबन्धः[१] ।
साधो संचिन्तय लघु तथा चेतसा नीतिभाजा
सोढा नैष क्षणमपि सखे गाढवैरो मनोभूः ॥ २० ॥

यथा कृशाङ्ग्याः कम्ररूपं मनोहरं रूपं कन्दर्पः न निर्दहति । यथा च संगमे विषये आशा संगमाशा । तस्या अनुबन्धः संगमाशानुबन्धः । कथमपि यथाकथंचित् प्राणान् । तस्याः इत्याशयः । धत्ते धारयति । हे साधो नीतिभाजा नीतिकुशलेन चेतसा तव मनसा लघु क्षिप्रम् । "लघु क्षिप्रमरं द्रुतम्" इत्यमरः । संचिन्तय । हे सखे एषः गाढवैरः मनोभूः मन्मथः क्षणमपि न सोढा न सहिष्यति ॥ २०

---

१. संगमाशानुबद्धः.

सन्देशं तं नवविरहिणः साम्प्रतं मे प्रतीतः
सन्देशं तं नय नयनिधे यत्र सा पक्ष्मलाक्षी ।
मन्दीकुर्या मदनदहनप्लोषमेणेक्षणायाः
खिन्दानाया[1] नवनवसुधास्यन्दिभिः सान्त्ववाक्यैः ॥ २१ ॥

हे नयनिधे । नवं अभूतपूर्वं यथा तथा विरहः अस्यास्तीति नवविरही । तस्य नवविरहिणः मे सन्देशं साम्प्रतं इदानीं प्रतीतः सन् प्रीतः सन् तं देशं नय । यत्र यस्मिन् देशे सा पक्ष्मलाक्षी । वर्तते इति शेषः । किं च खिन्दानायाः खेदमनुभवन्त्याः एणेक्षणायाः । मदनदहनेन कामाग्निना प्लोषं दाहम् । नवनवां सुधां अमृतं स्यन्दन्तीति नवनवसुधास्यन्दिनः । तैः नवनवसुधास्यन्दिभिः सान्त्ववाक्यैः मन्दीकुर्याः मन्दं कुर्याः ॥ २१

याच्ञावादः किल तनुभृतां मानहानेर्निदानं
सत्यं नीचोचित इति मुहुर्निन्दितो दूतभावः[2] ।
नैषा याच्ञा मम न भवतो दौत्यमप्यत्र कृत्ये
किन्त्वन्योन्यप्रणयसुभगः कोऽपि मैत्रीविपाकः ॥ २२ ॥

याच्ञावादः याच्ञाप्रसंगः तनुभृतां मनुष्याणां मानहानेः निदानं कारणम् । किल इति प्रसिद्धौ । दूतभावः नीचोचितः नीचानां क्षुद्राणां योग्यः इति मुहुः निन्दितः । एतत् सत्यम् । एषा मम प्रवृत्तिः न याच्ञा । अत्र कृत्ये भवतः दौत्यमपि न विद्यते । किन्तु अन्योन्यप्रणयेन सुभगः अन्योन्यप्रणयसुभगः कोऽपि मैत्रीविपाकः मैत्र्याः सुहृद्भावस्य परिपाक एव ॥ २२

आश्चर्याणामतिशयवतां जन्मभूमिस्त्रिलोक्यां
ख्यातः श्वेतच्छदतटगिरा सौम्य ते गम्यदेशः ।
कामस्यान्माभिमतघटनासाहसत्यक्तमूर्तेः
प्रीत्या नित्यं निवसति पुरे यत्र शैलेन्द्रकन्या ॥ २३ ॥

हे सौम्य ते गम्यदेशः त्वया गन्तव्यो देशः श्वेतच्छदतटगिरा श्वेतच्छदतटं इति गिरा नाम्ना त्रिलोक्यां ख्यातः । श्वेतच्छदतटं इति केरलेषु कश्चन प्रदेशः।

---

१. विन्दानायाः. २. मुहु...तादूतभावः.

स प्रदेशः। अतिशयवतां आश्चर्याणां जन्मभूमिः । यत्र पुरे शैलेन्द्रकन्या पार्वती नित्यं निवसति। कथम्। कामस्य प्रीत्या कारणेन । कामं प्रसाद-यितुमिति भावः। कीदृशस्य कामस्य। आत्मनः पार्वत्या एव अभिमतस्य परमेश्वरसमागमरूपस्य घटना घटनार्थं यत्न एव यः साहसः तेन त्यक्ता नष्टा मूर्तिः शरीरं यस्य तस्य आत्माभिमतघटनासाहसत्यक्तमूर्तेः। श्वेतच्छदो हंसः। "हंसास्तु श्वेतगरुतः" इत्यमरः। केरलभाषायां 'अन्न' इति हंस-पर्यायः। तटं इत्यस्य च 'कर' इति पर्यायः। मिलित्वा 'अन्नकर' इति नाम सिद्धम्। अयमेव देशः उत्तरत्र सर्गावसाने (श्लो. १०६) सितगरु-त्तीरशब्देन निर्देक्ष्यते ॥ २३

सन्तापानामसहनतयेवाशु निर्गन्तुकामान्
प्राणानाशागुणविगलितान्[1] धारयन्तीं कथंचित्।
मच्चित्तेन्दूपलशशिकलामुज्झिताशेषभूषां
तत्र द्रक्ष्यस्यलसगमनामङ्गजब्रह्मविद्याम् ॥ २४ ॥

तत्र तस्मिन् देशे त्वं अङ्गजब्रह्मविद्यां कामस्य उपनिषद्भूताम्। मम प्रियतमामिति शेषः। द्रक्ष्यसि। कीदृशीम्। सन्तापानां पीडानां असहनतया इव आशु निर्गन्तुकामान्। आशा एव गुणः सूत्रम्। तस्मात् विगलितान् भ्रष्टान् प्राणान् कथंचित् महता प्रयत्नेन धारयन्तीम्। मच्चित्तमेव इन्दूपलः चन्द्रकान्तः। तस्य शशिकलां आनन्दकारिणीं हृदयद्रवकारिणीम्। उज्झिताः त्यक्ताः अशेषाः भूषाः यया तां उज्झिताशेषभूषाम्। अलसगमनाम् ॥ २४

पन्थानस्ते परिचितचराः[2] प्रायशः पत्रिवर्य
क्षोण्यामस्यामविहतगतेर्भ्राम्यतः[3] सर्व एव।
याता येन त्वमपि सुदृशः सद्म तं वर्त्मभेदं
याथातथ्यग्रहणविधये बोधयामस्तथापि ॥ २५ ॥

---

१. निगलितां. २. परिचयचराः. ३. गतिभ्राम्यतः.

हे पत्रिवर्य अस्यां क्षोण्यां भूमौ अविहतगतेः अविहता अप्रतिबद्धा गतिः यस्य तस्य भ्राम्यतः ते तव सर्वे एव पन्थानः प्रायशः परिचितचराः पूर्वे परिचिताः। तथापि येन पथा त्वं सुखशः सत्र वर्तते याता असि तं वर्त्म भेदं मार्गविशेषम्। याथातथ्येन ग्रहणमेव विधिः याथातथ्यग्रहणविधिः। तदर्थं बोधयामः विज्ञापयामः॥ २५

आदौ तावत् प्रणम पतगाधीश पाथोधिकन्या-
चेतोवृत्तिभ्रमदलिकलाकेलिपाथोजवीथीम्[1]।
शेषाहीश विहितकपटस्वापमुद्रां कृपार्द्रां
स्यानन्दूरे सकलसुखदां कामपि स्वात्मविद्याम्॥ २६॥

हे पतगाधीश पक्षिश्रेष्ठ। आदौ तावत् स्यानन्दूरे अनन्तपुरक्षेत्रे 'तेनावासो' इति (६) श्लोके पूर्वं प्रस्तुते वर्तमानां कामपि अनिरूपणीयां स्वात्मविद्यां स्वस्य आत्मनः विद्याम्। विष्णुमूर्तिमित्यर्थः। प्रणम। विष्णुरेव ज्ञाता ज्ञानविषयश्च इत्यभिप्रेत्येदमुक्तम्। कीदृशीं स्वात्मविद्याम्। पाथोधिकन्यायाः श्रीभगवत्याः चेतोवृत्तय एव भ्रमन्तः अलयः भ्रमराः। तेषां कलाकेल्याः पाथोजवीथीं पद्माकरम्। शेष एव अहीशः पन्नगश्रेष्ठः शेषाहीशः। तस्मिन् विहिता कपटस्वापस्य मुद्रा यया तां विहितकपटस्वापमुद्राम्। कृपार्द्रां सकलसुखदां च॥ २६

"प्रागात्मानं निगमशिरसामन्तरत्यन्तगूढं
बुद्धौ कर्तुं निजपदजुषामब्धिमध्येऽशयिष्ठाः।
भूयोवात्सीरिह[2] सतमसां मादृशां प्राकृताना-
मर्थे स त्वं भुजगशयन श्रीश मह्यं प्रसीद" ॥ २७॥

हे भुजगशन अनन्तशयन श्रीश लक्ष्मीपते सः त्वं मह्यं प्रसीद। कीदृशस्त्वम्। प्राक् पुरा निगमशिरसां उपनिषदां अन्तः अन्तर्भागे अत्यन्तगूढं आत्मानं निजस्वरूपं निजपदजुषां त्वत्पादभक्तानां बुद्धौ कर्तुं तान् अवगम-

१. चेतोवृत्तिभ्रमदलिकेलिपाथोजवीथीम्। २. भूयोवा...रिह.

यितुं अब्धिमध्ये समुद्रमध्ये अशयिष्ठाः। भूयः पुनश्च सतमसां तमोयुक्तानां मादृशां प्राकृतानां अर्थे इह अनन्तपुरक्षेत्रे अवात्सीः। इत्थं नमस्कृत्य इति उत्तरश्लोकेन योजना ॥ २७

इत्थं मूर्ध्ना मुहुरपि नमस्कृत्य भक्त्या महत्या
लब्धानुज्ञस्तदनु करुणाशीतलैस्तत्कटाक्षैः।
गाहेथास्त्वं गगनसरणिं[1] चात्र गारुत्मताश्म-
च्छायाकेशग्रहिलविलसत्पिञ्छतापिञ्छितान्ताम् ॥ २८ ॥

इत्थं पूर्वश्लोकोक्तप्रकारेण मूर्ध्ना मुहुरपि पुनः पुनः महत्या भक्त्या समं नमस्कृत्य तदनु करुणाशीतलैः तत्कटाक्षैः अनन्तशयनस्य विष्णोः कटाक्षैः लब्धानुज्ञः। अनुज्ञां लब्ध्वा इत्यर्थः। त्वं अत्र गगनसरणिं आकाशमार्गं गाहेथाः प्रविश। कीदृशीं गगनसरणिम्। गारुत्मताश्मनः मरकतस्य छायायाः शोभायाः केशग्रहिलः केशग्रहणेन युद्धं कुर्वन् गारुत्मताश्मच्छायाकेशग्रहिलः। मरकतशोभामतिरिच्य वर्तमान इत्यर्थः। तादृशेन विलसता पिञ्छेन बर्हेण तापिञ्छितः तापिञ्छसहितः तमालसहितः कृतः। श्यामलः कृतः इत्यर्थः। अन्तः यस्याः तां गारुत्मताश्मच्छायाकेशग्रहिलविलसत्पिञ्छतापिञ्छितान्ताम् ॥ २८

माणिक्यश्रीबलिमहविधिस्तावदद्यानवद्य-
श्रीभिः स्त्रीभिर्नयनसुभगैः कामिभिश्चाभिरामः।
संसेव्यैनं घटय सुचिरं जन्मसाफल्यमक्ष्णोः
प्रीतः पार्श्वं व्रजसि च ततः श्वः प्रभाते[2] प्रियायाः ॥ २९ ॥

अद्य तावत् माणिक्यश्रीबलिमहविधेः माणिक्यप्रधानस्य रत्नप्रधानस्य। विविधैः रत्नैः उज्ज्वलस्य इति भावः। तादृशस्य श्रीबलिमहस्य विधिः विधानम्। अनवद्या श्रीः यासां ताभिः अनवद्यश्रीभिः स्त्रीभिः। नयनानां सुभगैः प्रीतिदैः कामिभिश्च अभिरामः। प्रवर्तते इति शेषः। एनं बलिमहविधिं संसेव्य अक्ष्णोः जन्मसाफल्यं सुचिरं घटय संपादय। ततश्च

१. गाहेथास्त्वं...सरणिं. २. ततश्च प्रभाते.

प्रीतः श्वः परस्मिन् दिने प्रभाते प्रियायाः मम प्रियायाः पार्श्वं समीपं व्रजसि ! तस्याः समीपं प्राप्तुं प्रतिष्ठेथाः इत्यर्थः ॥ २९

काले तस्मिन् बलिमहनिषेवार्थमाढौकमानान्
नानादिग्भ्यो मनुजनिवहान् भ्रातरध्यक्षयेथाः ।
कल्पान्तोड्डामरशिखिशिखादीर्यमाणेष्विव द्राग्
ब्रह्माण्डेषु प्रबलविसृतान् कारणाम्बुप्रवाहान् ॥ ३० ॥

हे भ्रातः तस्मिन् काले बलिमहोत्सवकाले बलिमहनिषेवार्थं बलिकालोत्सवदर्शनार्थं नानादिग्भ्यः आढौकमानान् आगच्छतः मनुजनिवहान् जनसमूहान् अध्यक्षयेथाः पश्य । कीदृशान् मनुजनिवहान् । ब्रह्माण्डेषु द्राक् कल्पान्ते प्रलयकाले उड्डामराः भयंकराः याः शिखिशिखाः अग्निज्वालाः ताभिः दीर्यमाणेषु सत्सु प्रबलविसृतान् प्रबलं यथा तथा व्याप्तान् कारणाम्बुप्रवाहान् कारणजलस्य प्रलयजलस्य प्रवाहान् इव स्थितानिति शेषः ॥ ३०

अर्कच्छायाप्रतिभट[1]भृशोद्गच्छदच्छाच्छरोचिश्चक्रच्छन्नान्[2] पथि कुरु दृशोरुत्सवार्थान् पदार्थान्[3] ।
तत्रच्छत्रव्यजनसिचयच्छद्मना पद्मनाभं
प्राप्तानासेवितुमिव महामेरुशैलाद्विशालात् ॥ ३१ ॥

तत्र बलिमहे । उत्सवः अर्थः प्रयोजनं येषां तान् उत्सवार्थान् पदार्थान् । उत्सवे उपयुज्यमानान् पदार्थान् इत्यर्थः । दृशोः पथि कुरु आलोकय । कीदृशान् पदार्थान् । अर्कस्य छाया अर्कच्छाया सूर्यप्रकाशः । तस्याः प्रतिभटं प्रतिद्वन्द्वि । अर्कच्छायप्रतिभट इति ह्रस्वो वा । भृशमुद्गच्छत् अच्छाच्छं अत्यन्तशुद्धं च यत् रोचिश्चक्रं तेजोमण्डलं तेन छन्नान् । छत्रं आतपत्रम् । व्यजनं तालवृन्तम् । सिचयः वस्त्रम् । द्वन्द्वसमासः । तेषां छत्रव्यजनसिचयानां छद्मना व्याजेन पद्मनाभं अनन्तपुरस्थं आसेवितुं विशालात् महामेरुशैलात् प्राप्तान् इव स्थितान् इति शेषः ॥ ३१

---

१. अर्कच्छायप्रतिभट. २. छन्नात्. ३. उत्सवार्थात् पदार्थात्.

वेणीभारैस्तिमिरितदिशो वक्त्रपद्मैर्ददाना-
श्चन्द्राद्वैतं मृदुहसरुचा ज्योत्स्निकामादधानाः ।
व्योम्नो भूम्नः कुचभरनतैः कुञ्चितैर्मध्यदेशै-
रातन्वानाः पुरमृगदृशो नेत्रयोः पात्रयेथाः ॥ ३२ ॥

पुरमृगदृशः अनन्तपुरनिवासिनीः वनिताः नेत्रयोः पात्रयेथाः तव चक्षुषोः पात्राणि कुरु । ताः आलोकय । कीदृशीः पुरमृगदृशः । वेणीभारैः केशभारैः तिमिरिताः तमोयुक्ताः कृताः दिशः याभिः ताः । वक्त्रपद्मैः मुखपद्मैः चन्द्राद्वैतं चद्रादभेदं ददाना दिशन्त्यः । चन्द्रद्वैतं इति वा पाठः । चन्द्रस्य द्वित्वं ददानाः इति तावदर्थः । मृदुहसरुचा मन्दहासशोभया ज्योत्स्निकां चन्द्रिकां आदधानाः कुर्वाणाः । कुचभरेण स्तनभरेण नताः कुचभरनताः । तैः अत एव कुञ्चितैः मध्यदेशैः व्योम्नः आकाशस्य भूम्नः अतिशयान् आतन्वानाः ॥ ३२

वक्त्रैरच्छश्रमजलकणै रागिभिश्चाधरोष्ठै-
र्नेत्रैर्नीलाम्बुजदलनिभैः स्फीतबिम्बैर्नितम्बैः ।
गात्रैः पीनस्तनविनमितैश्चारुताम्बूलगर्भै-
र्गण्डाभोगैस्तरलितजनास्तत्र दृश्यास्तरुण्यः ॥ ३३ ॥

तत्र बलिमहे तरुण्यः युवतयः दृश्याः । कीदृश्यः तरुण्यः । तरलिताः तरलतां चञ्चलतां प्रापिताः जनाः याभिः ताः तरलितजनाः । कैः करणैः तरलितजनाः । अच्छाः शुद्धाः श्रमजलकणाः स्वेदबिन्दवः येषु तैः अच्छश्रमजलकणैः वक्त्रैः । रागिभिः रक्तवर्णैः अधरोष्ठैः । नीलाम्बुजदलनिभैः नीलाम्बुजदलसमानैः नेत्रैः । स्फीतं पृथु बिम्बं रूपं येषां तैः स्फीतबिम्बैः नितम्बैः । पीनैः स्तनैः विनमिताः पीनस्तनविनमिताः । तैः गात्रैः । ताम्बूलं गर्भे अन्तर्भागे येषां तैः ताम्बूलगर्भैः गण्डाभोगैः गण्डप्रदेशैः ॥ ३३

तासां भ्रातस्तरणिकिरणस्पर्शतः कर्शितानां
मुक्तास्थूलश्रमजलकणान् गण्डलेखावलम्बान् ।
पक्षोत्थेन स्फुटमपनयन् कोमलेनानिलेन
प्राप्नोषि त्वं प्रणयपिशुनानार्द्रपातानपाङ्गान् ॥ ३४ ॥

हे भ्रातः तरणिकिरणस्पर्शतः सूर्यरश्मिसंपर्कात् कर्शितानां ग्लानानां तासां तरुणीनाम्। गण्डलेखा कपोलदेशः अवलम्बः येषां तान् गण्डलेखावलम्बान्। मुक्ता इव स्थूलान् श्रमजलकणान् स्वेदबिन्दून् मुक्तास्थूलश्रमजलकणान् पक्षोत्थेन स्वकीयपक्षप्रेरितेन कोमलेन अनिलेन स्फुटं निश्शेषं अपनयन् प्रणयपिशुनान् प्रेमसूचकान्। आर्द्रं यथा तथा पातः येषां तान् आर्द्रपातान् अपाङ्गान् तासां कटाक्षान् त्वं प्राप्नोषि लभसे ॥ ३४

हृद्यैर्विद्याधरमृगदृशामुद्यदुत्तालतालै-
र्गीतैश्चेतोहरणचतुरैर्निस्तुषैर्ब्रह्मघोषैः।
वाद्यैश्चोद्वेजितघनघटाडम्बरैरम्बुजाक्षी-
चञ्चत्काञ्चीगुणझणझणैः क्ष्वेलितैः स्फोटितैश्च ॥ ३५ ॥

उद्यन्ति उद्गच्छन्ति उत्तालानि तालानि येषु तैः उद्यदुत्तालतालैः हृद्यैः मनोहरैः विद्याधरमृगदृशां विद्याधरस्त्रीणां गीतैः। चेतोहरणचतुरैः चित्तावर्जनसमर्थैः। निस्तुषैः तुषारहितैः। सारवद्भिः इत्यर्थः। निस्तुलैः इति वा पाठः। साम्यरहितैः ब्रह्मघोषैः वेदपठनघोषैः। उद्वेजितः तर्जितः घनघटानां मेघसमूहानां आडम्बरः यैः तैः उद्वेजितघनघटाडम्बरैः वाद्यैश्च। अम्बुजाक्षीणां सुन्दरीणां चञ्चत्काञ्चीगुणस्य चलन्मेखलादाम्नः झणझणैः क्वणितशब्दैः क्ष्वेलितैः आक्रोशशब्दैः। स्फोटितैः हस्तास्फालनशब्दैः च। उत्तरश्लोके जुष्टः इत्यनेन योजना ॥ ३५

लक्ष्मीजाने जय जय जगत्पालने जागरूक
स्वामिन् नारायण जय जयेत्येवमाबद्धभावैः।
जुष्टः शिष्टैरपि मुनिजनैरुत्सुकैरुत्सवाग्र्यः
सोऽयं साधो भवति भवतः प्रीतये भूतये च ॥ ३६ ॥

हे साधो शिष्टैः सज्जनैः उत्सुकैः मुनिजनैरपि जुष्टः युक्तः सः अयं उत्सवाग्र्यः प्रशस्तः बलिमहः भवतः प्रीतये भूतये च तोषाय ऐश्वर्याय च

---

१ वाद्यैश्चोद्वेजितघनकाडम्बरैः.

भवति। कीदृशैः शिष्टैः। हे लक्ष्मीजाने श्रीपते जय जय। हे जगत्पालने जागरूक स्वामिन् प्रभो नारायण जय जय—इत्येवं आबद्धभावैः आबद्धः भावः भक्तिरूपः यैः तैः। पूर्वश्लोकोक्तैः गीतैरित्यादिभिश्च जुष्टः इति योजनीयम्॥ ३६

शेते लक्ष्मीसुचरितफलं धाम शेषाहितल्पे
यावत् प्रौढो हरिमणिरिव स्थूलमुक्ताकलापे।
भ्रातस्तावत्त्वमपि शिरसा तत्[1] प्रणम्यात्र पुण्ये
क्षेत्रे यत्रक्वचन निवसन् यापयेमां त्रियामाम्॥ ३७॥

लक्ष्म्याः श्रीदेव्याः सुचरितस्य सत्कर्मणः फलं फलभूतं धाम। विष्णुरित्यर्थः। स्थूले मुक्ताकलापे मुक्तानिकरे स्थूलमुक्ताकलापे हरिमणिः इन्द्रनील इव। शेषः अहिः सर्प एव तल्पः शेषाहितल्पः। तस्मिन् शेषाहितल्पे यावत् शेते निद्रां भजति तावत्। ततः पूर्वमेव इत्यर्थः। हे भ्रातः त्वमपि तत् धाम। विष्णुमित्यर्थः। शिरसा प्रणम्य अत्र अस्मिन् पुण्ये क्षेत्रे अनन्तपुरे यत्रक्वचन यत्रकुत्रापि निवसन् इमां त्रियामां रात्रिं यापय गमय॥ ३७

शय्याभोगीश्वर[2]कबलनप्राप्तदारिद्र्यमुद्रा
लक्ष्मीवेणीपरिमलभरोत्तेजितस्फीतिमानः।
वैकुण्ठाङ्घ्रिस्नपनसलिलासङ्गसंजातशैत्याः
प्राभातिक्यः पवनकलिकास्त्वां सखे बोधयेयुः॥ ३८॥

हे सखे प्राभातिक्यः प्रभाते भवाः पवनकलिकाः वायुलेशाः। मन्दमारुता इत्यर्थः। त्वां बोधयेयुः प्रबुद्धं कुर्युः। कीदृश्यः पवनकलिकाः। शय्याभूतस्य भोगीश्वरस्य अनन्तस्य कबलनेन भक्षणेन प्राप्ता दारिद्र्यमुद्रा याभिः ताः शय्याभोगीश्वरकबलनप्राप्तदारिद्र्यमुद्राः। नितरां मन्दीभूताः इति यावत्। लक्ष्म्याः श्रीभगवत्याः वेण्यां केशे यः परिमलभरः तेन उत्तेजितः पूर्वाधिकं प्रकटः कृतः स्फीतिमा वृद्धिः यासां ताः। स्वगतपरिमलस्य वृद्धिरिति भावः।

---

१ तं. २ शम्याभोगीश्वर.

वैकुण्ठस्य विष्णोः अङ्घ्रिस्नपनसलिलस्य पादाभिषेकजलस्य सङ्गात् संपर्कात् जातं शैत्यं यासां ताः ॥ ३८

प्रत्यालीढद्युतिभिरभितस्तारकाणां निकायै-
रिन्दौ मन्दीभवति तमसि क्षीयमाणे क्रमेण ।
प्राच्यक्ष्माभृत्परिवृढतटीकर्णपूरायमाणे[1]
पातङ्गीये महसि पतगाधीश यातुं यतेथाः ॥ ३९ ॥

प्रत्यालीढा प्रत्याहृता द्युतिः शोभा येषां तैः तारकाणां नक्षत्राणां निकायैः समूहैः सह इन्दौ चन्द्रे मन्दीभवति विवर्णे सति । क्रमेण तमसि क्षीयमाणे नश्यमाने सति । पातङ्गीये पतङ्गसंबन्धिनि सूर्यसंबन्धिनि महसि तेजसि प्राच्यस्य पूर्वदिशि स्थितस्य क्ष्माभृत्परिवृढस्य पर्वतश्रेष्ठस्य । उदयगिरेः इत्यर्थः । तस्य या तटी तस्याः कर्णपूरायमाणे । कर्णपूरवत् कर्णाभरणवदाचरतीति कर्णपूरायमाणः । तस्मिन् प्राच्यक्ष्माभृत्परिवृढतटीकर्णपूरायमाणे सति । सूर्ये उदिते सति इति भावः । प्रभाते इति समस्तार्थः । हे पतगाधीश पक्षिश्रेष्ठ यातुं गन्तुं यतेथाः उद्युक्तो भव ॥ ३९

क्लान्तां कान्तप्रविगम[2]रुजा हन्त नीरन्ध्रपातै-
र्नीहारास्रैरुदितरुदितां षट्पदालीप्रणादैः ।
क्षामच्छायां कुवलयवनीं तत्क्षणं वीक्षमाणः
संस्मर्तासि प्रियसख वियोगार्दितायाः प्रियायाः ॥ ४० ॥

हे प्रियसख तत्क्षणं तस्मिन् क्षणे प्रभातसमये । क्षामा क्षीणा छाया शोभा यस्याः तां क्षामच्छायां कुवलयवनीं कुमुदवनं वीक्षमाणः पश्यन् त्वं वियोगार्दितायाः विरहपीडितायाः प्रियायाः । कर्मणि षष्ठी । प्रियाम् । संस्मर्तासि संस्मरिष्यसि । कीदृशीं कुवलयवनीम् । कान्तस्य चन्द्रस्य प्रविगमात् अन्तर्धानात् या रुक् पीडा तया कान्तप्रविगमरुजा क्लान्तां क्षीणाम् । हन्त अहो कष्टम् । नीरन्ध्रपातैः निबिडपातिभिः नीहारास्रैः । नीहारा एव

१. प्राच्यक्षुभ्यत्परिवृढ. २. कान्ताप्रविगम.

अस्राः अश्रुजलानि नीहारास्राः । तैः । षट्पदालीप्रणादैः भ्रमरसमूहस्य स्वनैश्च उदितरुदितां उदितं रुदितं रोदनं यस्याः ताम् ।। ४०

आकृष्याराात्तिमिरवसनं दूरमुद्रिक्तरागे
प्राचीकान्ताकुचगिरितटाश्लेषिणि प्राणनाथे ।
पक्षोदञ्चन्मधुकरमयं पातयन्त्याः कटाक्षं
रूक्षं रोषाद्वदनमरुणं पश्य पङ्केरुहिण्याः ॥ ४१ ॥

उद्रिक्तः प्रवृद्धः रागः रक्तवर्णः अनुरागश्च यस्य तस्मिन् उद्रिक्तरागे । प्राणनाथे सूर्ये आरात् समीपत एत्य तिमिर एव वसनं तिमिरवसनं दूरं आकृष्य सर्वथा अपसार्य प्राची दिक् एव कान्ता प्राचीकान्ता । तस्याः कुच एव गिरिः कुचगिरिः उदयगिरिः । तस्य तटम् । आश्लिष्यते इति आश्लेषी । तस्मिन् आश्लेषिणि आलिङ्गमाने संश्रयमाणे प्राचीकान्ताकुचगिरितटाश्लेषिणि सति । पक्षाभ्यां उदञ्चत् उड्डीयमानः यः मधुकरः तन्मयं पक्षोदञ्चन्मधुकरमयं कटाक्षं रोषात् रूक्षं यथा तथा पातयन्त्याः । रोषात् रूक्षं इति कटाक्षविशेषणं वा । पङ्केरुहिण्याः पद्मिन्याः अरुणं वदनं पश्य ।। ४१

धत्ते यावद्वरुणनगरीमुग्धवामालकानां
रत्नादर्शश्रियमतितरामस्तरोचिर्मृगाङ्कः ।
प्राचीपीनोन्नतकुचतटीहाटकाकल्पकल्पं
तावद्द्रक्ष्यस्यरुणकिरणं बिम्बमम्भोजबन्धोः ।। ४२ ॥

अस्तं नष्टं रोचिः तेजः यस्य सः अस्तरोचिः मृगाङ्कः चन्द्रः वरुणनगर्याः मुग्धा वामालकाः सुन्दर्यः वरुणनगरीमुग्धवामालकाः । तासां रत्नादर्शश्रियं रत्नदर्पणशोभां अतितरां यावत् धत्ते । अस्तोन्मुखो यदा भवति इति भावः । तावत् प्राच्याः पूर्वदिशः पीनः उन्नतश्च यः कुचः तस्य तट्याः तटस्य हाटकाकल्पेन कनकभूषणेन समानं प्राचीपीनोन्नतकुचतटीहाटकाकल्पकल्पं अम्भोजबन्धोः सूर्यस्य बिम्बं त्वं द्रक्ष्यसि । चन्द्रस्य अस्तंगमनात् पूर्वमेव सूर्य उदितो भविष्यति इत्यभिप्रायः ।। ४२

अर्धोन्मीलत्सरसिजवनीसौरभासारचोरो
मुग्धापाङ्गीकुचगिरितटीखेलनोन्निद्रखेदः ।
निर्धून्वानः श्रमजलकणानुद्धते मारयुद्धे
लब्धोन्मेषान्[1] पुरमृगदृशां मन्थरो वाति वायुः ॥ ४३ ॥

मन्थरः वायुः वाति । कीदृशः वायुः । अर्धं ईषत् उन्मीलन्ति विकसन्ति यानि सरसिजानि तेषां या वनी समूहः तस्याः सौरभस्य य आसारः वृष्टिः तस्य चोरः अर्धोन्मीलत्सरसिजवनीसौरभासारचोरः । मुग्धापाङ्गीनां सुन्दरीणां कुचगिरितट्यां स्तनगिरितटे खेलनेन क्रीडया उन्निद्रः उद्भूतः खेदः यस्य सः मुग्धापाङ्गीकुचगिरितटीखेलनोन्निद्रखेदः । उद्धते मारयुद्धे लब्धः उन्मेषः यैः तान् लब्धोन्मेषान् । संजातानित्यर्थः । पुरमृगदृशां पुरसुन्दरीणां श्रमजलकणान् स्वेदजलबिन्दून् निर्धून्वानः अपगमयन् ॥ ४३

तस्मिन्नेव त्वमयि समये दक्षिणोऽप्युत्तराशा-
माशाबन्धाद्द्रढयितुमसूनेणशावेक्षणायाः ।
यायाश्छायाविजितजलदस्तोमनिस्तन्द्रकान्तिः
शान्तश्रान्तिः सुरभिकुसुमोद्गन्धिभिर्गन्धवाहैः ॥ ४४ ॥

अयि भोः । तस्मिन्नेव समये त्वं दक्षिणः अनुकूलः उदारो वा अपि उत्तराशां यायाः गच्छेः । किमर्थम् । एणशावेक्षणायाः सुन्दर्याः मम प्रियायाः असून् प्राणान् आशाया बन्धः आधानं आशाबन्धः । तस्मात् कारणात् द्रढयितुं दृढान् कर्तुम् । कीदृशः त्वम् । छायया शोभया विजिता जलदस्तोमस्य मेघसमूहस्य निस्तन्द्रा प्रबुद्धा कान्तिः येन सः । सुरभिकुसुमैः सुरभिकुसुमसंपर्केण उद्गन्धिभिः सुरभिकुसुमोद्गन्धिभिः गन्धवाहैः मारुतैः शान्ता शमिता श्रान्तिः श्रमः यस्य सः शान्तश्रान्तिः । दक्षिणोऽप्युत्तराशां यायाः इत्यत्र विरोधाभासः ॥ ४४

---

१. लब्धोन्मेषात्.

सान्द्रच्छायैः सकलजगतां सम्मदं संददानै-
राम्रप्रायैरधरितसुरक्ष्मारुहैर्भूरुहौघैः ।
पुष्पोद्गच्छत्परिमलभरैः पूरितान् दिग्विभागान्
लक्षीकुर्वन् मुहुरुपनयेरक्षतां प्रीतिमक्ष्णोः ॥ ४५ ॥

दिग्विभागान् लक्षीकुर्वन् आलोकयन् अक्ष्णोः अक्षतां समग्रां प्रीतिं मुहुः पुनः पुनः उपनयेः संपादयेः । कीदृशान् दिग्विभागान् । सान्द्रा निबिडा छाया अनातपदेशः येषां तैः सान्द्रच्छायैः । सकलजगतां सम्मदं आह्लादं संददानैः दिशद्भिः । आम्रा भूयिष्ठं येषु तैः आम्रप्रायैः । अधरितः न्यक्कृतः सुरक्ष्मारुहः कल्पवृक्षः यैः तैः अधरितसुरक्ष्मारुहैः । तादृशैः भूरुहौघैः वृक्षसमूहैः पूरितान् ॥ ४५

दूरादेव श्रवणपदवीमाविशेद्यास्यतस्ते
नादो रोदोविवरमखिलं पूरयन् वारिराशेः ।
आकर्ण्यैनं नवजलधरव्यूहनिध्वानबुद्ध्या[1]
कर्तुं मा भूर्व्यवसितमना नृत्तलीलां सखे त्वम् ॥ ४६ ॥

यास्यतः गच्छतः ते तव । वारिराशेः समुद्रस्य । अखिलं रोदोविवरं सकलमपि द्यावापृथिव्योः अन्तरालं पूरयन् नादः शब्दः दूरादेव श्रवणपदवीं आविशेत् । गच्छन् त्वं दूरादेव समुद्रस्य तुमुलं शब्दं शृणुयाः इति भावः । एनं शब्दमाकर्ण्य । नवजलधरव्यूहस्य सजलमेघसमूहस्य निध्वानं गर्जनं इति बुद्धिः नवजलधरव्यूहनिध्वानबुद्धिः । तया हेतुना हे सखे नृत्तलीलां कर्तुं व्यवसितमनाः उद्युक्तचित्तः मा भूः ॥ ४६

आलोकेथास्तदनु दलितेन्द्रोपलच्छायकायं
सत्त्वाधारं सततविलसच्छङ्खचक्राभिरामम् ॥
स्वीकुर्वाणं सकलभुवनं स्वोदरे दुर्विगाह्यं
ज्योतिः किंचिद्दधतमुदधिं मूर्तिमन्यां मुरारेः ॥ ४७ ॥

१. निध्वानबु...

तदनु मुरारेः विष्णोः अन्यां मूर्ति उदधिं समुद्रं आलोकेथाः। कीदृशमुदधिम्। दलितस्य इन्द्रोपलस्य इन्द्रनीलस्य छाया शोभा इव छाया यस्य तादृशः कायः यस्य तं दलितेन्द्रोपलच्छायकायम्। इदं विशेषणं समुद्रे मुरारिमूर्त्यां च युज्यते। सत्त्वाधारं समुद्रपक्षे सत्त्वानां जलजन्तूनां आधारं वासस्थानम्। मुरारिमूर्तिपक्षे सत्त्वस्य सत्त्वगुणस्य आधारं अधिष्ठानम्। सततविलसच्छङ्खचक्राभिरामं समुद्रपक्षे सततं विलसतां शङ्खानां चक्रेण समूहेन अभिरामम्। मुरारिमूर्तिपक्षे सततं विलसता शङ्खेन चक्रेण च अभिरामम्। स्वोदरे सकलभुवनं समुद्रपक्षे निखिलजलं मुरारिमूर्तिपक्षे निखिलजगत् स्वीकुर्वाणम्। दुर्विगाह्यं विगाहनाशक्यं अवृष्यं इति समुद्रपक्षे। इयत्तया बोद्धुमशक्यमिति मुरारिमूर्तिपक्षे। किंचिदनिर्वचनीयं ज्योतिः दधत्। बाडवाग्निरूपं ज्योतिरिति समुद्रपक्षे। परमात्मरूपमिति मुरारिमूर्तिपक्षे। एभिश्च विशेषणैः समुद्रस्य मुरारिमूर्त्यन्तरत्वं समर्थितम्॥ ४७

यद्यप्येनं कृशयितुमनाः प्रत्यहं वारिपूरं
वारं वारं गिरति बलवान् बाडवो जातवेदाः।
धत्ते नासौ तदपि लघुतां प्रत्युत ध्वस्तसाम्यं
वर्धिष्णुत्वं प्रथयति परं पश्य गाम्भीर्यमब्धेः॥ ४८॥

एनं समुद्रं कृशयितुमनाः कृशं कर्तुमिच्छन् प्रत्यहं दिने दिने। सर्वदा इत्यर्थः। वारिपूरं जलपूरं बलवान् बाडवः जातवेदाः बाडवाग्निः वारं वारं पुनः पुनः गिरति पिबति यद्यपि तदपि तथापि असौ समुद्रः लघुतां न धत्ते क्षीणो न भवति। प्रत्युत ध्वस्तं नाशितं साम्यं यस्य तत् ध्वस्तसाम्यं वर्धिष्णुत्वं वर्धनशीलत्वं प्रथयति प्रकाशयति। अब्धेः समुद्रस्य गाम्भीर्यं पश्य॥ ४८

फेनश्रेणीहसितसुभगः सँल्लपन्नुल्लसद्भि-
र्हंसीनादैर्मणिगणरुचा कल्पितोदारवेषः।
वीचीदोर्भिर्जलनिधिरयं कामिवृत्त्यानुवेलं
वेलामालोक्य रसभराद्गाढमालिङ्गतीव॥ ४९॥

अयं जलनिधिः समुद्रः अनुवेलं सन्ततं रसभरात् वेलां कूलदेशम्। कामिनां वृत्तिः कामिवृत्तिः। तया वीच्य एव दोष्णः कराः वीचीदोष्णः। तैः गाढं

आलिङ्गति इव । आलोकय पश्य । वेलां इति स्त्रीलिङ्गनिर्देशात् काचन नायिका ध्वन्यते । अतश्च कामिवृत्त्या आलिङ्गति इत्यस्यौचित्यम् । कामिवृत्तिं समर्थयति विशेषणैः । फेनश्रेणी एव यत् हसितं तेन सुभगः फेनश्रेणीहसितसुभगः । उल्लसद्भिः हंसीनादैः । उल्ललद्भिरिति वा पाठः । उद्गच्छाद्भिः । सँल्लपन् सँल्लापं कुर्वन् । मणिगणानां समुद्रे वर्तमानानां रत्नानां समूहानां रुचा कान्त्या मणिगणरुचा कल्पितः उदारवेषः मनोहरवेषः येन सः कल्पितोदारवेषः ॥ ४९

तस्य भ्रातस्त्रिभुवनमहाश्चर्यसर्वस्वधाम्न-
स्तीरं नीरन्ध्रिततरुशतावीतमालम्बमानः[1] ।
मध्येमार्गं जलधिवलयं[2] धाम सोमार्धचूडं
नत्वा स्थानं व्रज मुररिपोर्विश्रुतं वल्कलाख्यम् ॥ ५० ॥

हे भ्रातः त्रिभुवने महान्ति यानि आश्चर्याणि तेषां सर्वस्वस्य धाम आश्रयः त्रिभुवनमहाश्चर्यसर्वस्वधाम । तादृशस्य तस्य समुद्रस्य । नीरन्ध्रः निबिडः कृतः नीरन्ध्रितः । नीरन्ध्रितानां तरूणां वृक्षाणां शतेन । बहुभिर्वृक्षैरित्यर्थः । आवीतं आवृतं नीरन्ध्रिततरुशतावीतं तीरं कूलदेशं आलम्बमानः । तीरदेशेन गच्छन् इत्यर्थः । मार्गस्य मध्ये मध्येमार्गम् । सोमार्धं शशिकला चूडायां यस्य तत् सोमार्धचूडं धाम तेजः । परमेश्वरं इत्यर्थः । नत्वा नमस्कृत्य । कीदृशं धाम । जलधिवलयं जलधिः वलयं यस्य तत् । समुद्रेणावृतमित्यर्थः । तस्य क्षेत्रस्य समन्तात् समुद्रो वर्तते इति भावः । वल्कलं इति आख्या यस्य तत् वल्कलाख्यं विश्रुतं मुररिपोः विष्णोः स्थानं क्षेत्रं व्रज गच्छ ॥ ५०

स्नात्वा तीर्थे भुवनमहिते तत्र लक्ष्मीसहायं ।
धाम श्यामं किमपि शिरसा भक्तिपूर्वं प्रणम्य ।
कोलम्बाख्यां प्रविश नगरीं[3] कूपकक्ष्मापतीनां
न्यक्कुर्वाणां निजसमुदयैः स्वर्गसौभाग्यलक्ष्मीम् ॥ ५१ ॥

---

१. तनुशतावीत. २. जलधिवलग्नं । ३. नगरी Corrected into नगरीं ।

तत्र वल्कलाख्ये क्षेत्रे भुवनमहिते त्रिजगत्यां विश्रुते तीर्थे स्नात्वा लक्ष्म्याः श्रीभगवत्याः सहायं पतिं लक्ष्मीसहायं किमपि अनिर्वचनीयं श्यामं धाम तेजः। विष्णुमित्यर्थः। भक्तिपूर्वं यथा तथा प्रणम्य कूपकक्ष्मापतीनां कूपकवंशीयानां राज्ञां कोलम्बाख्यां कोलम्बः इत्याख्या यस्याः तां नगरीं प्रविश। कीदृशीं नगरीम्। निजसमुदयैः स्वविभवैः स्वर्गसौभाग्यलक्ष्मीं स्वर्गस्य सौभाग्यलक्ष्मीं सौभाग्यसंपत्तिं न्यक्कुर्वाणां अधःकुर्वतीम्॥ ५१

कोऽलं वक्तुं कविरनुपमामृद्धिमित्यर्थशंसः
कोलम्बेति ध्रुवमविकलो यत्र जागर्ति शब्दः।
चक्षुष्मत्सु प्रथमगणनां[1] प्राप्स्यसि प्रेक्षणीयां
लक्ष्मीमस्याश्चिरमनुभवन्[2] दिक्षु विश्रान्तकीर्तेः॥ ५२॥

कः कविः। उपमा यस्या नास्ति सा अनुपमा। तां अनुपमां ऋद्धिं सम्पत्तिम्। अस्या नगर्या इति प्रकृताद्गम्यते। वक्तुं वर्णयितुं अलं समर्थः। न कोऽपि इत्यर्थः। इति एवं अर्थं शंसति इति अर्थशंसः। अर्धशंस इति वा पाठः। इति अस्य वाक्यस्य अर्धं एकदेशं शंसति इति अर्धशंसः। कोलम्ब इति शब्दः। बवयोरभेदात् कोलंव इत्यस्य कोलम्ब इति रूपम्। ध्रुवं निश्चलं यथा तथा अविकलः समग्रः यत्र यस्यां नगर्यां जागर्ति वर्तते। दिक्षु दिगन्तेषु विश्रान्ता कीर्तिः यस्याः सा विश्रान्तकीर्तिः। तस्या विश्रान्तकीर्तेः अस्या नगर्याः प्रेक्षणीयां दर्शनयोग्यां लक्ष्मीं श्रियं चिरमनुभवन् त्वं चक्षुष्मत्सु प्रथम इति गणना प्रथमगणना। तां प्राप्स्यसि॥ ५२

द्रष्टुं पृथ्वीविभवमवतीर्णा किमु स्वर्गलक्ष्मी-
रालोकोत्कैः[3] किमु निजपदादुद्गतो नागलोकः[4]।
आस्ते मूर्ता किमु जनदृशां भाग्यसीमेति मन्ये
सन्देहस्ते मनसि भविता पश्यतोऽस्या विभूतिम्॥ ५३॥

मन्ये अहमेवं तर्कयामि। किमिति। अस्याः विभूतिं सम्पत्तिं पश्यतस्ते मनसि सन्देहः भविता भविष्यति। कीदृशः सन्देहः। स्वर्गलक्ष्मीः पृथ्वीविभवं

---

१ प्रथमगणना. २ अनुभवं. ३. लक्ष्मीमालोकोत्कः ४. नाकलोकः

भूम्याः सम्पदं द्रष्टुं अवतीर्णा किमु। आलोकोत्को दर्शनोत्सुकः। पृथ्वीविभव-मित्यनुषज्यते। नागलोकः पाताललोकः निजपदात् स्वस्थानात् उद्गतः किमु। जनदृशां जनानां चक्षुषां भाग्यसीमा मूर्ता पिण्डीभूता आस्ते किमु। एवं सन्देहः इति योजना॥ ५३

**रत्नश्रेणीकिरणनिकरध्वस्तसान्द्रान्धकारे**
**यत्रादर्शश्रियमतितरां पुष्यतः पुष्पवन्तौ।**
**सम्पत्प्रौढिं[1] परिवृढतमां संप्रपश्यन् यदीयां**
**कम्पं धत्ते कमपि नितरां किम्पचानः कुबेरः॥ ५४॥**

रत्नानां श्रेण्याः समूहस्य यानि किरणानि रश्मयः तेषां निकरेण ध्वस्तः सान्द्रः निबिडः अन्धकारः यस्मिन् तत् रत्नश्रेणीकिरणनिकरध्वस्तसान्द्रान्ध-कारम्। तस्मिन्। यत्र इति अव्ययापेक्षया नपुंसकत्वम्। तादृशे यत्र नगर्यां पुष्पवन्तौ सूर्यचन्द्रौ। "एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ" इत्यमरः। आदर्शश्रियं दर्पणश्रियं अतितरां प्रकर्षेण पुष्यतः वहतः। तमोनिवारणरूपस्य प्रयासस्याभावात् सूर्यचन्द्रौ दर्पणवद्भातः इति भावः। यदीयां परिवृढतमां श्रेष्ठां सम्पत्प्रौढिं संप्रपश्यन् किम्पचानः कृपणः। "कदर्ये कृपणक्षुद्रकिम्प-चानमितंपचाः" इत्यमरः। कुबेरः वैश्रवणः कमपि अनिर्वचनीयं कम्पं धत्ते॥ ५४

**संभूताया जलधिमथने पूर्वमस्या निमित्ते[2]**
**बद्धस्पर्धान् विबुधदितिजान् वीक्ष्य देवत्रिधामा[3]।**
**न्यासीचक्रे किल नरपतौ तामिमां रत्नयोग्ये**
**भ्रातृप्रेम्णा विहितवसतिर्नित्यमत्रैव लक्ष्मीः॥ ५५॥**

जलधिमथने अमृतार्थं समुद्रमथने कृते पूर्वं प्रथमं संभूतायाः अस्याः। श्लोकान्तस्थः लक्ष्मीशब्दः अनेन सर्वनाम्ना परिगृह्यते। लक्ष्म्याः निमित्ते बद्धस्पर्धान् बद्धा स्पर्धा परस्परं संघर्षः यैः तान् विबुधदितिजान् देवान्

---

१. सम्यक्प्रौढिं. २. निमित्तं ३. देवास्त्रिधामा.

असुरांश्च वीक्ष्य देवः त्रिधामा विष्णुः तामिमां लक्ष्मीं रत्नयोग्ये रत्नार्हे नरपतौ कोलम्बमहीपाले न्यासीचक्रे किल न्यासत्वेन निक्षिप्तवान्। किलेति प्रसिद्धौ। लक्ष्मीः अत्रैव कोलम्बनगर्यां भ्रातृप्रेम्णा। भ्रातरि प्रेम भ्रातृप्रेम। तेन भ्रातृप्रेम्णा निमित्तेन। कोलम्बराजानां सोमवंशीयत्वेन सोमस्य लक्ष्म्याश्च समुद्रोत्थत्वेन भ्रातृत्वम्। भ्रातरीव प्रेम भ्रातृप्रेम। तेन इत्येव वा। विहित-वसतिः कृतवसतिः आस्ते इति शेषः॥ ५५

निष्क्रम्यास्याः[1] कथमपि जगल्लोचनानन्दचन्द्र-[2]
प्राचीनाद्रेः प्रचुरविभवान्[3] प्रेक्षमाणः प्रदेशान्[4]।
कच्छे कच्छे कृतविहृतिभिः पत्रिभिस्तत्र तत्र
प्रत्युद्गम्य स्फुटमभिहितस्वागतः सौम्य यायाः॥ ५६॥

अस्याः कोलम्बनगर्याः कथमपि निष्क्रम्य। कीदृश्या नगर्याः। जगतां लोचनानां जनानां नयनानां य आनन्दः स एव चन्द्रः। तस्य प्राचीनाद्रेः उदयपर्वतभूतायाः जगल्लोचनानन्दचन्द्रप्राचीनाद्रेः। पश्यतां जनानां आनन्दकारिण्याः इत्यर्थः। प्रचुराः विभवाः येषु ते प्रचुरविभवाः। तान् प्रदेशान् प्रेक्षमाणः। कच्छे कच्छे प्रतिकच्छं कृता विहृतिः क्रीडा यैः तैः कृतविहृतिभिः पत्रिभिः पक्षिभिः तत्र तत्र प्रत्युद्गम्य स्फुटं विशदं यथा तथा अभिहितं स्वागतं यस्मै सः अभिहितस्वागतः सन् हे सौम्य यायाः गच्छेः॥ ५६

स्थूलस्थूलप्रचुरफलसंभारभग्नोत्तमाङ्ग-[5]
त्वक्क्त्केरक्षितिजनिकराबद्धसान्द्रान्धकाराः।
पृथ्वीकान्तातिलकरचनास्फीतिमानं दधानाः
प्रीतिं दद्युस्तव नयनयोरिङ्गुदीभूविभागाः॥ ५७॥

इङ्गुदीभूविभागाः इङ्गुदीनामको जनपदः तव नयनयोः प्रीतिं आनन्दं दद्युः। कीदृशाः भूविभागाः। स्थूलस्थूलानि नितरां पीनानि प्रचुराणि च

---

१. निष्क्रम्यास्मात्. २. चद्र Corrceted into चन्द्र. ३. प्रचुरविभवात्. ४. प्रदेशात्. ५. लग्नोत्तमाङ्ग.

यानि फलानि तेषां संभारेण प्ररोहेण भग्नानि उत्तमाङ्गानि शिरांसि। अग्रभागा इत्यर्थः। येषां तेषां त्वङ्गतां चलतां केरक्षितिजानां केरवृक्षाणां निकरेण समूहेन आबद्धः निष्पादितः सान्द्रः निबिडः अन्धकारः येषु ताः स्थूलस्थूलप्रचुरफलसंभारभग्नोत्तमाङ्गत्वङ्गत्केरक्षितिजनिकराबद्धसान्द्रान्धकाराः। पृथ्वी भूमिरेव कान्ता युवतिः। तस्याः तिलकरचनायाः स्फीतिमानं दधानाः। भूम्याः तिलकवत् शोभमाना इति भावः॥ ५७

पुण्यैः पुंसां भुवि परिणतः[1] कोऽपि खण्डो दिवोऽसा-
वित्यर्थोक्त्या जगति विदितं कण्टियूराख्यया यत्।
लोकालोकप्रथितमथ तत् पत्तनं दत्तनाना-
लोकालोकोत्सवमनुपमं प्रेक्षणीयं पुरस्ते॥ ५८॥

अथ तत् पत्तनं नगरं ते पुरः अग्रतः प्रेक्षणीयम्। कीदृशं पत्तनम्। कण्टियूर इति आख्या नामधेयं कण्टियूराख्या। तया जगति लोके यत् विदितं प्रख्यातम्। कीदृश्या आख्यया। असौ इदं नगरं पुंसां जनानां पुण्यैः सुकृतैः हेतुभिः भुवि परिणतः अवतीर्णः दिवः स्वर्गस्य कोऽपि खण्डः इति एवं अर्थस्य उक्तिः व्यपदेशः यया तया। अथवा इत्यर्धोक्त्या इति पाठः। पुण्यैः पुंसां भुवि परिणतः कोऽपि खण्डो दिवोऽसौ इत्यस्य अर्धस्य एकदेशस्य खण्डशब्दस्य उक्त्या हेतुना कण्टियूराख्यया जगति विदितं इति तदा अर्थः। खण्डशब्द एव कण्ट इति रूपं भजते इत्याशयेनेदमुक्तम्। लोकालोकपर्वते प्रथितं दिगन्तेष्वपि विश्रुतम्। दत्तः नानालोकानां सकलजनानां आलोकः दर्शनमेव उत्सवः येन तत्। अनुपमं उपमारहितम्॥ ५८

तत्रत्याश्चेत् कुवलयदृशो दर्शनीयाकृतेस्ते
सन्दर्शाय प्रबलविलसत्कौतुकाः[2] संघटेरन्।
तन्नेत्रश्रीतिमिरितपथेनान्तरिक्षेण गन्तुं
पारीणः स्या न खलु कथमप्याशु तस्मात् प्रयायाः॥ ५९॥

---

१. परिणता। २. प्रबलविसरत्कौतुकाः।

तत्रत्याः कण्टियूरनगरवासिन्यः कुवलयदृशः सुन्दर्यः। दर्शनीया मनोहरा आकृतिः यस्य तस्य दर्शनीयाकृतेः ते तव संदर्शाय। प्रबलं यथा तथा विलसत् कौतुकं यासां ताः प्रबलविलसत्कौतुकाः सत्यः संघटेरन् मिलिताः भवेयुः चेत् तर्हि तासां नेत्रश्रिया तिमिरितः तमसा अन्धीभूतः पन्थाः यस्मिन् तेन तन्नेत्रश्रीतिमिरितपथेन अन्तारिक्षेण गन्तुं त्वं न पारीणः समर्थः स्याः खलु। कथमपि महतापि प्रयासेन तस्मात् कण्टियूरपत्तनात् प्रयायाः निर्गच्छेः॥ ५९

नत्वा[1] मध्येसरणि शिरसा तत् प्रचण्डामरारि-
श्रेणीमुण्डावलिकृतमहाकन्दुकक्रीडमोजः[2]।
लक्ष्मीजानेः प्रथितमवनौ वल्लभाख्यं पवित्रं
क्षेत्रं दूरक्षपित[3]दुरितव्रातमध्यक्षयेथाः[4]॥ ६० ॥

मध्येसरणि मार्गमध्ये तत् ओजः तेजः शिरसा नत्वा। कीदृशमोजः। प्रचण्डा ये अमरारयः असुराः तेषां श्रेणी समूहः। तस्याः मुण्डानां कपालानां आवलिः निकरः। तया कृता कन्दुकक्रीडा येन तत् प्रचण्डामरारिश्रेणीमुण्डावलिकृतमहाकन्दुकक्रीडम्। चण्डिकामित्यर्थः। अवनौ भूलोके प्रथितं विश्रुतं वल्लभाख्यं वल्लभमित्याख्या यस्य तत् लक्ष्मीजानेः विष्णोः पवित्रं पुण्यं क्षेत्रं अध्यक्षयेथाः पश्येः। कीदृशं क्षेत्रम्। दूरे क्षपितः नाशितः दुरितानां व्रातः समूहः येन तत्॥ ६०

कर्णायुष्यं क्वचन कमलाकान्तपादाब्जभाजां
शृण्वन् गीतामृतमतिमनोहारि विद्याधरीणाम्।
पश्यन् क्वापि श्रुतिमृगदृशा लालितान् विप्रमुख्यान्
भ्रातस्तिष्ठन् क्षणमिह भवेरग्रणीर्जन्मभाजाम्॥ ६१ ॥

क्वचन एकस्मिन् प्रदेशे कमलाकान्तस्य विष्णोः पादाब्जं भजन्ति सेवन्ते इति कमलाकान्तपादाब्जभाजः। तासां विद्याधरीणाम्। कर्णानां श्रोत्राणां

---

१. नबा. २. मुण्डावलीकृतमहोकन्दुक. ३. दूरं क्षपित. ४. व्रातमद्ध्यक्षयेथा.

आयुष्यं आयुषे हितं कर्णायुष्यम्। श्रोत्राणां आनन्दकरमिति भावः। गीतामृतं अमृतवत् मधुरं गानं शृण्वन्। क्वापि इतरत्र श्रुतिः वेदः एव मृगदृक् सुन्दरी। तया लालितान् विप्रमुख्यान् वेदेषु निपुणान् ब्राह्मणश्रेष्ठान् पश्यन्। हे भ्रातः एवं इह वल्लभाख्ये क्षेत्रे क्षणं तिष्ठन् त्वं जन्मभाजां देहिनां अग्रणीः मुख्यः भवेः॥ ६१

तस्मै कृत्वा भुवनगुरवे भक्तिपूर्वं नमस्यां
तस्माद्भूयः प्रचल परिहार्यैव कालातिपातम्।
त्वार्यः किं वा प्रियसख भवान् प्रायशस्त्वादृशानां
भ्रातृप्रीत्यै व्यवसितधियां[1] को विलम्बप्रसङ्गः॥ ६२॥

तस्मै भुवनगुरवे विष्णवे भक्तिपूर्वं यथा तथा नमस्यां नमस्कारं कृत्वा। तं भक्तिसहितं प्रणम्य इत्यर्थः। कालातिपातं कालस्य अतिपातं विलम्बं परिहाय निरस्य एव। तस्मात् वल्लभाख्यक्षेत्रात् भूयः प्रचल। वा अथवा हे प्रियसख भवान् त्वार्यः त्वरया गमने प्रेरयितव्यः किम्। नैवेत्यर्थः। भ्रातृप्रीत्यै व्यवसितधियां उद्युक्तचेतसां त्वादृशानां सुजनानां कः विलम्बप्रसङ्गः। नैव विलम्बप्रसङ्गो भवति। स्वयमेव त्वरां करिष्यन्ति इति भावः॥ ६२

गच्छन्नेव त्वमथ मधुविध्वंसिनः कौतुकानां
पात्रं क्षेत्रं[2] किमपि मणिकण्ठाभिधानं भजेथाः।
यत्र प्रीतिप्रहसितमुखी पार्वती शैलकन्या[3]
जागर्ति स्म द्विजपरिषदामन्नविश्राणनश्रीः॥ ६३॥

गच्छन्नेव। नातिदूरे इत्यर्थः। कौतुकानां आश्चर्याणां पात्रम्। मणिकण्ठं इत्यभिधानं यस्य तत् मणिकण्ठाभिधानं मधुविध्वंसिनः विष्णोः क्षेत्रं भजेथाः। यत्र क्षेत्रे प्रीत्या संतोषेण हेतुना प्रहसितं मन्दहासयुक्तं मुखं यस्याः सा प्रीतिप्रहसितमुखी। शैलकन्या हिमवत्सुता पार्वती देवी द्विजपरिषदां ब्राह्मणसमूहानाम्। अन्नविश्राणनेन अन्नदानेन श्रीः शोभा यस्याः तथा सती जागर्ति स्म॥ ६३

---

१ व्यवसितरियां... २. पात्रक्षेत्रं. ३. मुखीं पार्वतीं शैलकन्यां.

**आत्ताभोगामधिकमभितः कूलमुल्लासिवल्ली-**
**सार्थोन्मीलन्नवकिसलयच्छायशोणीकृतोर्मिम् ।**
**स्वर्णाम्भोजैः शुभपरिमलैरञ्चितां वञ्चुलाख्या-**
**मर्णोराशिप्रियसहचरीमन्वगुल्लङ्घ्य यायाः ॥ ६४ ॥**

वञ्चुला इति आख्या नाम यस्याः तां वञ्चुलाख्यां अर्णोराशेः समुद्रस्य प्रियसहचरीं अर्णोराशिप्रियसहचरीं नदीं अन्वक् अनुपदं उल्लङ्घ्य यायाः गच्छेः । कीदृशीं अर्णोराशिप्रियसहचरीम् । अधिकं आत्तः प्राप्तः आभोगः पूर्तिः यया तां आत्ताभोगाम् । कूलमभितः उल्लासिन्यः विलसन्त्यः या वल्यः तासां सार्थेषु समूहेषु उन्मीलन्तः उद्गच्छन्तः ये नवकिसलयाः नवपल्लवाः तेषां छायया प्रतिबिम्बेन शोणीकृताः रक्तवर्णाः कृताः ऊर्मयः तरङ्गाः यस्याः तां उल्लासिवल्लीसार्थोन्मीलन्नवकिसलयच्छायशोणीकृतोर्मिम् । शुभपरिमलैः शुभः परिमलः येषां तैः स्वर्णाम्भोजैः अञ्चितां शोभमानाम् ॥ ६४

**नित्यं माध्वीपृषत[1]पुलकालङ्कृताङ्गा विलोल-**
**द्भृङ्गापाङ्गाश्चलकिसलयस्निग्धताम्राधरोष्ठाः ।**
**अभ्यर्णस्थान् विटपिरमणान् गाढमालिङ्गमानाः**
**पुष्यन्त्यक्ष्णोर्मुदमनुपथं बालवल्लीतरुण्यः ॥ ६५ ॥**

अभ्यर्णस्थान् समीपस्थान् विटपिनः वृक्षा एव रमणाः विटपिरमणाः । तान् गाढमालिङ्गमानाः बालवल्यः नवनता एव तरुण्यः बालवल्लीतरुण्यः अनुपथं मार्गे मार्गे अक्ष्णोः तव नयनयोः मुदं आह्लादं पुष्यन्ति वर्धयन्ति । कीदृश्यः बालवल्लीतरुण्यः । नित्यं माध्वी पुष्परसः । तस्याः पृषतानि बिन्दव एव पुलकाः माध्वीपृषतपुलकाः । तैः अलङ्कृतानि अङ्गानि यासां ताः माध्वीपृषतपुलकालङ्कृताङ्गाः । विलोलन्तः चलन्तः भृङ्गा एव अपाङ्गानि यासां ताः विलोलद्भृङ्गापाङ्गाः । चलाः चञ्चलाः किसलयाः पल्लवा एव स्निग्धा मधुराः ताम्रा रक्ताश्च अधरोष्ठा यासां ताः ॥ ६५

1. पृषित.

त्वत्पक्षोद्यत्पवनविचलद्बालवृक्षप्रसून-
भ्राम्यन्मत्तभ्रमरपटलीबद्धकोलाहलानाम् ।
उद्यानानां श्रियमतिथयन् नेत्रयोर्मित्रकृत्यं[2]
कर्तुं क्षिप्रं पत पुनरपि भ्रातराशामुदीचीम् ॥ ६६ ॥

त्वं उद्यानानां श्रियं नेत्रयोः अतिथयन् अतिथिं कुर्वन् । पश्यन् इत्यर्थः । कीदृशानां उद्यानानाम् । त्वत्पक्षाभ्यां उद्यन् यः पवनः तेन विचलन्तः ये बालवृक्षाः तेषां प्रसूनेषु भ्राम्यन्तः मत्ताश्च ये भ्रमराः तेषां या पटली समूहः तया बद्धः कोलाहलः येषु तेषाम् । मित्रकृत्यं मित्रस्य प्रियसखस्य मम कृत्यं साहाय्यं कर्तुं हे भ्रातः क्षिप्रं पुनरपि उदीचीमाशां उत्तरां दिशं पत गच्छ ॥६६

कार्तान्तस्त्रीनयनसलिलासारकालाम्बुवाहं
गात्रस्फूर्तिप्रहसितशरच्चन्द्रसौभाग्यसारम् ।
मार्ताण्डेन्दुज्वलननयनं कीर्तिमद्ग्रामधाम
प्रीत्या धाम प्रणम किमपि प्रार्थितार्थप्रसिद्ध्यै ॥ ६७ ॥

कीर्तिमद्ग्रामो नाम किञ्चन नगरम् । तत् धाम आवासः यस्य तत् किमपि अनिर्वचनीयं धाम तेजः । शिवमयं इति विशेषणैः स्पष्टं भवति । प्रार्थितस्य अर्थस्य प्रसिद्ध्यै प्रणम । कीदृशं धाम । कार्तान्ताः कृतान्तसंबन्धिन्यः यम-संबन्धिन्यः याः स्त्रियः तासां नयनसलिलस्य अश्रुजलस्य यः आसारः वर्षः तस्य कालाम्बुवाहं कृष्णमेघं कार्तान्तस्त्रीनयनसलिलासारकालाम्बुवाहम् । यमस्य वधकरणात् तस्य स्त्रीणां अश्रुपातस्य कारणमिति भावः । गात्रस्य देहस्य स्फूर्त्या प्रहसितः हास्यतां प्रापितः शरच्चन्द्रस्य सौभाग्यसारः येन तत् गात्रस्फूर्तिप्रहसितशरच्चन्द्रसौभाग्यसारम् । मार्ताण्डः सूर्यः । इन्दुः चन्द्रः । ज्वलनः अग्निः च नयनानि यस्य तत् मार्ताण्डेन्दुज्वलननयनम् ॥ ६७

बन्धुस्नेहप्रबलपवनप्रेर्यमाणः प्रयास्यन्
सिन्धुद्वीपं द्विजवर पुनः प्राप्स्यसि प्राज्यशोभम् ।

---

१. त्वं पक्षोद्यत्पवन. २. नेत्रयोर्मीनकृत्यं.

मन्द्रध्वानैर्मदकरिवरैर्मन्दरक्ष्माधराभैः
सन्धत्ते यज्जलधरघटादन्तुरव्योमशङ्काम् ॥ ६८ ॥

बन्धुस्नेह एव प्रबलः यः पवनः तेन प्रेर्यमाणः बन्धुस्नेहप्रबलपवनप्रेर्यमाणः प्रयास्यन् पुनः हे द्विजवर पक्षिश्रेष्ठ प्राज्या बहुला शोभा यस्य तत् प्राज्यशोभं सिन्धुद्वीपं नाम नगरं त्वं प्राप्स्यसि। यत् सिन्धुद्वीपं मन्द्रं गम्भीरं ध्वानं शब्दः येषां तैः मन्द्रध्वानैः। मन्दरक्ष्माधरस्य मन्दरपर्वतस्य आभा शोभा येषां तैः मन्दरक्ष्माधराभैः मदकरिवरैः समदगजश्रेष्ठैः जलधराणां मेघानां घटया समूहेन दन्तुरस्य निम्नोन्नतस्य व्योम्नः आकाशस्य शङ्कां संधत्ते जनयति ॥ ६८

व्याचक्षाणा वदनशशिनः पौर्णमीन्दोरमन्दं[1]
वैलक्षण्यं मनसिजकलाकेलिरङ्गैरपाङ्गैः।
केशच्छायाजितजलमुचः क्लेशयन्त्यो[2]ऽवलग्नान्
भूभृत्कल्पैरुरसिजभरैस्तत्र लक्ष्या मृगाक्ष्यः ॥ ६९ ॥

तत्र सिन्धुद्वीपे मृगाक्ष्यः सुन्दर्यः लक्ष्याः दृश्याः भवेयुः। कीदृश्यः मृगाक्ष्यः। मनसिजकलायाः कामकलायाः केलिरङ्गैः विहारस्थानैः अपाङ्गैः कटाक्षैः करणैः। वदनमेव शशी चन्द्रः वदनशशी। तस्य पौर्णमीन्दोः पौर्णमास्यां यः इन्दुः चन्द्रः पूर्णचन्द्रः। तस्मात् पौर्णमीन्दोः अमन्दं नितरां स्फुटं वैलक्षण्यं व्याचक्षाणाः प्रकाशयन्त्यः। केशच्छायया केशशोभया जिताः जलमुचः मेघाः याभिः ताः। भूभृत्कल्पैः पर्वततुल्यैः उरसिजभरैः स्तनानां भारैः अवलग्नान् मध्यभागान् क्लेशयन्त्यः ॥ ६९

उद्गच्छद्भिस्तमसि विसृते त्वद्गरुद्रश्मि[3]जालै-
र्दध्युस्ताश्चेदभिसृतिविधावुद्यमं मुग्धवध्वः।
अन्वग्यायाः प्रियसख तथैवाप्रियोपान्तमासा-
मानन्दार्द्रो भवतु स जनस्त्वय्यपेताभ्रवर्षे[4] ॥ ७० ॥

---

१. पूर्णमीन्दोरमन्दं। २. क्लेशयन्त्यो। ३. तमसि धमरेत्वद्गतद्रश्मि. ४. वर्षैः

त्वद्रुतां त्वत्पक्षाणां रश्मिजालैः शोभासमूहैः। कृष्णवर्णैरिति भावः। तमसि विसृते सति ताः पूर्वोक्ताः सिन्धुद्वीपनिवासिन्यः मुग्धवध्वः युवत्यः अभिसृतिविधौ अभिसरणकर्मणि उद्यमं उद्योगं दध्युश्चेत् मनसि कुर्युश्चेत्। निशावतारबुद्ध्या इति भावः। हे प्रियसख तथैव पक्षशोभया तमः प्रसारयन्नेव आसां वधूनां आप्रियोपान्तं प्रियानां समीपं अवधीकृत्य। यावत्ताः प्रियसमीपं गच्छेयुः तावदित्यर्थः। अन्वक् पृष्ठतः यायाः। तथा च अपेतः अभ्रवर्षः यस्मात् तस्मिन् अपेताभ्रवर्षे त्वयि विषये। प्रायेण वर्षामेघागमे एव मयूराणां बर्हविसारणेन सह प्रादुर्भावः। इह तु मयूरः आगतः। किन्तु वर्षो न भवति इति आशयः। स जनः वधूजनः। जात्येकवचनम्। आनन्दार्द्रो भवतु। न तु वर्षेण आर्द्रो भवतु इति च गम्यते ॥ ७०

तीरोदञ्चत्तरुपरिलसत्सूननीरन्ध्रनिर्य-
न्माध्वीपूरद्विगुणितमणिच्छेदसच्छायतोयाम्।
मूर्च्छद्वीचीनिवहविहरन्मल्लिकाक्षाभिरामां
फुल्लाम्फुल्लाम्बुरुहसुभगां भ्रातरध्यक्षयेथाः ॥ ७१ ॥

हे भ्रातः फुल्लां नाम नदीं अध्यक्षयेथाः पश्येः। कीदृशीं फुल्लाम्। तीरयोः उदञ्चन्तः उन्नमन्तः ये तरवः तेषु परिलसन्ति विराजमानानि यानि सूनानि पुष्पाणि तेभ्यः नीरन्ध्रं निबिडं यथा तथा निर्यन्ती उद्गच्छन्ती या माध्वी पुष्परसः तस्याः पूरेण द्विगुणितं द्विगुणं कृतं मणिच्छेदेन स्फटिकशकलेन सच्छायं समानशोभायुक्तं च तोयं यस्यां तां तीरोदञ्चत्तरुपरिलसत्सूननीरन्ध्रनिर्यन्माध्वीपूरद्विगुणितमणिच्छेदसच्छायतोयाम्। यत्परिमाणं तोयं तत्परिमाण एव माध्वीपूरः इत्याशयः। मूर्छन्त्यः याः वीच्यः तासां निवहेषु समूहेषु विहरद्भिः मल्लिकाक्षैः हंसैः अभिरामां मूर्च्छद्वीचीनिवहविहरन्मल्लिकाक्षाभिरामाम्। फुल्लैरम्बुरुहैः कमलैः सुभगां फुल्लाम्बुरुहसुभगाम्। ७१

धूमैर्भूमीसुरमखशिखिप्रोद्गतैर्दूरधूम्रं[1]
घ्राणक्षेमंकरमपि परं बिभ्रदामोदभारम्।

1. धूमं।

यत्तीरद्रुप्रसवपुटगं मध्वशक्ता विमोक्तुं
भोक्तुं वापि प्रचलितधियः षट्पदौघा वलन्ते ॥ ७२ ॥

यस्याः फुल्लानद्याः तीरद्रूणां कूलस्थवृक्षाणां ये प्रसवाः पुष्पाणि तेषां पुटं गच्छन्तीति यत्तीरद्रुप्रसवपुटगं मधु विमोक्तुं वा भोक्तुं वा अशक्ताः सन्तः। ततश्च प्रचलितधियः चञ्चलमानसाः षट्पदौघाः भ्रमराणां समूहाः वलन्ते भ्राम्यन्ति। कीदृशं मधु। भूमीसुराणां ब्राह्मणानां ये मखशिखिनः यागाग्नयः तेभ्यः प्रोद्गतैः भूमीसुरमखशिखिप्रोद्गतै धूमैः दूरधूम्रं अत्यधिकं धूमव्याप्तम्। अपि अपि च परं नितरां घ्राणक्षेमंकरं घ्राणेन्द्रियस्य सुखकरं आमोदभारं बिभ्रत्। मधुनः धूम्रत्वं घ्राणक्षेमंकरत्वं आमोदवत्त्वं च यागाग्निधूमसंपर्कात् द्विगुणितम्। धूमव्याप्तत्वेन भोक्तुं अशक्ताः। माधुर्यातिरेकात् विमोक्तुं चाशक्ता इति भावः॥ ७२

तामुत्तीर्य त्वरितगतिमानुत्तराशावलम्बी
लोलम्बालीलुलितलतिकालोभनीयोपशल्यान्।
पश्यन्[1] प्रौढैर्द्विजपरिवृढैः शश्वदध्यास्यमानान्
मध्ये मध्ये पत परिचितब्रह्मघोषान् प्रदेशान्[2] ॥ ७३ ॥

तां फुल्लानदीमुत्तीर्य। त्वरिता गतिः यस्य सः त्वरितगतिमान्। तादृशः सन् उत्तराशां उत्तरदिग्भागं अवलम्बितुं शीलमस्येति उत्तराशावलम्बी मध्ये मध्ये मार्गमध्ये तत्र तत्र। परिचितः अभ्यस्तः ब्रह्मघोषः वेदोच्चारणघोषः येषु तान् परिचितब्रह्मघोषान् प्रदेशान् पश्यन् पत गच्छ। कीदृशान् प्रदेशान्। लोलम्बानां भ्रमराणां आल्या मालया लुलिताभिः मर्दिताभिः लतिकाभिः मनोहरलताभिः लोभनीयं कमनीयं उपशल्यं समीपदेशः येषां तान् लोलम्बालीलुलितलतिकालोभनीयोपशल्यान्। प्रौढैः द्विजपरिवृढैः ब्राह्मणश्रेष्ठैः शश्वत् सदा अध्यास्यमानान्। अतश्च परिचितब्रह्मघोषान् इति योजना॥ ७३

---

१. पश्यत्। २ घोषात् प्रदेशात्।

शास्त्रार्थालोचनचतुरताशालिभिः श्रोत्रियाग्र्यै-
रात्तस्थेमा रविपुरगिरा भाषितो भासुरश्रीः ।
ग्रामः कोऽपि स्फुरति पुरतः पन्नगाधीशपीठं
सामिस्फूर्जत्कमलनयनं यत्र जागर्ति तेजः ॥ ७४ ॥

शास्त्राणां अर्थस्य आलोचने चिन्तायां या चतुरता सामर्थ्यं तया शालन्ते शोभन्ते इति शास्त्रार्थालोचनचतुरताशालिनः । तैः श्रोत्रियाग्र्यैः श्रोत्रियश्रेष्ठैः। आत्तः संपादितः स्थेमा प्रतिष्ठा यस्य सः आत्तस्थेमा । भासुरा श्रीः यस्य स भासुरश्रीः । रविपुरगिरा रविपुरं इति गिरा नामधेयेन भाषितः व्यपदिष्टः कोऽपि ग्रामः पुरतः तव अग्रभागे स्फुरति प्रकाशते । यत्र यस्मिन् ग्रामे पन्नगाधीशः अनन्तः पीठं यस्य तत् पन्नगाधीशपीठम् । सामिस्फूर्जत् ईषद्विकसितं कमलं इव नयनं यस्य तत् सामिस्फूर्जत्कमलनयनं तेजः । विष्णुरित्यर्थः। जागर्ति ॥ ७४

मध्येयुद्धं सुररिपुगणान् दुर्जयांस्तर्जयत्तत्
कीलाकल्पक्षितिमह उपस्थाय[1] भूयोऽपि यास्यन् ।
द्रक्ष्यस्यारादचलतनयाचित्तचन्द्रोपलेन्दो-
र्दिक्षु ख्यातं सकलसुमनःसेवितं धाम शम्भोः ॥ ७५ ॥

मध्येयुद्धं युद्धमध्ये दुर्जयान् सुररिपुगणान् असुरगणान् तर्जयत् पराभवत् । कीलाकल्पक्षितिरिति किंचन सुब्रह्मण्यक्षेत्रम् । तत्रस्थं तत् महः तेजः कीलाकल्पक्षितिमहः । सुब्रह्मण्यमित्यर्थः । उपस्थाय अर्चयित्वा भूयोऽपि पुनरपि यास्यन् । आरात् अदूरे । अचलतनयायाः पार्वत्याः चित्तमेव चन्द्रोपलः चन्द्रकान्तः । तस्य इन्दोः । आनन्ददायकस्येत्यर्थः । शम्भोः शिवस्य दिक्षु ख्यातं विश्रुतं सकलसुमनःसेवितं सकलैः सुमनोभिः देवैः जुष्टं धाम क्षेत्रं द्रक्ष्यसि । तस्मिन् क्षेत्रे त्रयस्त्रिंशदपि देवाः प्रतिष्ठापिता इति भावः॥ ७५

१. मध्येमुरधक्षितिरिपुगणैर्दुर्जयस्तर्जयन्तं कीलाकल्पक्षितिमहमुपस्थाय । ( अस्पष्टोऽयं भागः यथाकथञ्चित् व्याख्यातः । )

मृष्टान्नाप्तिप्रमुदितमहीनिर्जरस्वस्तिवाणी-
लब्धोत्कर्षक्रमसमुदयध्वस्तवित्ताधिपश्रीः ।
सेव्यः काव्यस्वरधिपगुरूपज्ञनीतिज्ञमुख्यो[1]
विख्यातौजा विनयकमलारङ्गभूः शङ्करार्यः ।। ७६ ।।

शङ्करार्यः सेव्यः त्वया उपस्थातव्यः । कीदृशः शङ्करार्यः । मृष्टान्नस्य शुद्धान्नस्य आप्त्या प्रमुदितानां सन्तुष्टानां महीनिर्जराणां ब्राह्मणानां स्वस्तिवाण्या स्वस्तिवाचनेन । अनुग्रहेण इत्यर्थः । लब्धः उत्कर्षः अभिवृद्धिः क्रमसमुदयः क्रमेण सम्यगुदयश्च लब्धोत्कर्षक्रमसमुदयौ । ताभ्यां ध्वस्ता निरस्ता वित्ताधिपस्य वैश्रवणस्य श्रीः येन सः मृष्टान्नाप्तिप्रमुदितमहीनिर्जरस्वस्तिवाणीलब्धोत्कर्षक्रमसमुदयध्वस्तवित्ताधिपश्रीः । लब्धस्य उत्कर्षस्य क्रमेण समुदयः लब्धोत्कर्षक्रमसमुदयः इति वा । काव्यः शुक्रः स्वरधिपगुरुः बृहस्पतिश्च काव्यस्वरधिपगुरू । तदुपज्ञा या नीतिः शुक्रनीतिः बृहस्पतिनीतिश्च । तज्ज्ञानां तन्निपुणानां मध्ये मुख्यः काव्यस्वरधिपगुरूपज्ञनीतिज्ञमुख्यः । विख्यातं विश्रुतं ओजः प्रतापः यस्य सः विख्यातौजाः । विनयकमलायाः विनयश्रियः रङ्गभूः नृत्तरङ्गभूमिः । महता विनयेन युक्त इति यावत् ।। ७६

गम्या सम्यग्यदपि भवतः सौम्य सौम्या दिगस्मा-
दस्मत्प्राणान् कथमपि धृतान् कर्तुमिच्छोस्तथापि[2] ।
नेत्रोत्पत्तेः फलमविकलं प्राप्तुमप्राप्तपूर्वं
गोत्रारातिप्रणयिनि पदं धेहि किञ्चिद्दिगन्ते ।। ७७ ।।

हे सौम्य अस्मत्प्राणान् कथमपि महता प्रयत्नेन धृतान् अविभ्रष्टान् कर्तुं इच्छोः भवतः अस्मात् प्रदेशात् सौम्या सोमसम्बन्धिनी दिक् । उत्तरा दिगित्यर्थः । गम्या तथापि नेत्रोत्पत्तेः नयनयोः जननस्य अविकलं संपूर्णम् । पूर्वं प्राप्तं न भवतीति अप्राप्तपूर्वम् । तादृशं फलं प्राप्तुं गोत्रारातिः इन्द्रः प्रणयी नाथः यस्य तस्मिन् गोत्रारातिप्रणयिनि दिगन्ते । पूर्वस्यां दिशि इत्यर्थः । किंचित् पदं धेहि किञ्चिदिव पूर्वया दिशा गच्छ इत्यर्थः ।। ७७

---

१. गुरूपज्ञनीतिज्ञ मुख्यो. २. धृतां स्नातुमिच्छोस्तथापि.

अग्रे लक्ष्या ललितललनाक्रीडसौधाग्रशृङ्ग-
त्वङ्गत्तुङ्गध्वजपटपरामृष्टताराधिपाङ्का ।
नानानारीनरनिबिडिता सम्पदा निर्धुनाना
धानाधीशीं पुरमपि धरामण्डलीमौलिभूषा ॥ ७८ ॥

अग्रे पूर्वदिग्गतस्य तव पुरोभागे लक्ष्या दृश्या । उत्तरश्लोकस्थेन राजधानी इति पदेन अन्वयः । राजधानी लक्ष्या । कीदृशी राजधानी । ललितानां ललनानां सुन्दरीणां आक्रीडाः क्रीडास्थाननि ये सौधाः तेषां अग्रे त्वङ्गता चलता तुङ्गध्वजपटेन उन्नतध्वजस्य अंशुकेन परामृष्टः संमार्जितः ताराधिपस्य अङ्कः कलङ्कः यस्यां सा ललितललनाक्रीडसौधाग्रशृङ्गत्वङ्गत्तुङ्गध्वजपटपरा-मृष्टताराधिपाङ्का । नानानारीनरैः असंख्येयस्त्रीपुरुषैः निबिडिता संकुला नानानारीनरनिबिडिता । सम्पदा धानाधीशीं धनाधीशसम्बन्धिनीं पुरं वैश्रवणस्य पुरं अलकां निर्धुनाना निराकुर्वती । धरामण्डल्याः भूवलयस्य मौलिभूषा चूडारत्नम् ॥ ७८

पाथोराशिप्रतिमपरिखामण्डलीदुष्प्रधर्षा
वर्षाम्भोदभ्रमकरमहासालजालाभिरामा ।
बल्यक्षोणीपतिकुलभुवां भूभुजां भूतिवाहि-
न्याढ्या[1] साक्षात् सुरपतिपुरीसोदरी राजधानी ॥ ७९ ॥

बल्यक्षोणी नाम जनपदः । बल्यक्षोणीपतीनां कुले ये भवन्ति ते बल्य-क्षोणीपतिकुलभुवः । तेषां भूभुजां राज्ञाम् । भूतिवाहिन्या नाम नद्या आढ्या युक्ता भूतिवाहिन्याढ्या । साक्षात् सुरपतिपुर्याः अमरावत्याः सोदरी । तत्तुल्ये-त्यर्थः । राजधानी अग्रे लक्ष्या इति पूर्वश्लोकेनान्वयः । कीदृशी राजधानी । पाथोराशिप्रतिमाः समुद्रतुल्या याः परिखाः गर्ताः तासां मण्डल्या बलयेन दुष्प्रधर्षा आक्रमणाशक्या पाथोराशिप्रतिमपरिखामण्डलीदुष्प्रधर्षा । वर्षा-म्भोदानां सजलमेघानां भ्रमं कुर्वन्ति इति वर्षाम्भोदभ्रमकराः । तेषां महा-

---

१. न्याख्या.

शालानां महाप्राकाराणां जालेन समूहेन अभिरामा वर्षाम्भोदभ्रमकरमहाशाल-
जालाभिरामा ॥ ७९

गाहस्वैनां गगनसरणेरस्मदीयत्वबुद्ध्या
पश्यन् विश्वाधिकसुभगताशालिनीं तद्विभूतिम् ।
वित्ताधिक्याद्विजितशशभृन्मौलिभिर्विद्वदग्र्यै-
र्व्याप्तोपान्तां कवलितकुबेराभिमानैर्जनैश्च ॥ ८० ॥

गगनसरणेः आकाशमार्गात् एनां राजधानीं अस्मदीयत्वबुद्ध्या इयं अस्मदीया अस्मन्नृपतीनां संबन्धिनी इति बुद्ध्या गाहस्व प्रविश । तत्र अवतर । किं कुर्वन् । विश्वाधिकया सर्वातिरिक्तया सुभगतया शालते इति विश्वाधिकसुभगताशालिनी । तादृशीं तद्विभूतिं तस्याः सम्पत्तिं पश्यन् । कीदृशीं एनां राजधानीम् । वित्ताधिक्यात् । वेत्ति इति वित् विज्ञः । तस्य भावः वित्ता विज्ञता । तस्याः आधिक्यात् विज्ञतातिशयात् । विजितः शशभृन्मौलिः शिवः यैः ते विजितशशभृन्मौलयः । तैः विद्वदग्र्यैः विद्वच्छ्रेष्ठैः । वित्ताधिक्यात् वित्तस्य सम्पदः आधिक्यात् कवलितः कुबेरस्य वैश्रवणस्य अभिमानः यैः तैः जनैश्च व्याप्तः उपान्तः समीपदेशः यस्याः ताम् ॥ ८०

माध्वीमाद्यद्भणितिलहरीभर्त्सितस्वःसरिद्भिः
स्वच्छन्दाध्यासितमणितलं कुत्रचित् सत्कवीन्द्रैः ।
क्वाप्यन्यत्र श्रुतिसुखकरोदारगीताभिरामं
क्वापि प्रोद्यत्सुभटनिवहप्रस्तुतप्रौढवादम् ॥ ८१ ॥

कुत्रचित् एकस्मिन् भागे माध्वी इव माद्यन्तीनां मदयन्तीनां भणितीनां लहरीभिः तरङ्गैः भर्त्सिता न्यक्कृता स्वःसरित् आकाशगङ्गा यैः तैः माध्वीमाद्यद्भणितिलहरीभर्त्सितस्वःसरिद्भिः सत्कवीन्द्रैः प्रशस्तकविश्रेष्ठैः । स्वच्छन्दं यथा तथा अध्यासितं मणितलं यस्य तत् स्वच्छन्दाध्यासितमणितलम् । अन्यत्र क्वापि इतरस्मिन् भागे श्रुतेः श्रवणस्य सुखकरेण उदारेण च गीतेन अभिरामं मनोहरं श्रुतिसुखकरोदारगीताभिरामम् । क्वापि अन्यत्र भागे प्रोद्यतां उद्ग-

तानां सुभटानां योधानां निवहेन समूहेन प्रस्तुतः प्रक्रान्तः प्रौढवादः यस्मिन् तत् प्रोद्यत्सुभटनिवहप्रस्तुतप्रौढवादम् । एतानि विशेषणानि उत्तरश्लोके आस्थानं इत्यत्र योजनीयानि ॥ ८१

मूर्च्छद्बन्दिव्रजनुतिवचोमांसलाशान्तरालं
क्वापि क्वापि प्रणमदवनीपावलीपूरिताशम् ।
उद्दण्डाज्ञापिशुनवचनोद्रिक्तवेत्रिप्रपञ्चं
मध्ये तस्या मघवत इवास्थानमध्यक्षयेथाः ॥ ८२ ॥

तस्या राजधान्या मध्ये मघवतः इव इन्द्रस्य सभा इव आस्थानं राजसभां अध्यक्षयेथाः अवलोकय। कीदृशं आस्थानम्। क्वापि मूर्च्छता अत्युच्चं प्रसरता बन्दिव्रजस्य वैतालिकसमूहस्य नुतिवचसा स्तुतिपाठेन मांसलं पूरितं आशान्तरालं दिगन्तर्भागः यस्मिन् तत् मूर्च्छद्बन्दिव्रजनुतिवचोमांसलाशान्तरालम्। क्वापि प्रणमतां प्रणामं कुर्वतां अवनीपानां राज्ञां आवल्या समूहेन पूरिताः आशाः दिशः यस्मिन् तत् प्रणमदवनीपावलीपूरिताशम्। उद्दण्डायाः महता दण्डेन युक्तायाः। अननुसरणे फलत्वेन इति यावत्। आज्ञायाः। नृपस्येति शेषः। पिशुनं सूचकं यत् वचनं तेन उद्रिक्तानां उद्धतानां वेत्रिणां रक्षिपुरुषाणां प्रपञ्चः समूहः यस्मिन् तत् उद्दण्डाज्ञापिशुनवचनोद्रिक्तवेत्रिप्रपञ्चम्॥८२

उद्दण्डाख्यः सुरभिकवितासागरेन्दुः कवीन्द्र-
स्तुण्डीरक्ष्मावलयतिलकस्तत्र चेत् सन्निधत्ते ।
श्राव्यामुष्य त्रिदशतटिनीवेगवैलक्ष्यदोग्ध्री
वाग्धाटी सा विजितदरसंफुल्लमल्लीमधूली ॥ ८३ ॥

सुरभिकविता मधुरकविता एव यः सागरः तस्य इन्दुः चन्द्रः। वर्धक इति यावत्। तुण्डीरक्ष्मावलयस्य तुण्डीरनाम्नः जनपदस्य तिलकः अलङ्कारभूतः। उद्दण्डाख्यः उद्दण्डनामा कवीन्द्रः कविश्रेष्ठः तत्र तस्मिन् आस्थाने सन्निधत्ते चेत् यदि सन्निहितो भवेत् तर्हि अमुष्य उद्दण्डस्य सा प्रसिद्धा वाग्धाटी वचसः प्रौढा गतिः त्वया श्राव्या। कीदृशी वाग्धाटी। त्रिदशतटिन्याः आकाशगङ्गायाः वेगस्य वैलक्ष्यं लज्जां दोग्धि इति त्रिदशतटिनी-

वेगवैलक्ष्यदोग्ध्री । विजिता अधःकृता दरसंफुल्लायाः ईषद्विकसितायाः मल्याः मल्लीपुष्पस्य मधूली मधु यया सा विजितदरसंफुल्लमल्लीमधूली ॥ ८३

स्थानं चण्डीपतिनिटिलदृक्कुण्डचण्डाग्निरोचि-
र्मूर्तेः स्फूर्तेरभिनवकुरुम्बाख्यमालक्ष्यमग्रे ।
गत्वा तत्र द्विजपरिषदामन्नदानोत्सवान्ते
पादाम्भोजं विनम विपदां खण्डनं चण्डिकायाः ॥ ८४ ॥

चण्डीपतिः शिवः । तस्य निटिलदृक् फालनेत्रं एव कुण्डः । तस्मिन् यः चण्डाग्निः तस्य रोचिर्मूर्तेः तेजःपिण्डरूपस्य चण्डीपतिनिटिलदृक्कुण्डचण्डाग्निरोचिर्मूर्तेः स्फूर्तेः वृद्धेः । कालीदेव्याः इत्यर्थः । स्थानं क्षेत्रम् । अग्रे तव पुरतः आलक्ष्यम् । कीदृशं स्थानम् । अभिनवकुरम्बं इत्याख्या यस्य तत् अभिनवकुरुम्बाख्यम् । तत्र तस्मिन् क्षेत्रे गत्वा द्विजपरिषदां ब्राह्मणसमूहानां अन्नदानमेव य उत्सवः तस्यान्ते अन्नदानोत्सवान्ते विपदां आपदां खण्डनं नाशकं चण्डिकायाः पादाम्भोजं विनम सेवस्व ॥ ८४

गच्छन्नालोकय जनदृशां वल्लभं बल्यपृथ्वी-
खण्डं खण्डप्रकृतिलतिकामण्डिताशावकाशम् ।
माधुर्यश्रीरधिवसति यं विश्वलोकोपभोग्यं
नित्यं त्यक्तत्रिदशनियतास्वादपीयूषवृत्तिः ॥ ८५ ॥

गच्छन् तस्या राजधान्याः पुरः प्रचलन् जनदृशां जनानां नयनानां वल्लभं आनन्दप्रदं बल्यपृथ्वीखण्डं बल्यनामकं जनपदं आलोकय । कीदृशं बल्यपृथ्वीखण्डम् । खण्डः इक्षुविकारः । खण्डप्रकृतिः इक्षुः । खण्डप्रकृतिभिः इक्षुभिः लतिकाभिश्च मण्डितः अलंकृतः आशावकाशः दिगन्तरालं यस्मिन् तत् खण्डप्रकृतिलतिकामण्डिताशावकाशम् । खण्डप्रकृतीनां इक्षूणां लतिकाभिः इति वा । विश्वलोकोपभोग्यं विश्वैः लोकैः जनैः उपभोग्यं यं बल्यपृथ्वीखण्डं माधुर्यश्रीः नित्यं अधिवसति । कीदृशी सती । त्यक्ता उपेक्षिता

१. कुरुबाख्य corrcted into कुरुम्बाख्य. २. परिषदामम्र.

त्रिदशैः देवैः नियतास्वादभूते नित्यं तेषां उपभोगभूते पीयूषे अमृते विषये वृत्तिः चेष्टा यया हेतुना सा त्यक्तत्रिदशनियतास्वादपीयूषवृत्तिः ॥ ८५

चूर्णां पश्येस्तदनु[1] तटिनीं तूर्णमेव प्रयास्यन्[2]
पूर्णां स्वर्णाम्बुरुहरजसा घूर्णमानैः प्रवाहैः ।
मार्जालीभिर्मलिनितशरच्चन्द्रभाभिः प्रभाभिः
कीर्णाभिर्या घटयति मुहुः स्वर्धुनीसङ्गशङ्काम् ॥ ८६ ॥

तदनु वल्यक्षोणीदर्शनानन्तरं तूर्णमेव वेगेनैव प्रयास्यन् गच्छन् चूर्णीं नाम तटिनीं नदीं पश्येः । कीदृशीं तटिनीम् । स्वर्णाम्बुरुहाणां सुवर्णपङ्कजानां रजसा स्वर्णाम्बुरुहरजसा घूर्णमानैः व्याप्तैः प्रवाहैः तरङ्गैः पूर्णाम् । प्रभाभिः शोभाभिः करणैः मलिनिता मलिना कृता शरच्चन्द्रस्य भाः दीप्तिः याभिः ताभिः मलिनितशरच्चन्द्रभाभिः । कीर्णाभिः स्त्रीणां स्नानवेलासु विसृताभिः मार्जालीभिः मार्जालीयैः शरीरशोधनद्रव्यैः । " मार्जालीयः शूद्रबिडालयोः । शरीरशोधने " इति हेमचन्द्रः । मुहुः पुनः पुनः या तटिनी स्वर्धुनीसङ्गस्य आकाशगङ्गासंयोगस्य शङ्कां घटयति निष्पादयति । चूर्णीनदी चन्द्रशुभ्रैः स्त्रीणां स्नानवेलासु विसृतैः शोधनद्रव्यैः गङ्गासंयुक्ता इव भाति इत्यर्थः ॥ ८६

कल्लोलालीतरलकुरलामुल्ललत्फेनहासां
फुल्लाम्भोजस्फुरितवदनामुल्लसन्मङ्गनेत्राम् ।
सल्लापाढ्यां विहगविरुतैः संगतां स्वोपशल्ये[3]
कल्याणीं तां कथमिव[4] भवान् काममुल्लङ्घ्य याता ॥ ८७ ॥

भवान् स्वोपशल्ये निजसमीपे सङ्गतां तां कल्याणीं पुण्यां चूर्णीनदीं कथमिव कामं सम्यक् उल्लङ्घ्य याता यास्यति । तथा गमनं तव दुःशकमेवेत्यर्थः । तां कल्याणीं इत्यनेन काचन उत्तमा नायिका च सूचिता । कीदृशीं कल्याणीम् । कल्लोलानां तरङ्गाणां आली समूह एव तरलाः चञ्चलाः कुरलाः अलकाः यस्याः तां कल्लोलालीतरलकुरलाम् । उल्ललन् विलसन् फेन एव हासः

---

१. चूर्णां पश्येत्तदनु. २. प्रयास्यत्. ३. सोपशल्यं. ४. कथमपि.

यस्याः तां उल्लसत्फेनहासाम्। फुल्लाम्भोजं विकसितकमलं एव स्फुरितं द्योतमानं वदनं यस्याः तां फुल्लाम्भोजस्फुरितवदनाम्। उल्लसत् भ्रमन् भृङ्ग एव नेत्रं यस्याः तां उल्लसद्भृङ्गनेत्राम्। विहगविरुतैः पक्षिणां कूजितैः करणैः सल्लापाढ्यां प्रशस्तसल्लापवतीम्॥ ८७

मुक्ताजालं सलिलजठरे बिभ्रतीं क्वापि ताम्रां
स्वच्छं मुक्तामयमिव जलं या वहन्ती हसन्ती।
चूर्णीचर्कर्त्यखिलतटिनीगर्वसर्वस्वमेषे-
त्यार्याश्चूर्णीत्यखिलविदितं नाम यस्या गृणन्ति॥ ८८॥

या चूर्णीनदी स्वच्छं शुभ्रं अत एव मुक्तामयमिव स्थितं जलं वहन्ती ताम्रां ताम्रपर्णी नदीं हसन्ती परिहसन्ती अधिक्षिपन्ती वर्तते। अधिक्षेपहेतुं विशेषणेन स्पष्टं करोति। सलिलजठरे सलिलान्तर्भागे क्वापि अल्पीयस्येव भागे मुक्ताजालं बिभ्रतीम्। एषा नदी अखिलतटिनीनां गर्वसर्वस्वं समस्तं गर्वं चूर्णीचर्कर्ति पुनः पुनः चूर्णं करोति नाशयति। ताम्रपर्णीधिक्कारेणेति भावः। इति हेतोः आर्याः यस्याः नद्याः चूर्णी इति अखिलविदितं सर्वस्मिन् जगति प्रसिद्धं नाम गृणन्ति वदन्ति। या च यस्याः इति च द्वयं तां कल्याणीं इति पूर्वश्लोके योजनीयम्॥ ८८

पातालान्तःस्पृशि नवमणिच्छेदनैर्मल्यशालि-
न्यस्यास्तोये विशति भवति स्वप्रतिच्छाययुक्त्या।
तार्क्ष्यः साक्षादयमिति समुत्पन्नशङ्का भुजङ्गाः
शङ्के त्रासादिह तत इतो वेपमाना वलेरन्॥ ८९॥

पातालस्य अन्तः अन्तर्भागं स्पृशति इति पातालान्तःस्पृक्। तस्मिन्। अत्यन्तमगाधे इत्यर्थः। नवमणिच्छेदस्य सद्यो विदारितस्य स्फटिकमणिखण्डस्य नैर्मल्येन शालते इति नवमणिच्छेदनैर्मल्यशालि। तस्मिन् तस्या नद्याः तोये स्वप्रतिच्छाययुक्त्या स्वप्रतिबिम्बस्य युक्त्या भवति विशति सति।

१. चूर्णीचक्रत्याखिल. २. चूर्णोत्याखिल.

अयं साक्षात् तार्क्ष्यः गरुडः इति एवं समुत्पन्ना शङ्का येषां ते समुत्पन्नशङ्काः भुजङ्गाः। पातालस्थाः नागा इत्यर्थः। त्रासात् भयात् हेतोः इह पाताले वेपमानाः कम्पमानाः तत इतः वलेरन्। एवं अहं शङ्के ॥ ८९

उत्तीर्यैनामथ विश पुरीं केरलाधीश्वराणां
ख्यातां[1] माहोदयपुरगिरा क्षिप्तवस्वौकसाराम्[2]।
यस्याः स्थेम्ने ललितगिरिजाकोमलापाङ्गभङ्गी-
भृङ्गीपङ्केरुहमधिवसत्यञ्जनाक्षेत्रमोजः ॥ ९० ॥

एनां चूर्णीनदीमुत्तीर्य केरलाधीश्वराणां केरलचक्रवर्तिनाम्। माहोदयपुरं इति गीः नाम माहोदयपुरगीः। तया ख्यातां पुरीं विश। कीदृशीं पुरीम्। क्षिप्ता न्यक्कृता वस्वौकसारा अमरावती अलका वा यया सा क्षिप्तवस्वौकसारा। ताम्। "वस्वौकसारा त्विन्द्रस्य धनदस्य च। पुरीनलिन्यौ" इति हेमचन्द्रः। "वस्वोकसारेन्द्रपुरे कुबेरनलिनीपुरोः" इति मेदिनी। यस्याः पुर्याः स्थेम्ने प्रतिष्ठायै ललितायाः गिरिजायाः कोमलः मनोहरः अपाङ्गः कटाक्षः। तस्य भङ्गी एव या भृङ्गी तस्याः पङ्केरुहं पद्मम्। तादृशं ओजः तेजः। शिव इत्यर्थः। अञ्जनाक्षेत्रं अञ्जनानामकं क्षेत्रं अधिवसति ॥ ९०

आच्छिद्यास्मच्चिकुरसुषमामाशु धावन्न तावन्[3]
मोक्तव्योऽसाविति धृतरुषां[4] तत्र मुग्धेक्षणानाम्।
यावन्नाक्ष्णोर्विशसि विषयं तावदेव त्वरावा-
नस्मात् पत्रिप्रवर पुरतः क्षिप्रमेव प्रयायाः ॥ ९१ ॥

तत्र माहोदयपुर्याम्। मुग्धेक्षणानां सुन्दरीणां अक्ष्णोः विषयं यावत् न विशसि तावदेव। कीदृशीनां मुग्धेक्षणानाम्। अस्मच्चिकुरसुषमां अस्माकं केशानां श्रियं आच्छिद्य बलादपहृत्य आशु शीघ्रं धावन् असौ न मोक्तव्यः इति एवं धृता रुट् कोपः याभिः तासां धृतरुषाम्। रोषवतीभिस्ताभिर्यथा त्वं न दृश्यसे तथा ताः परिहृत्य इति भावः। हे पत्रिप्रवर पक्षिश्रेष्ठ त्वरावान् वेगवान् अस्मात् पुरतः माहोदयपुर्याः क्षिप्रमेव प्रयायाः ॥ ९१

---

१. ख्याता. २. क्षिप्तवः...कसाराम्। ३. आच्छिदास्माच्चिकुर. ४. धृतरुषा.

अग्रे क्षेत्रं किमपि जगतामेकमाश्चर्यपात्रं
गच्छन्नक्ष्णोः पथि कुरु कुरुम्बाभिधानं[1] भवान्याः ।
नित्यप्रह्वाः फलभरमिषाद्भक्तिभारं वहन्तो
यस्मिन् वृक्षा अपि परिचितध्यानमुद्राः प्रथन्ते ॥ ९२ ॥

गच्छन् पुरतो गच्छन् अग्रे अग्रभागे जगतां एकं अद्वितीयं आश्चर्यपात्रं भवान्याः कुरुम्बाभिधानं कुरुम्बाख्यं किमपि क्षेत्रं अक्ष्णोः पथि कुरु आलोकय । यस्मिन् क्षेत्रे वृक्षा अपि फलभरमिषात् फलभरव्याजेन भक्तिभारं वहन्तः अत एव नित्यप्रह्वाः सर्वदा नम्राः । परिचिता अभ्यस्ता ध्यानमुद्रा यैः ते परिचितध्यानमुद्राः । तथाभूताः प्रथन्ते । वृक्षाणामप्येवं भक्तिः । किमु तत्रत्यानां जनानामिति भावः ॥ ९२

आरादालोकय च गुणकां तां पुरीवारकान्ता-
नेत्रच्छायैर्नवकुवलयाद्वैतमाम्रेडयन्तीम् ।
यस्यां भस्मीकृतमनसिजं धाम वामार्धखेल-
द्गौरीकेशभ्रमदलिवधूसङ्कुलं सन्निधत्ते ॥ ९३ ॥

आरात् समीपे तां प्रसिद्धां गुणकां नाम नगरीं च आलोकय । कीदृशीं गुणकाम् । पुरीवारकान्तानां पुरीवारयोषितां नेत्रच्छायैः नेत्रशोभाभिः नवकुवलयाद्वैतं नवकुवलयानां अभेदं आम्रेडयन्तीम् । यस्यां गुणकायां भस्मीकृतः दग्धः मनसिजः कामः येन तत् भस्मीकृतमनसिजम् । वामार्धे वामभागे खेलन्त्याः क्रीडन्त्याः तुष्टया वसन्त्याः गौर्याः केशेषु भ्रमन्तीभिः अलिवधूभिः भ्रमरीभिः सङ्कुलं वामार्धखेलद्गौरीकेशभ्रमदलिवधूसङ्कुलं धाम । शिवः इत्यर्थः । सन्निधत्ते सन्निहितं भवति ॥ ९३

शृङ्गारार्द्राः श्रुतिसुखकरोदारवक्रोक्तिभङ्गी-
वैदग्ध्यानन्दितजनधियो वीतदोषानुषङ्गाः ।
सालङ्काराः सुललितपदाः सङ्गताः सद्गुणौघैः
प्रौढश्लाघ्याः कविशुकगिरो यां सदैव श्रयन्ते ॥ ९४ ॥

---

१. कुरुबाभिधानं corrected into कुरुम्बाभिधानम् । २. पुरीवारकान्तां.

कवयश्च शुकगिरः मञ्जुवाचः सुन्दर्यश्च कविशुकगिरः यां गुणकां सदैव श्रयन्ते अधिवसन्ति । कीदृश्यः कविशुकगिरः । शृङ्गारेण आर्द्राः शृङ्गारार्द्राः। श्रुतीनां सुखकारिण्यः उदाराश्च या वक्रोक्तयः तासां भङ्ग्यां यत् वैदग्ध्यं तेन आनन्दिताः जनानां धियः मनांसि याभिः ताः श्रुतिसुखकरोदारवक्रोक्तिभङ्गी-वैदग्ध्यानन्दितजनधियः । वीतः अपेतः दोषाणां काव्यदोषाणां नायिका-दोषाणां च अनुषङ्गः याभ्यः ताः वीतदोषानुषङ्गाः । अलङ्कारैः उपमादिभिः आभरणैश्च सहिताः सालङ्काराः । सुललितं पदं वाक्यावयवः पादविन्यासश्च यासां ताः सुललितपदाः । सद्गुणौघैः प्रसादादीनां नायिकागुणानां च ओघैः समूहैः सङ्गताः । प्रौढाः श्लाघ्याश्च प्रौढश्लाघ्याः ॥ ९४

कीर्णः श्लाघ्यैः श्रुतिजलनिधेः कर्णधारैर्द्विजेन्द्रै-
र्ग्रामः कोऽपि द्विजवर पुरः सङ्गमाख्यो विभाति ।
अश्रान्तोद्यन्मखशिखिसमुद्गत्वरैर्यत्र धूमै-
र्गाढोदञ्चज्जलधरधियो[1] राजहंसाः सशङ्काः ॥ ९५ ॥

हे द्विजवर पक्षिश्रेष्ठ । श्रुतिः वेद एव जलनिधिः समुद्रः श्रुतिजलनिधिः । तस्य कर्णधारैः नाविकैः । अनायासेन श्रुतिपारङ्गतैरित्यर्थः । द्विजेन्द्रैः ब्राह्मणश्रेष्ठैः कीर्णः पूर्णः सङ्गमाख्यः सङ्गमनामधेयः कोऽपि ग्रामः पुरः अग्रतः विभाति । यत्र सङ्गमग्रामे अश्रान्तं अनवरतं उद्यन् ज्वलन् यः मखशिखी यागाग्निः तस्मात् समुद्गत्वरैः सम्यगुद्गच्छद्भिः अश्रान्तोद्यन्मखशिखिसमुद्गत्वरैः धूमैः । गाढं दृढं उदञ्चन्ती जलधरधीः मेघभ्रान्तिः येषां ते गाढोदञ्चज्जल-धरधियः राजहंसाः सशङ्काः भवन्ति । वर्षाकालशङ्का तेषां सर्वदा जायते इति भावः ॥ ९५

तस्मिन् दृश्या दुरितपटलीलोपिनी सा कुलीपि-
न्याख्या वापी कुसुमिततरौ कूलदेशे यदीये ।
हस्ताम्भोजैर्दधदरिगदे शङ्खमप्यक्षमाला-
मास्ते वास्तोष्पतिमणिसहाध्यासितं[2] धाम किञ्चित् ॥ ९६ ॥

---

१. धूमैर्गाढोदञ्च. २. सहाध्यायितं.

तस्मिन् सङ्गमग्रामे दुरितपटलीनां पापसमूहानां लोपिनी नाशनी दुरितपटलीलोपिनी सा प्रसिद्धा कुलीपिन्याख्या कुलीपिनी नाम वापी दृश्या। यदीये यस्याः वाप्याः। कुसुमिताः पुष्पवन्तः तरवः यस्मिन् तस्मिन् कुसुमिततरौ कूलदेशे किञ्चित् अनिर्वचनीयं धाम तेजः आस्ते वर्तते। कीदृशं धाम। हस्ताम्भोजैः कमलसदृशैः करैः अरिं चक्रं च गदां च अरिगदे। शङ्खं अक्षमालामपि दधत्। वास्तोष्पतिमणिना इन्द्रनीलेन सह अध्यासितं वास्तोष्पतिमणिसहाध्यासितम्। इन्द्रनीलसदृशं इत्यर्थः। विष्णुमयं तेजः इति फलितोऽर्थः॥९६

पश्यन्नेनं सजलजलदाशङ्कया शार्ङ्गपाणिं
तस्योपान्ते यदि सुमधुरं ताण्डवं प्रारभेथाः।
आनन्दाश्रुस्नपितकमलापाङ्गशृङ्गारितानां
पात्रं भूयाः सुचरितनिधे तत्स्मिताङ्कुरभासाम्॥ ९७॥

एनं शार्ङ्गपाणिं पश्यन्। सजलजलदः सजलमेघः इति आशङ्कया सजलजलदाशङ्कया तस्य उपान्ते समीपे सुमधुरं ताण्डवं नृत्तं यदि प्रारभेथाः। मेघदर्शने हि मयूरा नृत्यन्ति इति प्रसिद्धम्। तर्हि आनन्दाश्रुभिः स्नपितेन सिक्तेन कमलायाः श्रीभगवत्याः अपाङ्गेन कारणेन। शृङ्गार एषां संजातः इति शृङ्गारिताः। शृङ्गारितानां तस्य विष्णोः स्मिताङ्कुरभासां मन्दहासोद्गमशोभानां हे सुचरितनिधे सुचरितानां सत्कर्मणां आश्रयभूत त्वं पात्रं भूयाः॥ ९७

मूर्ध्ना मूर्ध्नो निगमवचसां वेद्यभूम्ने त्रिधाम्ने[१]
कृत्वा तस्मै प्रणमनविधिं भक्तिविश्वासहृद्यम्।
पश्यन् पश्यन् पत गृहशुकाभ्यस्तसाङ्गत्रिवेदी-
मूर्च्छत्कोलाहलबधिरिताशानि देशान्तराणि॥ ९८॥

निगमवचसां मूर्ध्ना वेदान्तेन वेद्यः भूमा महिमा यस्य तस्मै वेद्यभूम्ने तस्मै त्रिधाम्ने विष्णवे मूर्ध्ना शिरसा भक्त्या विश्वासेन च हृद्यं हृदयङ्गमं भक्तिविश्वासहृद्यम्। प्रणमनविधिं प्रणमनरूपं विधिं नमस्कारं कृत्वा। तं नम-

१. वेद्यभूम्नेति धाम्ने.

स्कृत्य इत्यर्थः। देशान्तराणि पश्यन् पश्यन् पत गच्छ। कीदृशानि देशान्तराणि। गृहशुकैः अभ्यस्ता या साङ्गा षडङ्गसहिता त्रिवेदी त्रयाणां वेदानां समाहारः। तया मूर्च्छन् उच्चलन् यः कोलाहलः तेन बधिरिताः आशाः दिशः येषु तानि गृहशुकाभ्यस्तसाङ्गत्रिवेदीमूर्च्छत्कोलाहलबधिरिताशानि ॥ ९८

शृण्वन् शम्भोर्वृषपुरजुषः[1] सान्ध्यनृत्तप्रवृत्तं
सान्द्रं नन्दिप्रहतमुरजध्वानमुद्धूतखेदम् ।
पश्येर्विश्वत्रितयविदितं श्वेतखेयाख्यमग्र्यं
ग्रामं श्रीमद्धरिहरमयं यत्र जागर्ति तेजः ॥ ९९ ॥

वृषपुरजुषः वृषपुरनाम्नि क्षेत्रे निवसतः शम्भोः सान्ध्यनृत्ते सन्ध्यावेलाभवे नृत्ते प्रवृत्तं सान्ध्यनृत्तप्रवृत्तम्। उद्धूतः निरस्तः खेदः येन तत् उद्धूतखेदम्। सान्द्रं तुमुलं नन्दिना नन्दिकेश्वरेण प्रहतस्य मुरजस्य ध्वानं शब्दं नन्दिप्रहतमुरजध्वानं शृण्वन्। विश्वत्रितये त्रिष्वपि लोकेषु विदितं विश्रुतं विश्वत्रितयविदितं श्वेतखेयाख्यं श्वेतखेयं नाम अग्र्यं मुख्यं ग्रामं पश्येः। यत्र यस्मिन् ग्रामे श्रीमत् शोभायुक्तं हरिहरमयं शङ्करनारायणरूपं तेजः जागर्ति ॥ ९९

उड्डीयोच्चैः किमपि नयने दिश्युदीच्यां ददानो
द्रक्ष्यस्युद्यद्ध्वजवरपताकोल्लसद्गोवृषाङ्कम्[2]
कैलासाद्रेरपि भगवतः प्रेमपात्रं पवित्रं
ब्रह्मक्षेत्रं भुवनविदितं क्षेत्रमर्धेन्दुमौलेः ॥ १०० ॥

उच्चैः किमपि किञ्चिद्दूरं उड्डीय विहायसा गच्छन् नयने चक्षुषी उदीच्यां दिशि उत्तरदिशि ददानः त्वं ब्रह्मक्षेत्रं इति भुवनविदितं सर्वेषु लोकेषु प्रसिद्धं अर्धेन्दुमौलेः शिवस्य पवित्रं पुण्यं क्षेत्रं द्रक्ष्यसि। कीदृशं क्षेत्रम्। उद्यन् उन्नतः यः ध्वजवरः तस्य या पताका तस्यां उल्लसन् प्रकाशमानः गोवृषः वृषभः एव अङ्कः चिह्नं यस्मिन् तत् उद्यद्ध्वजवरपताकोल्लसद्गोवृषाङ्कम्। भगवतः शिवस्य कैलासाद्रेः अपि कैलासपर्वतादपि प्रेमपात्रं प्रेमविषयम् ॥ १००

---

१. शम्भो...पुरजुषः. २. द्रक्ष्यस्युद्यध्वजपताकोल्लसद्गोवृषाङ्कम्.

ईशानाङ्घ्रिस्मरणतरणिध्वस्तमोहान्धकाराः
कैशोरेऽपि श्रुतिजलनिधेः पारमासेदिवांसः ।
आशानारीकचभरपरिष्कारकीर्तिप्रसूनाः
सौशील्येन्दुप्रथमगिरयो यन्निकेता द्विजेन्द्राः ॥ १०१ ॥

यत् ब्रह्मक्षेत्रं निकेतः आवासः येषां ते यन्निकेताः द्विजेन्द्राः एवं भवन्ति । कथम् । ईशानस्य शिवस्य अङ्घ्रिस्मरणं पादसेवा एव यः तरणिः सूर्यः तेन ध्वस्तः निराकृतः मोहः अज्ञानं एव अन्धकारः येषां ते ईशानाङ्घ्रिस्मरण-तरणिध्वस्तमोहान्धकाराः । कैशोरे अपि बाल्ये एव श्रुतिः वेद एव जलनिधिः श्रुतिजलनिधिः । तस्य पारं परकूलं आसेदिवांसः प्राप्ताः । आशानां दिशां एव नारीणां कचभरस्य केशभारस्य परिष्कारः अलङ्करणसाधनम् । तादृशं कीर्तिरेव प्रसूनं कुसुमं येषां ते आशानारीकचभरपरिष्कारकीर्तिप्रसूनाः । सौशील्यं सुचरितमेव यः इन्दुः चन्द्रः तस्य प्रथमगिरयः उदयपर्वतभूताः सौशील्येन्दुप्रथमगिरयः ॥ १०१

निष्क्रान्ता किं निजपतिजटाकाननात् प्रेमकोपे
स्वर्धुन्येषा स्वयमिति जनैः शश्वदुत्प्रेक्ष्यमाणः ।
अग्रे शम्भोरमृतमधुरस्वच्छतोयः समिन्धे
कूलोदञ्चत्कुसुमिततरुर्यत्र[1] दिव्यस्तटाकः ॥ १०२ ॥

तत्र ब्रह्मक्षेत्रे शम्भोः अग्रे पुरतः दिव्यः तटाकः समिन्धे भाति । कीदृशस्त-टाकः । एषा प्रेमकोपे प्रणयकलहे सति निजपतेः शिवस्य जटा एव काननं निजपतिजटाकाननम् । तस्मात् निष्क्रान्ता स्वर्धुनी आकाशगङ्गा स्वयं इति एवं जनैः शश्वत् सदा उत्प्रेक्ष्यमाणः संभाव्यमानः । एषा इत्यस्य तटाक-परिग्रहेऽपि स्वर्धुनी इत्यनेन सामानाधिकरण्यात् स्त्रीलिङ्गम् । अमृतमिव मधुरं स्वच्छं च तोयं यस्मिन् सः अमृतमधुरस्वच्छतोयः । कूले तीरदेशे उदञ्चन्तः उद्गताः कुसुमिताः कुसुमवन्तश्च तरवः यस्य सः कूलोदञ्चत्कुसुमिततरुः॥१०२

---

१. कुसुमिततनुर्यत्र.

वास्तोष्पत्यालयजयिनि तत्राभिगम्यातिरम्यान्
तांस्तान् भागान्[1] दृगतिथयतः स्याद्धि कालातिपातः ।
अत्रस्थेन प्रियसख ततः स त्वया भक्तिपूर्वं
तत्र स्थाने विहितवसतिर्वन्द्यतामिन्दुमौलिः ॥ १०३ ॥

वास्तोष्पतिः इन्द्रः । तस्य आलयः अमरावती । तं जयतीति वास्तोष्पत्यालयजयि । तादृशे तत्र तस्मिन् ब्रह्मक्षेत्रे अभिगम्य अतिरम्यान् अतिमनोहरान् तान् तान् भागान् प्रदेशान् । भावान् इत्येव वा पाठः । प्रकारविशेषान् । दृगतिथयतः दृशोः नेत्रयोः अतिथीन् कुर्वतः । अवलोकयतः इत्यर्थः । तव कालातिपातः स्यात् । हि यतः ततः हे प्रियसख अत्रस्थेन पुरोभागे तटाकतीरस्थेनैव त्वया तत्र स्थाने तस्मिन् क्षेत्रे कृता वसतिः येन सः कृतवसतिः इन्दुमौलिः शिवः भक्तिपूर्वं वन्द्यताम् ॥ १०३

गौरीतुङ्गस्तनभरपरीरम्भसंरम्भशुम्भ-
द्रोमाञ्चोत्कञ्चुकिततनवे किञ्च पञ्चेषुहन्त्रे ।
प्राचीनोक्तिप्रतिनवलतापुष्पपुष्पन्धयाय
ब्रह्मक्षेत्रे विहितरतये विश्वमूर्ते नमस्ते ॥ १०४ ॥

हे विश्वमूर्ते ते नमः अस्तु । कीदृशाय ते । गौर्याः पार्वत्याः तुङ्गस्तनभरस्य परीरम्भाय आश्लेषाय यः संरम्भः तस्मिन् शुम्भन् शोभमानः यः रोमाञ्चः तेन उत्कञ्चुकिता आवृता तनुः यस्य तस्मै गौरीतुङ्गस्तनभरपरीरम्भसंरम्भशुम्भद्रोमाञ्चोत्कञ्चुकिततनवे । किञ्च तथापि पञ्चेषुहन्त्रे कामदेवस्य हन्त्रे । प्राचीनोक्तिः वेदः एव प्रतिनवा अभिनवा या लता तस्याः सूनस्य पुष्पस्य वेदार्थस्य पुष्पन्धयः भ्रमरः प्राचीनोक्तिप्रतिनवलतासूनपुष्पन्धयः । तस्मै । वेदार्थे अभिरताय जगद्गुरुत्वात् इति भावः । वेदार्थे स्थिताय वेदवेद्याय इति वा । ब्रह्मक्षेत्रे विहिता रतिः येन तस्मै विहितरतये ॥ १०४

---

१. भावान्.

इत्थं नत्वा हरमथ जवाद्धावतो वामतस्ते
ग्रामः श्रीमानभिनवलतानामधेयः प्रथेत ।
विश्वव्याप्तिं प्रथयितुमिव स्वां नृणां विश्ववन्द्या
गौरी यत्र स्फुरति वपुषानुक्षणं वर्धमाना ॥ १०५ ॥

हरं ब्रह्मक्षेत्रवासिनं शिवं इत्थं नत्वा अथ अनन्तरं जवात् वेगेन धावतः ते तव वामतः वामभागे अभिनवलता इति नामधेयं यस्य सः अभिनवलतानामधेयः श्रीमान् ग्रामः प्रथेत लक्ष्येत । यत्र यस्मिन् ग्रामे विश्ववन्द्या सर्वैः स्तुत्या गौरी पार्वती । स्वां विश्वव्याप्तिं नृणां प्रथयितुं प्रकाशयितुं इव । अहं सर्वस्मिन्नपि लोके व्याप्ता इति जनानावेदयितुमिव इति भावः । वपुषा अनुक्षणं वर्धमाना स्फुरति विभाति । तत्र क्षेत्रे गौरीविग्रहः स्वयंभूः प्रतिक्षणं वर्धमानश्चेति प्रसिद्धिः ॥ १०५

शीतच्छायैः सरसकदलीषण्डपूर्णान्तरालैः
कीर्णः[1] केरक्रमुकनिकरैरग्रतो लक्ष्यते यः ।
स्फीतो देशो भुवि सितगरुत्तीरनाम्ना प्रतीतः
प्रागुक्ता सा प्रियसख तव प्राप्यभूः प्राज्यभूतिः ॥ १०६ ॥

शीता छाया अनातपदेशः येषां तैः शीतच्छायैः सरसकदलीषण्डैः सरसैः कदलीषण्डैः पूर्णानि अन्तरालानि येषां तैः सरसकदलीषण्डपूर्णान्तरालैः । केरक्रमुकनिकरैः केराणां क्रमुकाणां च नारिकेलक्रमुकाणां निकरैः कीर्णः भुवि लोके सितगरुत्तीरनाम्ना सितगुरुत्तीरं इति नाम्ना प्रतीतः प्रसिद्धः यः स्फीतः प्रवृद्धः । सम्पन्न इति यावत् । देशः अग्रतः तव पुरतः लक्ष्यते । हे प्रियसख सा । प्राज्या भूतिः ऐश्वर्यं यस्याः सा प्राज्यभूतिः । प्रागुक्ता "आश्चर्याणामतिशयवताम्" इति (२३) श्लोके पूर्वमुक्ता । तव प्राप्यभूः त्वया गन्तव्यो देशः । सितगरुत्तीरमेव श्वेतच्छदतटं इति तत्र श्लोके उक्तम् ॥ १०६

---

१. कीर्णं.

आश्वास्याराद्लिकलरवैरब्जिनीमात्मकान्तां[1]
यास्यत्यस्तं सवितरि जगद्वेश्मरत्नप्रदीपे ।
प्रोद्यत्सौधध्वजपटशिरश्चुम्ब्यमानाम्बरान्तां
प्राप्स्यस्येनां पुरमनुपमाडम्बरां शम्बरारेः ॥ १०७ ॥

जगद्वेश्मरत्नप्रदीपे जगत एव वेश्मनः गृहान्तर्भागस्य रत्नप्रदीपभूते सवितरि सूर्ये आत्मकान्तां निजदयितां अब्जिनीं पद्मिनीं अलीनां कलरवैः करणैः अलिकलरवैः आश्वास्य अस्तं यास्यति सति । सूर्यस्यास्तंगमनवेलायामित्यर्थः । प्रकर्षेण उद्यन्तः उद्गच्छन्तः ये सौधध्वजाः प्रासादोपरि निक्षिप्ताः ध्वजाः तेषां पटानां पताकानां शिरोभिः अग्रभागैः चुम्ब्यमानः अम्बरस्य आकाशस्य अन्तः यस्यां तां प्रोद्यत्सौधध्वजपटशिरश्चुम्ब्यमानाम्बरान्ताम् । एनां अनुपमः साम्यरहितः आडम्बरः विभवः यस्याः तां अनुपमाडम्बरां शम्बरारेः कामदेवस्य पुरम् । तद्वन्मनोज्ञामिति भावः । प्राप्स्यसि । चुम्ब्यमानाम्बरां तां इति वा पदविभागः । चुम्ब्यमानं अम्बरं यस्यां इति तदा विग्रहः । तां एनां इति च योजना ॥ १०७

इति मयूरसन्देशे पूर्वभागः
समाप्तः ।

---

1. रवैरजिनी corrected into रवैरब्जिनी.

# उत्तरभागः

श्लाघ्यां लोकेष्वनुपममहेन्द्रोपलाल्योर्जिताभां
स्वस्त्रीसङ्घैः सह सुकृतिभिः शश्वदध्यास्यमानाम् ।
आत्ताभोगां सुरभिसुमनःसम्पदा कल्पवृक्षै-
रास्तीर्णां तां त्रिदिवधिषणा भाविनी पश्यतस्ते ॥ १ ॥

तां अन्नकराभिधानां पुरं पश्यतः ते तव त्रिदिवधिषणा अयं त्रिदिवः स्वर्गः इति धिषणा बुद्धिः भाविनी भविष्यति । त्रिदिवसाम्यं विशेषणैः समर्थ्यते । कीदृशीं ताम् । लोकेषु श्लाघ्याम् । अनुपमाः ये महेन्द्रोपलाः इन्द्रनीलाः तेषां आल्या समूहेन ऊर्जिता बलवती आभा शोभा यस्यां तां अनुपममहेन्द्रोपलाल्योर्जिताभां इति पुरीपक्षे । अनुपमा महेन्द्रेण उपलाल्या लालनार्हा ऊर्जिता शोभा यस्मिन् इति स्वर्गपक्षे । स्वस्त्रीसङ्घैः निजयुवतीसमूहैः सह सुकृतिभिः पुण्यवद्भिः पुरुषैः शश्वदध्यास्यमानां इति पुरीपक्षे । स्वःस्त्रीभिः अप्सरोभिः सह इति स्वर्गपक्षे । सुरभिसुमनःसम्पदा सुरभीणां सुगन्धिनां सुमनसां पुष्पाणां सम्पदा इति पुरीपक्षे । सुरभेः कामधेनोः सुमनसां देवानां च सम्पदा इति स्वर्गपक्षे । आत्तः आभोगः परिपूर्णता यस्यां तां आत्ताभोगाम् । कल्पवृक्षैः केरद्रुमैः इति पुरीपक्षे । कल्पवृक्षो नाम देवतरुः इति स्वर्गपक्षे । अस्तीर्णां आकीर्णाम् ॥ १

आरूढानां विहृतिविधये सौधशृङ्गेषु यस्यां
यूनां रूपामृतमनिमिषैर्लोचनैरापिबन्तः ।
श्लाघं श्लाघं जलधिमथनायासदाय प्रकामं
पीयूषाय प्रतिमुहुरसूयन्ति वृन्दारकौघाः ॥ २ ॥

यस्यां पुरि विहृतिविधये क्रीडाविधानाय सौधशृङ्गेषु हर्म्याग्रेषु आरूढानां यूनां रूपामृतं रूपमेव अमृतं अनिमिषैः निमेषरहितैः लोचनैः आपिबन्तः वृन्दारकाणां देवानां ओघाः समूहाः श्लाघं श्लाघं पुनः पुनः प्रशंसन्तः । अर्थात् रूपामृतमेव । जलधिमथनमेव यः आयासः तं ददातीति जलधिमथ-

नायासदम् । तस्मै पीयूषाय प्रतिमुहुः पुनः पुनः प्रकामं अत्यर्थं असूयन्ति । पीयूषे वीतरुचयो भवन्ति इत्यर्थः ॥ २

यस्यां छायातरुनिरवकाशेन्दुभानुप्रचारे-
ष्वारामेषु प्रचुरघटिताश्चन्द्रसूर्याश्मपुञ्जाः[1] ।
बालार्काभैरधरमणिभिर्बालवामेक्षणाना-
मावेद्यन्ते विगलितकलङ्केन्दुमित्रैश्च वक्त्रैः ॥ ३ ॥

यस्यां पुरि छायातरुभिः निरवकाशाः अवकाशरहिताः इन्दोः चन्द्रस्य भानोः सूर्यस्य च प्रचाराः येषु तेषु छायातरुनिरवकाशेन्दुभानुप्रचारेषु आरामेषु उद्यानेषु प्रचुरं बहुलं यथा तथा घटिताः चन्द्रसूर्याश्मपुञ्जाः चन्द्राश्मनां चन्द्रकान्तानां सूर्याश्मनां सूर्यकान्तानां च पुञ्जाः समूहाः आवेद्यन्ते इदमयं इदमयं इति विविच्य ज्ञाप्यन्ते । कैः बालार्कस्य बालसूर्यस्य आभा इव आभा येषां तैः बालार्काभैः । बालसूर्यवत् अरुणवर्णैरित्यर्थः । बालवामेक्षणानां बालसुन्दरीणां मणिरिव अधरः अधरमणिः । तैः । विगलितः कलङ्कः यस्मात् सः विगलितकलङ्कः । तस्य इन्दोः मित्रैः । चन्द्रसमैरित्यर्थः । वक्त्रैः मुखैश्च । सूर्यचन्द्रयोः किरणसंगमाभावात् सूर्यकान्ते वह्निज्वलनं चन्द्रकान्ते जलप्रवाहः च तत्समैः स्त्रीणां अधरैर्मुखैश्च एव निष्पाद्येते इति भावः ॥ ३

यस्यां बिम्बीफलरुचिविडम्बीनि[2] दन्ताम्बराणि
स्त्रीणां दृष्ट्वा विघटितमदाडम्बरा विद्रुमाल्यः ।
मोक्तुं प्राणानिव किसलयच्छद्मना वल्लिपाशा-
नालम्बन्ते निजगलतटीबन्धमुद्बन्धुकामाः ॥ ४ ॥

यस्यां पुरि स्त्रीणाम् । बिम्बीफलानां रुचिं शोभां विडम्बयन्तीति बिम्बीफलरुचिविडम्बीनि दन्ताम्बराणि अधरान् दृष्ट्वा विद्रुमाल्यः विद्रुमसमूहाः । विघटितः वियुक्तः मदस्य गर्वस्य आडम्बरः यासां ताः विघटितमदाडम्बराः सत्यः प्राणान् मोक्तुमिव निजगलतटीनां स्वकण्ठदेशानां बन्धः

१. घटिका. २. बिम्बीफलविडम्बीनि.

यस्मिन् कर्मणि तत् निजगलतटीबन्धं यथा तथा उद्बन्धुकामाः। निजकण्ठेषु बन्धुं कामः यासां ताः इत्यर्थः। किसलयच्छद्मना किसलयव्याजेन वल्लयः एव पाशाः वल्लिपाशाः। तान् आलम्बन्ते ॥ ४

पाटीराद्रेः परिमलभरं चोरयित्वा प्रधाव-
न्नाक्रोशद्भिर्मधुपनिकरैः पृष्ठतोऽन्वीयमानः।
आस्ते स्वैरं पवनतरुणः प्राप्य यत्पुष्पवार्टी
निक्षिप्यामून् कुसुमकुहराकारकारागृहेषु ॥ ५ ॥

पवन एव तरुणः युवा पाटीराद्रेः चन्दनपर्वतस्य परिमलभरं चोरयित्वा प्रधावन्। आक्रोशाद्भिः शब्दं कुर्वद्भिः मधुपनिकरैः भ्रमरसमूहैः पृष्ठतः पश्चाद्भागे अन्वीयमानः अनुगम्यमानः। अयं चोरो धनमादाय धावति इति उच्चैराक्रोशद्भिरिव इति भावः। एवं सन् यत्पुष्पवार्टी यस्याः पुरः कुसुमोद्यानं प्राप्य अमून् अनुधावतो मधुपनिकरान् कुसुमकुहराकारकारागृहेषु कुसुमानां कुहर एव आकारः स्वरूपं येषां तेषु कारागृहेषु निक्षिप्य निबद्धान् कृत्वा स्वैरं आस्ते ॥ ५

पुञ्जीभूता भुवनविजयश्रीसमाश्लेष[1]केली-
हृष्यत्पुष्पायुधहसरुचः किंस्विदित्यूह्यमानाः।
यस्यां क्रीडत्कमलनयनामुग्धवक्त्रेन्दुबिम्ब-
च्छायाङ्कुरद्विगुणितसुधानिर्मला भान्ति सौधाः ॥ ६ ॥

यस्यां पुरि सौधाः भान्ति। कथंभूताः। भुवनविजयश्रियः समाश्लेषं आलिङ्गनमेव या केली तया हृष्यतः हर्षयुक्तस्य पुष्पायुधस्य कामस्य हसरुचः विहासशोभाः भुवनविजयश्रीसमाश्लेषकेलीहृष्यत्पुष्पायुधहसरुचः पुञ्जीभूताः किंस्वित् इति ऊह्यमानाः संभाव्यमानाः। जनैरिति शेषः। क्रीडन्तीनां कमलनयनानां सुन्दरीणां मुग्धं मनोहरं वक्त्रमेव यत् इन्दुबिम्बं तस्य छायायाः शोभायाः अङ्कुरेण प्ररोहेण द्विगुणितया सुधया शुभ्रलेपनद्रव्येण निर्मलाः क्रीडत्कमलनयनामुग्धवक्त्रेन्दुबिम्बच्छायाङ्कुरद्विगुणितसुधानिर्मलाः ॥ ६

---

१. श्रीबवाश्लेष.

वक्त्रामोदं कुवलयदृशां स्नानलीलासु लग्नं
वापीष्वाप्तुं प्रतितनुमिषाद्यत्र[1] पीयूषधामा ।
रात्रौ रात्रौ विशति लभते नैव तत्पङ्कयोगं
मुक्त्वा येन प्रसरति कलङ्कीति लोकप्रवादः ॥ ७ ॥

यत्र पुरि स्नानलीलासु स्नानक्रीडासु लग्नं संक्रान्तं कुवलयदृशां सुन्दरीणां वक्त्रामोदं मुखसौरभ्यं आप्तुं लब्धुं प्रतितनुमिषात् प्रतिच्छायाव्याजेन रात्रौ रात्रौ पीयूषधामा चन्द्रः वापीषु विशति । किन्तु तत्पङ्कयोगं वापीगतपङ्कलेपनं मुक्त्वा वर्जयित्वा अन्यत् किमपि नैव लभते । येन पङ्कयोगेन कलङ्की कलङ्कवान् चन्द्रः इति लोकप्रवादः प्रसरति ॥ ७

माध्वीं साध्वीमधरितसुधामाधुरीमागलान्तं
पायं पायं निजयुवतिभिः सङ्गता भृङ्गसङ्घाः ।
मारक्षोणीसहचरयशश्चारु गायन्ति शश्वत्
कुञ्जे कुञ्जे कुसुमितलते यत्र कूजाच्छलेन ॥ ८ ॥

यत्र पुरि साध्वीं प्रशस्ताम् । अधरिता न्यक्कृता सुधायाः अमृतस्य माधुरी यया तां अधरितसुधामाधुरीं माध्वीं पुष्परसं आगलान्तम् । यावच्छक्यं पातुं तावदित्यर्थः । पायं पायं पुनः पुनः पीत्वा निजयुवतिभिः स्वभ्रमरीभिः सङ्गताः मिलिताः भृङ्गसङ्घाः भ्रमराणां समूहाः । कुसुमिताः कुसुमसहिताः लताः यस्मिन् तस्मिन् कुसुमितलते कुञ्जे कुञ्जे कूजाच्छलेन कूजनव्याजेन । मार एव यः क्षोणीसहचरः भूपतिः तस्य यशः मारक्षोणीसहचरयशः चारु मनोहरं यथा तथा शश्वत् सर्वदा गायन्ति । चारुशब्दः यशसो विशेषणं वा ॥ ८

शुद्धच्छायस्फटिकशकलश्रेणिशोशुभ्यमानै-
रस्तं नीते तिमिरनिकरे भासुरैर्भूविभागैः[2] ।
यस्यां प्रायः सरसिजवनीकैरवोद्बोधमात्रे
जागर्ति स्म द्युमणिशशभृद्दीधितीनां प्रयासः ॥ ९ ॥

---

१. प्रतितनुमिषालव. २. भूमिभागैः ।

यस्यां पुरि शुद्धा छाया शोभा येषां तेषां स्फटिकशकलानां स्फटिकखण्डानां श्रेण्या समूहेन शोशुभ्यमानैः नितरां दीप्यमानैः शुद्धच्छायस्फटिकशकलश्रेणिशोशुभ्यमानैः अत एव भासुरैः दीप्तैः भूविभागैः प्रदेशैः तिमिरनिकरे तमःसमूहे अस्तं नीते अपसारिते सति। द्युमणिः सूर्यः। शशभृत् चन्द्रः। तयोः दीधितीनां किरणानां द्युमणिशशभृद्दीधितीनां प्रयासः व्यवसायः सरसिजवनी पङ्कजसमूहः। कैरवं कुमुदम्। तयोः उद्बोधमात्रे विकासनमात्रे सरसिजवनीकैरवोद्बोधमात्रे प्रायः जागर्ति स्म उपयुक्तोऽभवत्। न तु तमोऽपसारणे इति भावः॥ ९

काञ्चीदामक्वणितरणितैर्मञ्जुशिञ्जानिनादै-
र्मञ्जीराणामघटितपदैः किञ्च वाचां प्रपञ्चैः।
प्रौढोन्मेषैः प्रहसनरवैर्वासरेऽपि प्रथन्ते
यस्यां सौधेष्वहमहमिका मोहनाडम्बराणाम्॥ १०॥

यस्यां पुरि सौधेषु वासरेऽपि दिवापि मोहनाडम्बराणां सुरतोत्सवानां अहमहमिकाः अहं पूर्वमहं पूर्वमित्येवं परस्परसङ्घर्षाः प्रथन्ते जायन्ते। कथम्। काञ्चीदाम्नः क्वणितान्येव रणितानि अस्फुटवचनानि काञ्चीदामक्वणितरणितानि। तैः। मञ्जीराणां नूपुराणां मञ्जवः मनोहराः शिञ्जानिनादाः मञ्जुशिञ्जानिनादाः। तैः। किञ्च अघटितपदैः अविस्पष्टाक्षरैः वाचां प्रपञ्चैः। प्रौढः उन्मेषः प्रकाशः येषां तैः प्रौढोन्मेषैः प्रहसनरवैः। एतैः सर्वैर्दिवापि सुरतोत्सवः अहमहमिकया प्रवर्तन्ते किमु रात्रौ इति भावः॥ १०

यस्यां मान्द्यं गतिहसितयोरेव मालिन्यमुद्रा
केशेष्वेव स्फुरति कुटिलत्वं च कार्श्यप्रसंगः
मध्येष्वेव स्तनकलशयोरेव सङ्घर्षयोगो
नेत्रेष्वेव श्रुतिपथसमुल्लङ्घिता मञ्जुवाचाम्॥ ११॥

यस्यां पुरि मञ्जुवाचां सुन्दरीणाम्। गतिः गमनं हसितं विहासश्च गतिहसिते। तयोरेव मान्द्यं स्फुरति। मञ्जुवाचां इति स्फुरति इति च पदे

१. रणितैर्मञ्जशिञ्जा. २. प्रहणन.

सर्वत्र योजनीये। तासां केशेष्वेव मालिन्यमुद्रा कृष्णवर्णः कुटिलत्वं वक्रत्वं च स्फुरतः। तासां मध्येष्वेव कार्श्यप्रसङ्गः स्फुरति। तासां स्तनकलशयोः कलशतुल्ययोः कुचयोरेव सङ्घर्षयोगः स्फुरति। तासां नेत्रेष्वेव। श्रुतिपथं श्रवणेन्द्रियप्रदेशं समुल्लङ्घते आक्रामति इति श्रुतिपथसमुल्लङ्घि। तस्य भावः श्रुतिपथसमुल्लङ्घिता। वेदमार्गव्यतियानं वा। स्फुरति। मान्द्यादयो दोषाः यत्रत्येषु न विद्यन्ते इति भावः॥ ११

पीतस्रस्तैर्नवमधुझरैः पङ्किलान् भूविभागा-[1]
नातन्वानाः स्तनितधिषणां कूजितैः कल्पयन्तः।
पक्षोद्धूतप्रसवरजसा वैद्युतीं किञ्च लक्ष्मीं
यस्यां भृङ्गास्तिमिरितदिशः प्रावृषः प्रारभन्ते॥ १२॥

यस्यां पुरि भृङ्गाः भ्रमराः प्रावृषः वर्षाकालान् प्रारभन्ते। इतरेष्वपि ऋतुषु इति भावः। कीदृशा भृङ्गाः। पीताश्च पश्चात् स्रस्ताः च्युताश्च पीतस्रस्ताः। तैः नवस्य मधुनः पुष्परसस्य झरैः प्रवाहैः भूविभागान् भूप्रदेशान् पङ्किलान् पङ्कसहितान् आतन्वानाः कुर्वन्तः। कूजितैः स्तनितधिषणां मेघगर्जितबुद्धिं कल्पयन्तः जनयन्तः। किञ्च पक्षोद्धूतप्रसवरजसा पक्षैः उद्धूतेन प्रसवरजसा पुष्परेणुना वैद्युतीं विद्युत्सम्बन्धिनीं लक्ष्मीं श्रियं कल्पयन्तः इति अत्रापि योज्यम्। तिमिरिताः अन्धकारयुक्ताः कृताः दिशः यैः ते तिमिरितदिशः। विशेषणैः वर्षाकालागमः समर्थितः॥ १२

तापिञ्छाभाः क्वचन तरलैर्नेत्रभासां प्ररोहैः
स्निग्धज्योत्स्नाधवलिमजुषः क्वापि वक्त्रेन्दुबिम्बैः।
ध्वान्ताक्रान्ताः कुहचन कचस्फूर्तिभिर्मुग्धवाचा-
मङ्घ्रिच्छायैर्भृतकिसलयाः क्वापि यस्यां विभागाः॥ १३॥

यस्यां पुरि क्वचन विभागाः मुग्धवाचां सुन्दरीणां तरलैः चञ्चलैः नेत्रभासां नयनशोभानां प्ररोहैः कन्दलैः तापिञ्छस्य तमालस्य आभा शोभा

1. भूमि.

इव आभा येषां ते तापिञ्छाभाः। भवन्ति इति शेषः। मुग्धवाचां इति विभागाः इति च सर्वत्र योजनीये। क्वापि विभागाः तासां वक्त्रैः मुखैरेव इन्दुबिम्बैः वक्त्रेन्दुबिम्बैः। स्निग्धायाः ज्योत्स्नायाः धवलिमानं धवलवर्णं जुषन्ते भजन्ते इति स्निग्धज्योत्स्नाधवलिमजुषः भवन्ति इति सवत्राध्याहार्यम्। कुहचन क्वाचित् विभागाः तासां कचस्फूर्तिभिः केशभारैः ध्वान्तेन तमसा आक्रान्ताः ध्वान्ताक्रान्ताः भवन्ति। क्वापि विभागाः तासां अङ्घ्रिच्छायैः पदशोभाभिः भृतानि किसलयानि यैः ते भृतकिसलयाः भवन्ति ॥ १३

यस्यां विश्वत्रितयजननस्थानसंहारलीलं
क्ष्वेलग्रासक्षुभितगिरिशायुष्यमङ्गल्यभूषम्।
हेलोदञ्चच्चरणनलिनोत्पिष्टदैत्योत्तमाङ्गं
तेजः किञ्चित्तुलिततरुणाम्भोद[1]धम्मिल्लमिन्धे ॥ १४ ॥

यस्यां पुरि किञ्चित् अनिर्वचनीयं तेजः पार्वतीरूपं इन्धे प्रकाशते। कीदृशं तेजः। विश्वत्रितयस्य त्रयाणां लोकानां जननं उत्पत्तिः। स्थानं स्थितिः। संहारः नाशः। ते एव लीला यस्य तत् विश्वत्रितयजननस्थान-संहारलीलम्। क्ष्वेलस्य विषस्य ग्रासेन भक्षणेन क्षुभितस्य क्षोभं प्राप्तस्य गिरिशस्य शिवस्य आयुष्या आयुषे हिता मङ्गल्यभूषा यस्य तत् क्ष्वेलग्रास-क्षुभितगिरिशायुष्यमङ्गल्यभूषम्। विषपानेनापि शिवो न मृतः इति यत् तत् देव्याः मङ्गल्यसूत्रस्य महिमैव इति भावः। हेलया लीलया उदञ्चता उन्नमता चरणनलिनेन कमलतुल्येन चरणेन उत्पिष्टं मर्दितं दैत्यस्य महिषासुरस्य उत्तमाङ्गं शिरः येन तत् हेलोदञ्चच्चरणनलिनोत्पिष्टदैत्योत्तमाङ्गम्। तुलितः अनुकृतः तरुणः प्रौढः। सजल इति यावत्। अम्भोदः मेघः येन तत् तुलिततरुणाम्भोदम्। तादृशो धम्मिल्लः केशभारः यस्य तत् तुलिततरुणाम्भो-दधम्मिल्लम् ॥ १४

---

१. तुलिमरुणाभोद.

क्षेत्रं देव्याः क्षितिधरभुवस्तत्सखे पश्चिमेन
प्रेक्ष्यं लक्ष्मीविहरणपदं वेश्म मद्वल्लभायाः ।
निश्शेषाशावलयविजयासादितोड्डामरश्री-
रक्षुण्णाज्ञः स हि विहरते यत्र वीरो मनोभूः ॥ १५ ॥

हे सखे क्षितिधरभुवः । क्षितिधरः पर्वतः हिमवान् । तज्जातायाः देव्याः पार्वत्याः तत् पूर्वश्लोके निर्दिष्टं क्षेत्रं पश्चिमेन । तस्य पश्चिमभागे इत्यर्थः । मद्वल्लभायाः वेश्म भवनं प्रेक्ष्यम् । कीदृशं वेश्म । लक्ष्म्याः श्रीभगवत्याः विहरणपदं क्रीडास्थानम् । यत्र यस्मिन् वेश्मनि निश्शेषस्य आशावलयस्य दिग्वलयस्य विजयात् आसादिता प्राप्ता उड्डामरा प्रवृद्धा श्रीः येन सः निश्शेषाशावलयविजयासादितोड्डामरश्रीः । अक्षुण्णा अन्यैः अनतिलङ्घिता आज्ञा यस्य सः अक्षुण्णाज्ञः सः प्रसिद्धः वीरः मनोभूः कामदेवः विलसति हि । हि इति प्रसिद्धौ ॥　　　　१५

तच्चक्षुष्मत्सुचरित[१]लताफुल्लमित्यत्र मुख्या-
वन्त्यौ च द्वौ सुमतिभिरुपादाय वर्णौ निबद्धम् ।
भाषामिश्रोत्तरपदमवद्योतितार्थं कवीनां
तच्चप्पिल्लीत्यखिलविदितं[२] नामधेयं यदीयम् ॥ १६ ॥

यदीयं यस्य वेश्मनः सम्बन्धि तच्चप्पिल्लि इति नामधेयं अखिलविदितं सर्वेष्वपि लोकेषु सर्वेषामपि विदितम् । विशेषणैः नामधेयं निरुच्यते । तत् वेश्म चक्षुष्मतां नेत्रयुक्तानां सुचरितमेव या लता तस्याः फुल्लं कुसुमोत्पत्तिः इत्यत्र वाक्ये मुख्यौ आद्यौ तच्च इति । अन्त्यौ फुल्लं इति च वर्णौ सुमतिभिः सज्जनैः । कविभिरिति यावत् । उपादाय निबद्धम् । भाषामिश्रं केरलभाषायां विपरिणमितं उत्तरपदं फुल्लमित्यंशः यस्मिन् तत् भाषामिश्रोत्तरपदम् । फुल्लं इत्यस्य पिल्लि इति रूपान्तरभाव एव भाषामिश्रता । कवीनां अवद्योतितः प्रकाशितः अर्थः यस्य तत् अवद्योतितार्थम् । भागश्च

१. चक्षुष्मन् सुचरित.　२. तच्चप्पेल्लीत्यखिल.

एव उपादानेऽपि उत्तरांशस्य विपरिणामेऽपि कवीनां नामधेयार्थः स्पष्ट एव इति भावः ॥ १६

सौधव्यूहैरभिनवसुधानिर्मलैस्तुङ्गशृङ्ग-
क्रीडत्कान्ताधरकिसलयच्छायशोणीकृताभ्रैः[1] ।
नीहाराद्रेरिव निजसुताविप्रयोगासहिष्णो-
र्मूर्तिप्रायैर्नवमणिघटाबन्धुरैर्यत्समिन्धे ॥ १७ ॥

यत् वेश्म सौधव्यूहैः हर्म्यनिवहैः समिन्धे दीप्यते । कीदृशैः सौधैः । अभिनवया सुधया लेपनद्रव्येण निर्मलैः शुभ्रैः अभिनवसुधानिर्मलैः । अभिनवा सुधा अमृतं इव निर्मलैरिति वा । तुङ्गेषु उन्नतेषु शृङ्गेषु अग्रभागेषु क्रीडन्तीनां कान्तानां यत् अधरकिसलयं किसलयमिव अधरः तस्य छायया शोभया शोणीकृताः रक्तवर्णाः कृताः अभ्राः मेघाः येषां तैः तुङ्गशृङ्गक्रीडत्कान्ताधरकिसलयच्छायशोणीकृताभ्रैः । तावदुन्नतैरित्यपि ध्वनितम् । निजसुतायाः पार्वत्याः तत्र क्षेत्रे निवसन्त्याः विप्रयोगं विरहं सोढुं शीलं यस्य स न भवतीति निजसुताविप्रयोगासहिष्णुः । तस्य नीहाराद्रेः हिमवतः मूर्तिप्रायैः शरीरप्रायैः । श्वेतवर्णत्वादुन्नतत्वाच्च । नवानां नूतनानां नवसङ्ख्याकानां वा मणीनां रत्नानां घटया समूहेन बन्धुरैः मनोहरैः ॥ १७

मुग्धापाङ्गीघनकचभरस्पर्धिभिः स्निग्धशोभै-
र्मध्ये[2] तेषां मघवदुपलैरुत्तमैर्बद्धमूर्तिः ।
सौधः कोऽपि स्फुरति यमुनातोयसम्भेदशङ्कां
स्वर्गङ्गायामपि निजरुचामुद्गमैर्यः प्रसूते ॥ १८ ॥

तेषां सौधव्यूहानां मध्ये कोऽपि सौधः हर्म्यविशेषः स्फुरति शोभते । कीदृशः सौधः । मुग्धापाङ्गीनां सुन्दरीणां घनेन निबिडेन कचभरेण केशभारेण स्पर्धन्ते इति मुग्धापाङ्गीघनकचभरस्पर्धिनः । तैः । स्निग्धा निबिडा शोभा येषां तैः स्निग्धशोभैः । उत्तमैः मघवदुपलैः इन्द्रनीलैः बद्धा मूर्तिः

---

१. शीणीकृताभ्रैः Corrected into शोणीकृताभ्रैः । २. शोभैमध्ये Corrected into शोभैर्मध्ये.

रूपं यस्य सः बद्धमूर्तिः । निर्मित इत्यर्थः । यः सौधः निजरुचां स्वशोभानां उद्गमैः ऊर्ध्वप्रसरणैः स्वर्गङ्गायामपि आकाशगङ्गायामपि । श्वेतवर्णायामित्यभिसन्धिः । यमुनायाः यमुनानद्याः तोयस्य जलस्य कृष्णवर्णस्य सम्भेदशङ्कां संसर्गशङ्कां प्रसूते । सौधस्य उन्नतत्वमपि ध्वनितम् ॥ १८

आनन्दद्भिः परभृतकुलैराचितः स्निग्धशाखो
माकन्दद्रुः शिशिरिततलः शीकरैर्माकरन्दैः ।
प्राज्यैः[१] पुष्पैर्ध्रुवमुपबहिर्द्वारदेशं प्रियायाः
प्राप्तोत्पत्तिर्जयति महितो मन्मथस्येव केतुः ॥ १९ ॥

माकन्दद्रुः कश्चित् सहकारवृक्षः मन्मथस्य कामस्य महितः पूजितः केतुः ध्वजः इव ध्रुवं जयति । कीदृशो माकन्दद्रुः । आनन्दद्भिः प्रीयमाणैः परभृतकुलैः कोकिलसमूहैः आचितः आ समन्तात् व्याप्तः । स्निग्धाः निबिडाः शाखाः यस्य सः स्निग्धशाखः। माकरन्दैः मकरन्दसम्बन्धिभिः पुष्परससंबन्धिभिः शीकरैः बिन्दुभिः शिशिरितं शीतं कृतं तलं अधःप्रदेशः यस्य सः शिशिरिततलः । प्राज्यैः प्रशस्तैः पुष्पैः सहितः इति शेषः । उपबहिर्द्वारदेशं तस्य वेश्मनः बहिर्द्वारदेशसमीपे । प्रियायाः प्राप्ता उत्पत्तिः येन सः प्राप्तोत्पत्तिः । तया रोपितः वर्धितश्च इत्यर्थः । प्रियायाः वेश्मनः उपबहिर्द्वारं इति वा योजना ॥ १९

तत्पर्यन्ते तरलनयनाताम्रदन्ताम्बरश्री-
निष्पत्राकृन्नवकिसलयैः पुष्पितैर्बालवृक्षैः ।
कल्पक्षोणीरुहविजयिभिः[२] कल्पितानल्पशोभं
पुष्पोद्यानं किमपि सुखदं दर्पितैः षट्पदौघैः ॥ २० ॥

तत्पर्यन्ते तस्य माकन्दवृक्षस्य परिसरे किमपि सुखदं आनन्दप्रदं पुष्पोद्यानं विद्यते इति शेषः । कीदृशं पुष्पोद्यानम् । तरलनयनानां सुन्दरीणां ताम्रस्य रक्तवर्णस्य दन्ताम्बरस्य अधरस्य श्रियः । निष्पत्राकरोति जयतीति

निष्पत्राकृत्। निष्पत्राकुर्न्ति नवाकिसलयानि येषां तैः तरलनयनाताम्रदन्ताम्बरश्रीनिष्पत्राकृन्नवाकिसलयैः। पुष्पाणि संजातानि एषां इति पुष्पिताः। तैः। कल्पक्षोणीरुहं कल्पवृक्षं विजेतुं शीलं एषां इति कल्पक्षोणीरुहविजयिनः। तैः। बालवृक्षैः कल्पिता आसादिता अनल्पा बहुला शोभा यस्य तत् कल्पितानल्पशोभम्। दर्पितैः गर्वयुक्तैः। मत्तैरित्यर्थः। षट्पदौघैः भ्रमरसमूहैः उपलक्षितम्॥ २०

> तस्मिन् दृश्यो बकुलविटपी मत्प्रियावक्त्रशीधु-
> स्वैरास्वादप्रमदहसितानीव यस्यार्तवानि।
> उद्धूतानि भ्रमरपटलीपक्षवातैः प्रभूतै-
> श्छत्राणीव[1] त्रिभुवनपतेर्नक्रकेतोः प्रथन्ते॥ २१॥

तस्मिन् उद्याने बकुलविटपी कश्चित् बकुलवृक्षः दृश्यः। मत्प्रियायाः वक्त्रशीधुनः वक्त्रमदिरायाः। मधुगण्डूषस्येत्यर्थः। स्वैरास्वादात् यानि प्रमदहसितानि तानि इव स्थितानि इति शेषः। प्रभूतैः बहुलैः भ्रमरपटलीनां भृङ्गसमूहानां पक्षवातैः पक्षप्रेरितैः पवनैः उद्धूतानि ऊर्ध्वं प्रसारितानि यस्य बकुलविटपिनः आर्तवानि पुष्पाणि त्रिभुवनपतेः लोकत्रयनाथस्य नक्रकेतोः मकरध्वजस्य कामदेवस्य छत्राणि सितातपत्राणि इव प्रथन्ते वर्तन्ते। अथवा चक्राणि इत्येव पाठः। त्रिभुवनपतेः विष्णुरिव स्थितस्य नक्रकेतोः चक्राणि चक्रायुधानि इव। सुन्दरीणां मधुगण्डूषेण सिक्तो बकुलः पुष्पितो भवतीति प्रसिद्धम्॥ २१

> पार्श्वे तस्य प्रसवसुरभिः कोऽपि कङ्केलिरिन्धे
> म्लानः सम्प्रत्यहमिव भवन्नप्यशोकः सशोकः।
> पादाक्रान्त्याश्चिरविरहितः पातकैर्मामकीनै-
> र्वेलातीतैर्विरहशनये शायितायाः प्रियायाः॥ २२॥

तस्य बकुलवृक्षस्य पार्श्वे समीपे प्रसवैः पुष्पैः सुरभिः सुगन्धवान् कोऽपि कङ्केलिः अशोकवृक्षः इन्धे प्रकाशते। कीदृशः कङ्केलिः। मामकीनैः मत्कृतैः।

---

1. प्रभूतैश्चक्राणीव.

वेलां कूलम् । इयत्तामित्यर्थः । अतीतैः । अपारैरित्यर्थः । पातकैः प्रयोक्तृभिः विरहशयने शायितायाः प्रियायाः पादाक्रान्त्याः पादाघातात् चिरविरहितः चिरं वियुक्तः । चिराय तस्याः पादाघातमननुभवन्नित्यर्थः । अत एव अहमिव म्लानः ग्लानिं प्राप्तः । अशोकः सन् अपि नाम्ना अशोकोऽपि सम्प्रति इदानीं सशोकः भवति इति शेषः । सुन्दरीणां पादाघातेन अशोकः प्रीतः पुष्पितो भवतीति प्रसिद्धम् । अत्र पूर्वस्मिन्नपि च श्लोके "पादाघातादशोकः" इत्यादिः श्लोकः अनुसन्धेयः ॥ २२

कृत्वा खण्डं किमपि कुशलैः स्फाटिके भूविभागे
क्लृप्ता काचिद्विलसतितरां दीर्घिका श्लाघ्यकान्तिः ।
वर्णाभेदाज्जलतटभुवोर्वारिभूमिभ्रमोत्थं
दौस्थित्यं या घटयति नृणां पाण्डवीया सभेव ॥ २३ ॥

स्फाटिके स्फटिकमये भूविभागे प्रदेशे कुशलैः विदग्धैः । शिल्पिभिरिति भावः । किमपि खण्डं कृत्वा क्लृप्ता निर्मिता । श्लाघ्या प्रशंसनीया कान्तिः शोभा यस्याः सा श्लाघ्यकान्तिः । तादृशी कापि दीर्घिका वापी विलसतितरां नितरां शोभते । स्फाटिकप्रदेशे खननेन निर्मिता इयं दीर्घिका । न तु पूर्वं भूमौ खाता पश्चात् स्फटिकशकलैराबद्धा इति भावः । या दीर्घिका जलतटभुवोः जलप्रदेशस्य तटप्रदेशस्य च वर्णाभेदात् एकवर्णत्वात् पाण्डवानामियं पाण्डवीया सभा इव नृणां वारिभूमिभ्रमोत्थं दौस्थित्यं दुस्थितस्य भावम् । विषमावस्थामित्यर्थः । जनयति उत्पादयति । जलप्रदेशे भूप्रदेशबुद्धिं भूप्रदेशे जलप्रदेशबुद्धिं च जनयति इति भावः ॥ २३

हैमाः श्यामास्वपि तटमिलन्मुग्धमाणिक्यरत्न-
स्तोमारब्धद्युमणिकिरणध्वस्तनीहारयोगाः ।
पद्माः प्रोद्यत्परिमलभृतो यत्र नित्यं प्रफुल्ला-
स्ताराधीशं मधुपनिनदैस्तर्जयन्तो जयन्ति ॥ २४ ॥

यत्र यस्यां दीर्घिकायां हैमाः हेमवर्णाः पद्माः कमलानि नित्यं श्यामासु रात्रिषु अपि । "श्यामा स्याच्छारिवा निशा" इत्यमरः । तटे कूलदेशे मिलतां

विद्यमानानां मुग्धानां मनोहराणां माणिक्यरत्नानां स्तोमैः समूहैः आरब्धाः जनिताः द्युमणेः सूर्यस्य ये किरणाः तैः ध्वस्तः अपसारितः नीहारयोगः तुहिनसम्पर्कः येषां ते तटमिलन्मुग्धमाणिक्यरत्नस्तोमारब्धद्युमणिकिरणध्वस्तनीहारयोगाः । प्रफुल्लाः विकसिताः । प्रोद्यन्तं प्रकर्षेण उद्गच्छन्तं परिमलं बिभ्रति इति प्रोद्यत्परिमलभृतः । मधुपनिनदैः भ्रमराणां शब्दैः ताराधीशं चन्द्रं तर्जयन्तः अस्माकं निमीलने का ते शक्तिः इत्येवं अधिक्षिपन्तः जयन्ति । विलसन्तीत्यर्थः ॥ २४

> कूपस्तापत्रुटनपटुभिस्तापनीयालवालै-
> र्बालैः कूले कृतवसतिभिः केरपूगैः परीतः ।
> आलक्ष्योऽस्यास्त्वनतिसविधे सा सुधास्वादतोयै-
> रस्वप्रानां परमसुभृतौ यद्भवैरभ्यषेचि ॥ २५ ॥

अस्या दीर्घिकायाः अनतिसविधे किञ्चिद्विप्रकृष्टे देशे तु कूपः कश्चन आलक्ष्यः । कीदृशः कूपः । तापस्य ऊष्मणः त्रुटने भेदने । अपसारणे इत्यर्थः । पटुभिः समर्थैः । तपनीयस्य सुवर्णस्य विकारः तापनीयः । तापनीयाः । सुवर्णकृता इत्यर्थः । आलवाला येषां तैः तापनीयालवालैः । बालैः अभिनवैः । कूले तीरदेशे । कूपस्य इत्यर्थः । कृता लब्धा वसतिः यैः तैः कृतवसतिभिः । ईदृशैः केरपूगैः नारिकेलैः क्रमुकैश्च परीतः । यद्भवैः यस्मिन् कूपे विद्यमानैः सुधास्वादतोयैः अमृतमधुरैः अम्बुभिः अस्वप्रानां मत्स्यानां देवानां च असुभृतौ प्राणरक्षणार्थम् । चर्माणि द्वीपिनं हन्ति इतिवत् सप्तमी । सा दीर्घिका परं अभ्यषेचि अभिषिक्तवती । पूर्यते इत्यर्थः । सा कृत्रिमा वापी मत्स्यानां देवानां च प्राणभरणार्थं राज्ञीस्थाने अभिषिच्यते इति वा ॥ २५

> अङ्के तस्य प्रकृतिशिशिरैरर्कतापानुषङ्गं
> न्यक्कुर्वाणैस्तरुणतरुभिर्निष्कुटो देदिवीति ।
> मत्कान्तायां नियतमधुना दुःखितायां खगौघै-
> रुत्कूजद्भिः किमपि विलपन्नुत्कटार्तिः किलास्ते ॥ २६ ॥

तस्य कूपस्य अङ्के समीपदेशे निष्कुटः गृहारामः प्रकृतिशिशिरैः स्वभावशीतलैः अर्कतापस्य सूर्यस्य ऊष्मणः अनुषङ्गं सम्पर्कं अर्कतापानुषङ्गं न्यक्कुर्वाणैः तिरस्कुर्वद्भिः तरुणवृक्षैः देदिवीति भृशं शोभते। स निष्कुटः अधुना मत्कान्तायां दुःखितायां सत्यां उत्कटा प्रबला आर्तिः दुःखं यस्य सः उत्कटार्तिः। अत एव उत्कूजद्भिः उच्चैः शब्दं कुर्वद्भिः खगौघैः पक्षिसमूहैः करणैः किमपि किंचित् विलपन् आक्रन्दन् नियतं निश्चयेन आस्ते ॥ २६

तन्मध्ये च प्रतिनवलतावृन्दसन्दानिताशो
नूत्नै रत्नैर्निबिडघटितो मण्डपोऽखण्डितश्रीः।
रागप्रेमव्यतिकरजुषोर्यत्र यूनोः कयोश्चि-
ज्जागर्ति स्म प्रगुणितरसा नूतना कापि केलिः ॥ २७ ॥

तन्मध्ये तस्य निष्कुटस्य मध्ये च प्रतिनवानां लतानां वृन्देन समूहेन सन्दानिताः बद्धाः आशाः दिशः पर्यन्तदिशः यस्य सः प्रतिनवलतावृन्दसन्दानिताशः। नूत्नैः नूतनैः रत्नैः निबिडघटितः निबिडं यथा तथा घटितः निबद्धः। अखण्डिता श्रीः यस्य सः अखण्डितश्रीः। सम्पूर्णश्रीरिति यावत्। मण्डपः अस्ति इति शेषः। यत्र यस्मिन् मण्डपे कयोश्चित् ययोः कयोरपि। रागस्य प्रेम्णश्च व्यतिकरं विनियमनं जुषतः इति रागप्रेमव्यतिकरजुषौ। तथाभूतयोः यूनोः यूनः युवत्याश्च नूतना पूर्वं अननुभूता कापि केलिः क्रीडा प्रगुणितरसा प्रवृद्धरसयुक्ता जागर्ति। मम प्रियायाश्च सुतरां तथा भवति इति भावः ॥ २७

तस्योपान्ते लसति ललिता मालती भृङ्गमाला-
लीलाशाला सरसिजदृशा सादरं पालिता मे।
तत्केशालङ्कृतिसुखमनासादयन्त्यद्य मन्ये
खिन्ना मीलत्कुसुमनयना किञ्चन ध्यायतीव ॥ २८ ॥

तस्य मण्डपस्य उपान्ते समीपे ललिता कोमला भृङ्गमालायाः लीलाशाला केलिरङ्गः। मे सरसिजदृशा प्रियया सादरं पालिता माधवी लसति शोभते।

सा मालती तस्याः मत्प्रियायाः केशेषु अलङ्कृतिं अलङ्कारतया प्राप्तिं एव सुखं तत्केशालङ्कृतिसुखं अनासादयन्ती अलभमाना अद्य खिन्ना दुःखिता मीलत् कुसुममेव नयनं यस्याः सा मीलत्कुसुमनयना। तथाभूता किञ्चन ध्यायति इव। एवं अहं मन्ये विभावयामि ॥ २८

एतांश्चान्यानपि परिलसत्सन्निवेशान् प्रदेशान्
पश्यन् विश्राणितजनधृतीनश्लथाश्चर्यबुद्धिः।
आलोकेथास्तदनु निकषा तत्र माकन्दवीथिं
प्रीतिस्थानं किमपि लतिकामन्दिरं मत्प्रियायाः ॥ २९ ॥

एतान् पूर्वं वर्णितान् च अन्यानपि। परिलसन् सन्निवेशः येषां तान् परिलसत्सन्निवेशान्। विश्राणिता दत्ता उत्पादिता जनेभ्यः धृतिः प्रीतिः यैः तान् विश्राणितजनधृतान् प्रदेशान् पश्यन् त्वम्। अश्लथा दृढा आश्चर्यबुद्धिः यस्य सः अश्लथाश्चर्यबुद्धिः। तथा सन् तदनु तत्र। माकन्दवीथिम्। माकन्दाः सहकारवृक्षाः यस्याः वीथ्याः पार्श्वयोः सा माकन्दवीथिः तां निकषा तस्याः समीपे। मत्प्रियायाः प्रीतिस्थानं किमपि लतिकामन्दिरं आलोकेथाः द्रक्ष्यसि २९

तत्र स्निग्धैर्निजपरिजनैः सप्रवालैः प्रसूनैः
क्लृप्ते तल्पे तुहिनकणिकाशीतले कोमलाङ्गी।
शेते तापप्रशमविधये नूनमद्यायताक्षी
चान्द्री सान्ध्ये जलदशकले स्वांशुभिन्ने कलेव ॥ ३० ॥

तत्र तस्मिन् लतिकामन्दिरे स्निग्धैः स्नेहयुक्तैः निजपरिजनैः कर्तृभिः। सप्रवालैः प्रवालसहितैः प्रसूनैः करणैः क्लृप्ते निर्मिते। अत एव तुहिनकणिका-शीतले तुहिनकणिकाः नीहारशकलानि इव शीतले तल्पे अद्य कोमलाङ्गी आयताक्षी सुन्दरी तापप्रशमविधये तापप्रशमं कर्तुं शेते नूनम्। का इव। सान्ध्ये सन्ध्याकालभवे स्वांशुभिः निजकिरणैः भिन्ने सम्मिश्रिते जलदशकले मेघखण्डे चान्द्री कला चन्द्रस्य कला इव ॥ ३०

तामभ्याशस्थितिजुषि रणद्भृङ्गमाले तमाले
बाले नीलोपलपटलिकाबद्धमूले निलीनः ।
स्वैरं निर्वर्णय[1] सुवदनां मेघषण्डादकाण्डे
विद्युद्वल्लीमिव निपतितां भूतले वेपमानाम्[2] ॥ ३१ ॥

अभ्याशे समीपे स्थितिं जुषते इति अभ्याशस्थितिजुट् । तस्मिन् समीपस्थे इत्यर्थः । रणतां शब्दं कुर्वतां भृङ्गाणां माला यस्मिन् तस्मिन् रणद्भृङ्गमाले । नीलोपलपटलिकया इन्द्रनीलशिलासमूहेन बद्धं मूलं यस्य तस्मिन् नीलोपलपटलिकाबद्धमूले बाले तमाले तमालवृक्षे निलीनः निषण्णः । वेपमानाम् । विरहदुःखादिति भावः । तां सुवदनां स्वैरं निर्बाधं निर्वर्णय । कीदृशीं सुवदनाम् । अकाण्डे अकस्मात् मेघषण्डात् भूतले निपतितां विद्युद्वल्लीमिव स्थिताम् ॥ ३१

भासां चक्रैः परिसरभुवं भासयन्तीं समन्ता-
च्चान्द्रैः पादैरिव परिगतां कान्तिमध्येतुकामैः ।
मानातीते मदनदहने हन्त दन्दह्यमाना-
मेनां जानीह्यलसगमनां सौम्य मत्प्राणनाथाम् ॥ ३२ ॥

हे सौम्य एनां अलसगमनां सुन्दरीं मत्प्राणनाथां जानीहि । कीदृशीं अलसगमनाम् । चान्द्रैः चन्द्रसंबन्धिभिः पादैः किरणैः कान्तिं अस्याः सौन्दर्यं अध्येतुकामैः अध्येतुं इच्छद्भिः सद्भिः परिगतामिव भासां चक्रैः प्रभायाः मण्डलैः समन्तात् परिसरभुवं भासयन्तीम् । मानातीते इयत्तारहिते मदनदहने कामाग्नौ दन्दह्यमानां भृशं दह्यमानाम् । हन्त इति शोकं द्योतयति ॥ ३२

सौदर्येन्दोरुदयशिखरी सौकुमार्यप्रपञ्च-
स्यैका मूलप्रकृतिरुदधिः कान्तिकल्लोलिनीनाम् ।
सिद्धान्तार्थस्थितिरविचला चित्तजन्मागमानां
तत्रालक्ष्यं तरलनयनं जीवितं[3] मामकीनम् ॥ ३३ ॥

---

१ निर्वर्पय Corrected into निर्वर्णय. २ वोपमानाम्. ३ तरलनयनाजीवितं.

तत्र तस्मिन् लतिकामन्दिरे। तरले नयने यस्य तत् तरलनयनं मामकीनं जीवितम्। मत्प्राणनाथेत्यर्थः। आलक्ष्यम्। कीदृशं जीवितम्। सौन्दर्यमेव इन्दुः सौन्दर्येन्दुः। तस्य उदयशिखरी उदयपर्वतः। सौकुमार्यमेव प्रपञ्चः लोकः। तस्य एका मूलप्रकृतिः। कान्तय एव कल्लोलिन्यः नद्यः कान्तिकल्लोलिन्यः। तासां उदधिः समुद्रः। चित्तजन्मनः कामस्य आगमानां वेदानाम्। कामतन्त्राणामित्यर्थः। अविचला स्थिरा सिद्धान्तार्थस्य स्थितिः सिद्धान्तार्थस्थितिः॥ ३३

**भाग्योन्मेषः किमु समुदितो मूर्तिमान् नेत्रभाजा-**
**मन्या किंस्विद्भुवनविजयप्रक्रिया पुष्पकेतोः।**
**स्त्रैणी सृष्टिः किमियमपरा पद्मयोनेरितीत्थं**
**शङ्का मन्ये मनसि भविता पश्यतस्तां प्रियां मे॥ ३४॥**

तां मे प्रियां पश्यतः। तव इति शेषः। इत्थं शङ्का मनसि भविता उदेष्यति इति अहं मन्ये। कीदृशी शङ्का। इयं नेत्रभाजां नयनयुक्तानां भाग्योन्मेषः मूर्तिमान् समुदितः किमु। इयं इति सर्वत्र योज्यम्। इयं पुष्पकेतोः कामस्य अन्या अभूतपूर्वा भुवनविजयप्रक्रिया किंस्वित्। इयं पद्मयोनेः ब्रह्मणः अपरा असाधारणी स्त्रैणी स्त्रीविषयिका सृष्टिः। इत्थं शङ्का इति योजना॥ ३४

**नेत्राभ्यां तां नलिननयनां निश्चलाभ्याममीभ्यां**
**साक्षात्कुर्वन्नथ सवयसां तत्र मध्ये सखीनाम्।**
**आश्चर्याब्धौ मुहुरनवधौ दूरमग्नः परं वा**
**स्वात्मानं वा गणयितुमपारीण एव ध्रुवं स्याः॥ ३५॥**

तत्र तस्मिन् लतिकामन्दिरे सवयसां समानवयसां सखीनां मध्ये तां नलिननयनां सुन्दरीं अमीभ्यां तावकाभ्यां निश्चलाभ्यां नेत्राभ्यां साक्षात्कुर्वन् पश्यन् त्वम्। अमीभ्यामिति हस्तनिर्देशः। पुरोवर्तिनस्तव इति भावः। अनवधौ अवधिरहिते अपारे आश्चर्याब्धौ आश्चर्यसमुद्रे भृशं निमग्नः सन्

परं अन्यं वा स्वात्मानं वा गणयितुं ज्ञातुं अपारीणः अशक्तः एव ध्रुवं निश्चयं स्याः भवेः ॥ ३६

लब्धोमाया इयमतिचिरादर्चितायाः[1] प्रसादा-
दित्यामोदी गुरुजन उमेत्येव यामुद्गृणीते ।
मारस्यास्त्रं मुनिजनमनोजित्वरं[2] पौष्पमन्यत्
पञ्चेभ्योऽसाविति कविगणो मारचेमन्तिकेति ॥ ३६ ॥

इयं अतिचिरात् बहुकालं अर्चितायाः उमायाः प्रसादात् लब्धा इति हेतोः गुरुजनः माता पिता मातुलः इत्यादिजनः यां उमा इत्येव उद्गृणीते । अस्याः उमा इत्येव नाम अकरोत् । असौ इयं मुनिजनानां मनांसि जेतुं शीलमस्य इति मुनिजनमनोजित्वरं पञ्चेभ्यः "अरविन्दमशोकं च चूतं च नवमालिका । नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः" ( अमरः ) इति प्रसिद्धेभ्यः अन्यत् भिन्नं पौष्पं पुष्पमयं मारस्य कामस्य अस्त्रं इति कृत्वा कविगणः मारचेमन्तिका इति तां उद्गृणीते इत्यनुषज्यते ॥ ३६

वेणीभारो विहसतितरां वैभवं वारिवाह-
श्रेणीभासां वदनसुषमा सोदरी शारदेन्दोः ।
वाणी वीणामधुरिमधुरामातुरीकर्तुमीष्टे
नाणीयांसो नयनयुगलीविभ्रमाः पक्ष्मलाक्ष्याः ॥ ३७ ॥

पक्ष्मलाक्ष्याः सुन्दर्याः वेणीभारः केशभारः वारिवाहश्रेणीभासां वारिवाहस्य मेघस्य श्रेण्याः निकरस्य भासां शोभानां वैभवं विहसतितरां अत्यन्तमपहसति । पक्ष्मलाक्ष्याः इति सर्वत्र योजनीयम् । तस्या वदनसुषमा मुखश्रीः शारदेन्दोः शरत्कालचन्द्रस्य सोदरी भवति इति शेषः । तत्समा इत्यर्थः । तस्याः वाणी वाक् वीणायाः मधुरिमधुरां माधुर्यसम्पत्तिं आतुरीकर्तुं पीडयितुम् । विजेतुमिति यावत् । ईष्टे प्रभवति । तस्या नयनयुगल्याः नेत्रद्वन्द्वस्य विभ्रमाः न अणीयांसः महत्तरा एव ॥ ३७

---

१. इयमितिचिरादर्चितायाः २. जित्वरं.

शल्यायेते करसरसिजे पल्लवाडम्बराणां
कल्याणाद्रेरुरसिजभरः कल्यभावं क्षिणोति ।
कोदण्डज्या कुसुमधनुषः कोमला रोमरेखा
खेदं धत्ते कुवलयदृशः कुञ्चिता मध्यवल्ली ।। ३८ ।।

कुवलयदृशः सुन्दर्याः करसरसिजे सरसिजे इव करौ। पङ्कजसदृशौ करौ इत्यर्थः। पल्लवाडम्बराणां शल्यायेते शल्यमिवाचरतः। कुवलयदृशः इति सर्वत्र योजनीयम्। तस्याः उरसिजभरः कुचभरः कल्याणाद्रेः कनकपर्वतस्य मेरोः कल्यभावं स्वास्थ्यम्। श्रेष्ठत्वमिति यावत्। क्षिणोति नाशयति। तस्याः कोमला रोमरेखा कुसुमधनुषः कामस्य कोदण्डज्या धनुषो मौर्वी भवति इति शेषः। तस्याः कुञ्चिता नम्रतां प्रापिता सती। श्रोणीभारादिति भावः। मध्यवल्ली खेदं धत्ते तस्याः पीडां जनयति ॥ ३८

श्रोणीबिम्बं श्रयति पुलिनश्लाघनीयामभिख्या-[1]
मूरू मारक्षितिपनगरीतोरणस्तम्भशोभौ ।
पादौ पाथोरुहसहचरीं चातुरीमादधाते
मातङ्गीयां दधति गतयो माधुरीमानताङ्ग्याः ।। ३९ ।।

आनताङ्ग्याः सुन्दर्याः श्रोणीबिम्बं जघनचक्रं पुलिनस्य श्लाघनीयां अभिख्यां शोभां श्रयति बिभर्ति। आनताङ्ग्याः इति सर्वत्र योज्यम्। तस्याः ऊरू मार एव यः क्षितिपः नृपतिः तस्य नगर्याः तोरणस्तम्भयोः शोभा इव शोभा ययोः तौ मारक्षितिपनगरीतोरणस्तम्भशोभौ। तस्याः पादौ पाथोरुहस्य पङ्कजस्य सहचरीं सदृशीं पाथोरुहसहचरीं चातुरीं सौन्दर्यं आदधाते बिभ्रतः। तस्याः गतयः मातङ्गस्य गजस्य इयं मातङ्गीया। तां माधुरीं दधति बिभ्रति ॥ ३९

---

1. श्लघनीया Corrected into श्लाघनीया

तां मुग्धाक्षीमनुपमवपुर्वल्लरीं वर्णयन्ती
ताम्यत्येव ध्रुवमपि हि सा वैधसी वक्त्रपङ्क्तिः ।
आस्माकीना बत पुनरियं वाग्विभूतिर्वराकी
किं वा कुर्यादविकलविलासोत्तरङ्गे तदङ्गे[१] ॥ ४० ॥

अनुपमा साम्यरहिता वल्लरी लता इव वपुः यस्याः तां अनुपमवपुर्वल्लरीं तां मुग्धाक्षीं सुन्दरीं वर्णयन्ती वर्णयितुं उद्युक्ता । वेधसः ब्रह्मणः इयं वैधसी वक्त्रपङ्क्तिः मुखचतुष्टयं अपि ध्रुवं निश्चयेन ताम्यत्येव ग्लाना भवत्येव । हि इति हेतौ । यत एवं अतः इयं पुनः आस्माकीना मदीया वराकी । अत्यल्पा इति भावः । वाग्विभूतिः वाक्पाटवम् । अविकलैः सुसम्पूर्णैः विलासैः हेतुभिः उद्गताः तरङ्गाः यस्मिन् सः अविकलविलासोत्तरङ्गः । तस्मिन् तदङ्गे तस्याः अङ्गे विषये । अङ्गानां वर्णने विषये इति भावः । किं वा बत कुर्यात् । न किमपि कर्तुं शक्ता इत्यर्थः ॥ ४०

उत्प्रेक्षेऽहं ललितमधुरं यावदङ्गं कृशाङ्ग्या
वक्तुं तावत् प्रियसख मुहुस्तन्मयीभावलाभात् ।
वक्ता सोऽहं तदिदमुदितं सोऽप्ययं विप्रयोग-
स्त्वं श्रोतेति स्फुरति न हि मे कोऽपि भेदप्रसङ्गः ॥ ४१ ॥

कृशाङ्ग्याः सुन्दर्याः ललितं च मधुरं च ललितमधुरं अङ्गं अधिकृत्य इति शेषः । वक्तुं वर्णयितुं अहं यावदुत्प्रेक्षे तावत् हे प्रियसख मुहुः पुनः पुनः तन्मयीभावलाभात् तन्मयोऽहं भवामि इति हेतोः । सः अहं वक्ता । तत् इदं उदितम् । सोऽपि अयं विप्रयोगः आवयोः विरहः । त्वं श्रोता । इत्येवं कोऽपि भेदप्रसङ्गः मे न स्फुरति ॥ ४१

सा मृद्वङ्गी जलदसमये सम्प्रति प्राग्भवीयै-
र्दुःखोदर्कैर्दुरितनिवहैर्दूरितप्राणनाथा ।
जाता नूनं मनसिजशिखिज्वालजालावलीढा
मध्येऽरण्यं दवहुतभुजा दह्यमाना मृगीव ॥ ४२ ॥

---

१. तरङ्गे.

सा मृद्वङ्गी सुन्दरी सम्प्रति इदानीं जलदसमये वर्षाकाले प्राग्भवीयैः पूर्वजन्मभवैः दुःखमेव उदर्कः भाविफलं येषां तैः दुःखोदर्कैः दुरितनिवहैः पापसमूहैः दूरितः प्राणनाथः यस्याः सा दूरितप्राणनाथा सती। भर्त्रा वियुक्ता इत्यर्थः। मनसिजशिखिनः कामाग्नेः ज्वालानां जालेन समूहेन अवलीढा मनसिजशिखिज्वालजालावलीढा। "वह्नेर्द्वयोर्ज्वालकीलौ" (अमरः) इति ज्वालशब्दः पुल्लिङ्गोऽपि। कामाग्निदग्धा इत्यर्थः। तथा नूनं निश्चयेन जाता। का इव। अरण्यस्य मध्ये मध्येरण्यं दवहुतभुजा दावाग्निना दह्यमाना मृगी इव॥ ४२

मन्दं मन्दं मृदुनखमुखैः सादरं स्रंसयित्वा
यत्र न्यस्ता मुहुरपि मया पेलवाः[1] पुष्पमालाः।
भूयो भूयः क्षितिविलुठनैः सोऽयमद्यालसाङ्ग्याः
कष्टं धत्ते घनकचभरः[2] कर्कशान् भूपरागान्[3] ॥ ४३ ॥

यत्र यस्मिन् कचभरे मया सादरं नखमुखैः नखाग्रैः मन्दं मन्दं नितरां मृदु यथा तथा स्रंसयित्वा पेलवाः कोमलाः पुष्पमालाः न्यस्ताः। अद्य अलसाङ्ग्याः सुन्दर्याः सः अयं घनकचभरः निबिडः केशभारः भूयः भूयः मुहुर्मुहुः क्षितौ भूतले विलुठनैः क्षितिविलुठनैः कर्कशान् भूपरागान् भूरेणून् धत्ते। कष्टम्॥ ४३

भ्रूकोदण्डस्फुरणरहितोऽप्यञ्जनासङ्गहान्या
मालिन्यं च स्फुटमपनयन् नूनमच्छिन्नधारैः[4]।
आतन्वानैर्मनसिजमहावैद्युताग्नेर्विवृद्धिं[5]
बाष्पासारैः स्नपयति धरां नेत्रमेघो मृगाक्ष्याः ॥ ४४ ॥

मृगाक्ष्याः सुन्दर्याः नेत्रमेव मेघः नेत्रमेघः। बाष्पाः अश्रूणि एव आसाराः वृष्टयः बाष्पासाराः। तैः धरां भूमिं नूनं स्नपयति सिञ्चति। कीदृशैः बाष्पा-

---

१. पेलवः. २. घनकुचभरः. ३. कर्कशात् भूपरागात्. ४. नूनमाच्छिन्नधारैः. ५. वैद्युताग्नेर्विवृद्धं.

धारैः। अच्छिन्ना धारा प्रवाहः येषां तैः अच्छिन्नधारैः। मनसिजः काम एव महान् वैद्युताग्निः विद्युत्सम्बन्धी अग्निः मनसिजमहावैद्युताग्निः। तस्य वृद्धिं आतन्वानैः। कीदृशः नेत्रमेघः। भ्रूरेव यः कोदण्डः तस्य स्फुरणेन रहितः अपि। अञ्जनस्य यः आसङ्गः सम्पर्कः तस्य हान्या अभावेन अञ्जनासङ्गहान्या मालिन्यं कृष्णवर्णतां स्फुटमपनयन् अपि। अपि इति अत्रापि योज्यम्। मेघपक्षे ऐन्द्रधनुषः कृष्णवर्णस्य च अभावः सूचितः। तथापि वर्षः इति अत्र विरोधाभासः॥ ४४

वक्त्राम्भोजे विहितविहृतेरत्र शृङ्गारलक्ष्म्या
रत्नादर्शौ रजतरचिते सैकते कान्तिनद्याः।
म्लानच्छाये नियतमधुना मद्वियोगाभितप्ते
कुर्वाते त्वां गुरुतरशुचं गण्डलेखे कृशाङ्ग्याः॥ ४५॥

कृशाङ्ग्याः सुन्दर्याः गण्डलेखे कपोलद्वयं त्वाम्। गुरुतरा शुक् दुःखं यस्य सः गुरुतरशुक्। तथाभूतं नियतं कुर्वाते। कीदृशे गण्डलेखे। अत्र अम्भोजमिव वक्त्रं वक्त्राम्भोजम्। तस्मिन् विहिता कृता क्रीडा यया तस्याः विहितविहृतेः शृङ्गारलक्ष्म्याः शृङ्गारश्रियः रत्नादर्शौ रत्नदर्पणभूते। कान्तिरेव नदी कान्तिनदी। तस्याः रजतरचिते रजतेन निर्मिते सैकते पुलिनद्वयभूते। अधुना मद्वियोगेन अभितप्ते। अत एव म्लाना क्षीणा छाया शोभा ययोः ते म्लानच्छाये॥ ४५

याते यत्र स्मरणसरणिं जातु बाह्यैः सहाक्षै-
श्चेतोवृत्तिर्मम लयमयीमेति कामप्यवस्थाम्।
मन्ये सम्प्रत्यशिशिरतरैर्दीर्घनिःश्वासवातैः
शुष्यन्नास्ते मधुरिमधरः सोऽधरः कातराक्ष्याः॥ ४६॥

कातराक्ष्याः सः मधुरिमाणं धारयति वहति इति मधुरिमधरः अधरः सम्प्रति मद्वियोगदशायां अशिशिरतरैः नितरां उष्णैः दीर्घनिःश्वासवातैः शुष्यन् आस्ते। इत्यहं मन्ये। यत्र यस्मिन् अधरे जातु स्मरणसरणिं याते प्राप्ते सति।

यस्मिन्नवसरे मया स्मृते सति इत्यर्थः। मम चेतोवृत्तिः बाह्यैः अक्षैः इन्द्रियैः सह लयमयीं लयस्वरूपिणीं काममप्यवस्थां एति ॥ ४६

स्थालीभूषां दधदचरमक्ष्माभृतः[1] शृङ्गरङ्ग-
त्प्रालेयांशोः श्रियमविकलां यः पुरा स्वीचकार।
वक्षोजोऽस्याः स पुनरधुना धारयन्नश्रुधारां[2]
धत्ते खेलत्रिदशसरितो मेरुशैलस्य लक्ष्मीम् ॥ ४७ ॥

स्थालीभूषां वृत्ताकारं भूषणविशेषं दधत्। केरलस्त्रीणां कश्चन कण्ठाभरणविशेषः स्थालीभूषेति उच्यते। तादृशः अस्याः यः वक्षोजः कुचः पुरा। शृङ्गे अग्रभागे रङ्गत् क्रीडन्। वर्तमान इत्यर्थः। प्रालेयांशुः चन्द्रः यस्य तस्य शृङ्गरङ्गत्प्रालेयांशोः अचरमक्ष्माभृतः उदयपर्वतस्य अविकलां श्रियं स्वीचकार सः वक्षोजः अधुना विरहदशायां पुनः अश्रुधारां धारयन् वहन्। खेलन्ती प्रवहन्ती इत्यर्थः। त्रिदशसरित् आकाशगङ्गा यस्मिन् तस्य खेलत्रिदशसरितः मेरुशैलस्य लक्ष्मीं धत्ते ॥ ४७

श्रोणीक्षोणीवलयमुपरिप्रोल्लसद्व्योम चञ्च-
त्काञ्चीरत्नाकरपरिगतं पालितं मन्मथेन।
नूनं याते मयि जलधरे दैवदोषेण दूरं
दैन्यं[3] यायात् प्रबलविरहावग्रहे जृम्भमाणे ॥ ४८ ॥

उपरि ऊर्ध्वभागे प्रोल्लसत् व्योम मध्यभागरूपः आकाशः यस्य तत् उपरिप्रोल्लसद्व्योम। चञ्चन् चलत् काञ्ची एव यः रत्नाकरः समुद्रः तेन परिगतं चञ्चत्काञ्चीरत्नाकरपरिगतम्। मन्मथेन राज्ञा पालितं श्रोणीक्षोणीवलयं श्रोणी जघनं एव क्षोणीवलयं भूमण्डलम्। दैवदोषेण हेतुना मयि मद्रूपे जलधरे मेघे दूरं याते सति। अत एव प्रबलः उत्कटः विरह एव अवग्रहः अनावृष्टिः प्रबलविरहावग्रहः। तस्मिन् जृम्भमाणे च सति दैन्यं दीनावस्थां नूनं निश्चयेन यायात्। ४८

---

१. दधदचरक्ष्माभृतः. २. धारयन्नश्रुधारा. ३. देवं.

यत्संस्पर्शप्रतिनवसुधासेकसाम्राज्यलक्ष्मी-
दूरभ्रष्टे मम करतले क्ष्लाम्यतो नित्यमेव ।
एतत्संवाहनसुखमनासादयन्तौ तु तस्या-
स्तावप्यूरू सपदि किमपि क्ष्लाम्यतः कोमलाङ्ग्याः ॥ ४९ ॥

मम करतले द्वौ करौ । ययोः ऊर्वोः संस्पर्श एव यः प्रतिनवसुधासेकः तस्य साम्राज्यलक्ष्म्याः दूरभ्रष्टे यत्संस्पर्शप्रतिनवसुधासेकसाम्राज्यलक्ष्मीदूरभ्रष्टे सती नित्यमेव क्ष्लाम्यतः ग्लानिं वहतः । तौ तस्याः कोमलाङ्ग्याः मृद्वङ्ग्याः । सुन्दर्याः इत्यर्थः । ऊरू अपि एतत्संवाहनसुखं एताभ्यां करतलाभ्यां यत् संवाहनं तदेव यत् सुखं तत् अनासादयन्तौ अलभमानौ सपदि किमपि क्ष्लाम्यतः ॥ ४९

पादौ चास्या मदनदहनाङ्गारभङ्गाभिशङ्का-
मातन्वाते जितकिसलयैरात्मभासां प्ररोहैः ।
यत्सौभाग्यं कलयितुमलं केवलं धन्यजन्मा
मूर्धा सोऽयं सुचरितनिधिः सोऽपि कङ्केलिवृक्षः ॥ ५० ॥

अस्याः पादौ च । जितं किसलयं यैः तैः जितकिसलयैः आत्मभासां निजशोभानां प्ररोहैः अङ्कुरैः हेतुभिः मदनदहनाङ्गारभङ्गाभिशङ्कां इमौ मदनदहनस्य कामाग्नेः अङ्गारभङ्गौ अङ्गारखण्डौ इति अभिशङ्कां आतन्वाते जनयतः । ययोः पादयोः सौभाग्यं कलयितुं सः अयं मम । धन्यं जन्म यस्य सः धन्यजन्मा मूर्धा शिरः । सुचरितनिधिः सुचरितानां पुण्यानां निधिः सः "पार्श्वे तस्य" इति (२२) श्लोके पूर्वं उक्तः कङ्केलिवृक्षः अशोकवृक्षः अपि केवलं अलं समर्थौ ॥ ५०

अभ्यर्णस्थानपि भसितयत्युद्भटो देहदाह-
स्तन्तन्येरन् सलिलनिधयः सन्ततैरश्रुपूरैः ।
श्वासा वासावसथवलभीदीपनिर्वाणदक्षं[2]-
द्राघिष्ठत्वं दधति दलितेन्दीवरान्तर्दलाक्ष्याः[3] ॥ ५१ ॥

---

१. मातन्वाने । २. निर्वाणदक्ष– । ३. वरान्तदलाक्ष्याः corrected into वरान्तर्दलाक्ष्याः ।

दलितस्य सद्यः प्रफुल्लस्य इन्दीवरस्य अन्तर्भागे यः दलः स इव अक्षि नेत्रं यस्याः तस्याः दलितेन्दीवरान्तर्दलाक्ष्याः। सुन्दर्या इत्यर्थः। उद्भटः उद्धतः देहतापः। विरहजनित इति यावत्। अभ्यर्णस्थान् समीपस्थानपि जनान् भक्षितयति भस्मसात्करोति। नितरां तापयति इत्यर्थः। दलितेन्दीवरान्तर्दलाक्ष्याः इति सर्वत्र योजनीयम्। तस्याः सन्ततैः निरन्तरैः अश्रुपूरैः सलिलनिधयः समुद्रा अपि तन्तन्येरन् वर्धेरन्। तस्याः श्वासाः दीर्घनिश्वासाः वासावसथस्य वासगृहस्य वलभ्यां यः दीपः तस्य निर्वाणे प्रशमने दक्षं वासावसथवलभीदीपनिर्वाणदक्षम्। तादृशं द्राघिष्ठत्वं अतिदीर्घत्वं दधति बिभ्रति। निर्वाणदक्षद्राघिष्ठत्वं इति समस्तमेव वा पदमस्तु ॥ ५१

क्वासौ तस्याः सरसकदलीकोमला गात्रवल्ली
क्वायं मूर्च्छत्प्रलयदहनप्रक्रमो विप्रयोगः।
सञ्जातश्चेद्बत तयोस्तादृशः सन्निपातः
किं किं ब्रूमः शिव शिव विधौ जाग्रति प्रत्यनीके ॥ ५२ ॥

तस्याः सरसकदलीकोमला सरसा मृदुला कदली इव कोमला असौ प्राक् वर्णिता गात्रवल्ली क्व। मूर्च्छतः प्रलयदहनस्य कल्पान्ताग्नेः प्रक्रम इव प्रक्रमो यस्य सः मूर्च्छत्प्रलयदहनप्रक्रमः अयं विप्रयोगः विरहः क्व। मूर्च्छन् इति वा पाठः। तदा मूर्च्छन् अयं विप्रयोगः इति योजना। प्रत्यनीके प्रतिकूले विधौ जाग्रति सति तयोः गात्रवल्याः विरहस्य च तादृशः सन्निपातः समागमः सञ्जातश्चेत्। बत बत अहो महाकष्टम्। शिव शिव वयं किं किं ब्रूमः ॥ ५२

विश्लेषार्तेरसहनतया निर्गतैः कण्ठदेशा-
दाशाबद्धैरिव बहिरवस्थास्नुभिः प्राणशेषैः।
आलीलोकैरनुकलमशून्यान्तिकाया नताङ्ग्या-
श्चेष्टाः काश्चिच्छृणु नववियोगेऽत्र सम्भाव्यमानाः ॥ ५३ ॥

आलीलोकैः सखीजनैः अनुकलं सदा। अशून्यं अत्यक्तं अन्तिकं यस्याः तस्याः अशून्यान्तिकायाः नताङ्ग्याः सुन्दर्याः अत्र अस्मिन् नववियोगे नवे मद्विरहे सम्भाव्यमानाः मया अभ्यूह्यमानाः काश्चिच्चेष्टाः शृणु। कीदृशैः

आलीलोकैः। विश्लेषार्तैः विरहदुःखस्य असहनतया सोढुं अशक्तत्वात् कण्ठदेशात्। मत्प्रियायाः इति शेषः। निर्गतैः बहिर्गतैः। आशा पुनः-समागमाशंसा। तया बद्धैः निरुद्धैः आशाबद्धैः अत एव बहिः अवस्थास्नुभिः बहिर्भागे तस्याः समीपे एव वर्तमानैः तस्याः प्राणशेषैः इव स्थितैः इति शेषः॥ ५३

पादौ[1] संवाहय सुवदने चन्द्रलेखे निषिञ्चेः
किञ्चित् किञ्चित् तुहिनपयसां शीकरैरङ्गमङ्गम्।
अल्पालापे नवबिसलतामर्पयास्याः स्तनाग्रे
मुक्ताजालं विकिर हृदये सत्वरं चित्रलेखे॥ ५४॥

हे सुवदने त्वं अस्याः पादौ संवाहय। हे चन्द्रलेखे तुहिनपयसां हिम-जलानां शीकरैः बिन्दुभिः अस्याः। अस्याः इति सर्वत्र योज्यम्। अङ्गमङ्गं सर्वाण्यप्यङ्गानि किञ्चित् किञ्चित् निषिञ्चेः। हे अल्पालापे नवबिसलतां नवं मृणालवलयं अस्याः स्तनाग्रे अर्पय। हे चित्रलेखे अस्याः हृदये सत्वरं शीघ्रं मुक्ताजालं मौक्तिकमणिवृन्दं विकिर। सुवदना चन्द्रलेखा अल्पालापा चित्रलेखा इति चतस्रः नायिकायाः सवयसः सख्यः। "एवंप्रायं बहु सवयसां वाक्यं" इति उत्तरत्र (५६) श्लोके अस्य योजना॥ ५४

धारारूढो विरहदहनश्चैष[2] पाटीरपाथो-
धोरण्याशु स्नपयत सखीमापदाम्भोजचूडम्[3]।
धीरा यूयं भवत शनकैर्धारयित्वाङ्गमेनां
धारागारं नयत नचिरादेव नान्योऽभ्युपायः॥ ५५॥

एष विरहदहनः विरहाग्निः धारारूढः उत्कटः संवृत्तः। पाटीरपाथोधोरण्या पाटीरपाथसः चन्दनजलस्य धोरण्या प्रवाहेण सखीं आपदाम्भोजचूडं पदा-म्भोजादारभ्य चूडापर्यन्तं स्नपयत निषिञ्चत। यूयं सख्यः धीराः अप्रमत्ताः भवत। अस्याः अङ्गं शनकैः धारयित्वा एनां नचिरात् शीघ्रमेव धारागारं

---

१ पाणौ. २. दहनस्सैष। ३. स्नपयत...मापदा।

जलधारायन्त्रयुक्तं गृहविभागं नयत प्रापयत। अन्यः अभ्युपायः सन्तापशमन-मार्गः नास्ति। अस्यापि उत्तरश्लोके योजना॥ ५५

एवंप्रायं बहु सवयसां वाक्यमाकर्ण्य कान्ता
सान्तर्हासप्रणयकरुणा निर्भरं तां निरीक्ष्य।
आस्तां सर्वं न खलु तिमिरध्वस्तिरन्यत्र भानो-
र्दृष्टा लोके क्वचिदिति सखीः सस्मितं रुन्धतीव॥ ५६॥

एवंप्रायं पूर्वस्मिन् श्लोकद्वये यदुक्तं तद्रूपं सवयसां सखीनां बहु विविधं वाक्यं आकर्ण्य कान्ता मत्प्रिया। अन्तर्हासः गूढविहासः प्रणयः स्नेहः करुणा च अन्तर्हासप्रणयकरुणाः। तत्सहिता सान्तर्हासप्रणयकरुणा सती निर्भरं भृशं ताः सखीः निरीक्ष्य। सर्वं आस्ताम्। नात्र प्रयत्नः कश्चिदपि कार्यं इत्यर्थः। तिमिरध्वस्तिः तमसः निराकरणं भानोरन्यत्र भानुं सूर्यं विना लोके क्वचित् न खलु दृष्टा। मत्प्रियं विना मद्दुःखध्वस्तिर्नास्तीत्याशयः। इति इत्थं सस्मितं सखीः रुन्धती इव सा भवेत्। सा भवेत् इति अतः आरभ्य "धीरास्मि" इति (६४) श्लोकपर्यन्तं सर्वत्र यथायोग्यं अध्याहार्यम्॥ ५६

मा भूद्व्रीडा मनसि मदन त्वय्यनागस्कृतं मां
बालामित्थं विशिखनिकरैर्निर्दयं विध्यतस्ते।
चित्तं यत्तु स्वभवनमिदं दग्धुमुत्तिष्ठसे त्वं
युक्तं तत् किं भवत इति वा पुष्पबाणं क्षिपन्ती[2]॥ ५७॥

हे मदन। आगः अपराधं करोति इति आगस्कृत्। न आगस्कृत् अनागस्कृत्। त्वयि अनागस्कृतं अनपराधिनीं बालां मां विशिखनिकरैः शरसमूहैः निर्दयं विध्यतः प्रहरतः ते मनसि व्रीडा मा भूत्। स्वस्य तवैव भवनं जन्मस्थानम्। मदनस्य चित्तजन्मत्वात्। इदं चित्तं मम हृदयं दग्धुं त्वं उत्तिष्ठसे प्रक्रमसे इति तु यत् तत् किं भवतः युक्तम्। इति इत्थं पुष्पबाणं कामदेवं क्षिपन्ती॰अधिक्षिपन्ती वा सा भवेत्॥ ५७

---

१. तां. २. क्षिपन्ति।

मुक्ताहारं प्रियतममम् चित्ततापप्रशान्त्यै
मुग्धे धेहि स्तनकलशयोरित्थमुक्ते स्वसख्या ।
क्वासौ क्वासौ मम दयित इत्युत्सुका पुष्पतल्पा-
दुत्तिष्ठन्ती परिजनधृता सा पुनः शायिता वा ॥ ५८ ॥

हे मुग्धे चित्ततापप्रशान्त्यै हृदयसन्तापस्य प्रशान्त्यै प्रियतमं तव अत्यन्तं प्रियं अमुं मुक्ताहारं हारमालां स्तनकलशयोः धेहि धारय । इत्थं स्वसख्या उक्ते । मुक्तः विरहदुःखात् परित्यक्तः आहारः भक्षणं येन तं अमुं प्रियतमं तव प्राणवल्लभं चित्ततापप्रशान्त्यै स्तनकलशयोः धेहि इत्येवं तद्वाक्यस्यार्थं अवबुद्धय । असौ मम दयितः क्व असौ क्व इति भणन्ती उत्सुका सती पुष्पतल्पात् उत्तिष्ठन्ती सा परिजनैः धृता पुनः पुष्पतल्पे शायिता वा भवेत् ॥ ५८

अश्रान्तोत्थं करकिसलयेनाश्रुपूरं प्रमृज्य
प्राप्यैकाग्र्यं कथमपि गिरो वारयित्वा सखीनाम् ।
स्वप्नाश्लेषप्रभवमपि मे सौख्यमाकाङ्क्षमाणा
बाला निद्रामभिनयति वा पक्ष्मसम्मीलनेन ॥ ५९ ॥

अश्रान्तोत्थं अश्रान्तं अनवरतं उत्थं निर्गतं अश्रुपूरं कराकिसलयेन प्रमृज्यं कथमपि येन केनापि प्रकारेण ऐकाग्र्यं अनन्यचित्ततां प्राप्य सखीनां गिरः वारयित्वा मे स्वप्नाश्लेषप्रभवं सौख्यं अपि स्वप्ने मदालिङ्गनजनितं अपि सुखं आकाङ्क्षमाणा बाला पक्ष्मसम्मीलनेन निद्रां अभिनयति वा अभिनयन्ती वा भवेत् ॥ ५९

आद्ये यामे परमतिगते मन्दमुन्मील्य नेत्रे
पृच्छन्ती वा निजपरिजनं शेषभागं रजन्याः ।
तत्प्रत्युक्तिश्रवणसमये निष्पतद्बाष्पपूरा
संक्रन्दन्ती सपदि कुररीवाकुला वा मृगाक्षी ॥ ६० ॥

रजन्याः आद्ये यामे परं केवलं अतिगते अतीते सति नेत्रे मन्दं उन्मील्य निजपरिजनं रजन्याः शेषं भागं रजन्याः कियान् भागोऽवशिष्यते इति

पृच्छन्ती। ततः तत्प्रत्युक्तिश्रवणसमये तस्य निजपरिजनस्य प्रत्युक्त्याः एक एव यामो गतः इति प्रतिवचनस्य श्रवणवेलायां आकुला। निष्पतन् बाष्पपूरः यस्याः सा निष्पतद्बाष्पपूरा च सती कुररी इव चक्रवाकी इव सपदि संक्रन्दन्ती वा भवेत्॥ ६०

नैकेनैव स्वदितुमुचितं स्वादु यद्वस्तु लोके
स्वादीयस्सु प्रियतमवपुःसंगमश्चाग्रयायी[1]।
एकेनासौ हृदय भवता सेव्यते हन्त कस्मा-
दित्थं युक्त्या मुहुरपि निजं शिक्षयन्ती मनो वा॥ ६१॥

लोके यत् स्वादु वस्तु तत् एकेन। अन्येभ्यः अविभज्य इत्यर्थः। स्वदितुं न उचितम्। स्वादीयस्सु मधुरतरेषु वस्तुषु मध्ये प्रियतमवपुःसंगमः प्रियतमस्य वपुषा समागमः अग्रयायी मुख्यः। हे मदीय हृदय एकेन भवता। अन्येभ्यः देहादिभ्यः अविभज्य इति भावः। असौ प्रियतमवपुःसंगमः हन्त कष्टं कस्मात् सेव्यते त्वया अनुभूयते। इदं न उचितम्। इत्थं युक्त्या सयुक्तिकोपन्यासेन मुहुरपि पुनः पुनः निजं मनः शिक्षयन्ती उपदिशन्ती वा भवेत्॥ ६१

क्षारक्षेपः क्षत इव मृणालोपचारो न हारो
हारी हा हा किरति गरलं केवलं शीतपङ्कः।
मा मा साह्यं कुरुत मदनस्येति मूर्च्छोलतापा
मुग्धा स्निग्धं जनमनुपदं व्यालपन्ती मुहुर्वा॥ ६२॥

मृणालोपचारः तापप्रशमनार्थं अङ्गेषु मृणालवलयस्य धारणं क्षते क्षारक्षेप इव व्यथां वर्धयति। हारः न हारी न मनोज्ञः। न अनुकूलः इति यावत्। शीतपङ्कः उशीरादिलेपनं केवलं गरलं विषं किरति। यूयं मदनस्य साह्यं साहाय्यं मा मा कुरुत। मृणालोपचारादिभिरिति भावः। इति इत्थं मूर्च्छोलः उत्कटः तापः यस्याः सा मूर्च्छोलतापा। तथा सती सा मुग्धा

---

१. संगमं च corrected into संगमश्च।

सुन्दरी अनुपदं पदे पदे स्निग्धं जनं सखीजनं मुहुः व्यालपन्ती वा भवेत् ॥ ६२

मत्वा युक्तामसुभिरिह मां वस्तुतस्तैर्वियुक्तां[1]
मुक्ताशङ्कं प्रहरतु शरैरल्पको दर्पकोऽयम् ।
तत्त्वज्ञानं न हि खलु विधे यत्त्वमस्यानुकूल्यं
धत्से चित्रं तदिति वियति व्याहरन्ती[2] विधिं वा ॥ ६३ ॥

मां इह अद्य वस्तुतः तैः असुभिः वियुक्तां असुभिः प्राणैः युक्तां मत्वा अल्पकः क्षुद्रः अयं दर्पकः कामः । मुक्ता त्यक्ता आशङ्का यस्मिन् कर्मणि तत् मुक्ताशङ्कम् । मुक्ताशङ्कं यथा तथा शरैः प्रहरतु । तस्य तत्त्वज्ञानं वास्तवज्ञानं न हि खलु । हे विधे त्वं अस्य तत्त्वज्ञानरहितस्य कामस्य आनुकूल्यं साहाय्यं धत्से करोषि इति यत् तत् चित्रं आश्चर्यम् । इति इत्थं वियति आकाशे शून्ये विधिं व्याहरन्ती वा भवेत् ॥ ६३

धीरास्मि त्वं प्रिय ननु गतो दृक्पथान्मत्परीक्षा-
हेतोश्चेतोभवशरगणा मय्यमी कुण्ठिताग्राः ।
गर्वोन्नद्धां गिरमिति निजामार्तिमासूत्रयन्तीं[3]
सन्देष्टुं मत्सविधमथवा मानसं प्रेषयन्ती ॥ ६४ ॥

हे प्रिय त्वं मत्परीक्षाहेतोः अहं धीरा वा न वा इति परीक्षितुं ननु दृक्पथात् मम दर्शनमार्गात् गतः । अहं धीरा अस्मि । अमी चेतोभवशरगणाः चेतोभवस्य कामस्य शरगणाः शरसमूहाः मयि कुण्ठिताग्राः मां दारयितुं असमर्थाः । इति इत्थं निजां आर्तिं आसूत्रयन्तीं सूचयन्तीम् । किन्तु न प्रस्फुटं प्रकटयन्तीं इति भावः । गर्वोन्नद्धां गर्वेण उद्धतां च गिरं सन्देष्टुं मानसं मत्सविधं प्रेषयन्ती वा सा भवेत् ॥ ६४

---

१. वस्तुतस्तेवियुक्तां Corrected into वस्तुतस्तैर्वियुक्तां. २. व्यावरन्ती Corrected into व्याहरन्ती. ३. आसूत्रयन्ता.

आस्ते शेते भ्रमति भजते मूकतां बह्वबद्धं
ब्रूते रोदित्युदितकरुणं धैर्यमालम्बते च ।
मूर्च्छां प्राप्नोत्यपि च लभते चेतनामित्यशक्तो
वक्तुं वेधा अपि विरहजान्यङ्गनाचेष्टितानि ॥ ६५ ॥

सा आस्ते उपविशति च शेते च भ्रमति च । सा मूकतां भजते च बहु अबद्धं ब्रूते च । सा उदितकरुणं संजातदुःखं यथा तथा रोदिति च धैर्यं आलम्बते च । सा मूर्च्छां प्राप्नोति अपि च चेतनां संज्ञां लभते । इति हेतोः विरहजानि विरहे जातानि अङ्गनाचेष्टितानि अङ्गनानां चेष्टितानि वक्तुं वेधाः ब्रह्मा अपि अशक्तः असमर्थः । विरुद्धयोरीदृशयोर्द्वन्द्वयोरुभयमपि तासु सम्भाव्यते । अतः कीदृशी तासां चेष्टा इति निर्णेतुं न कोऽपि समर्थः इति भावः ॥ ६५

तस्यास्त्रस्यद्विपिनहरिणीशावमुग्धेक्षणाया
मन्दोदञ्चत्पवनविचलत्पद्मपत्राभिरामम् ।
श्रेयःशंसि स्फुरति नयनं वाममूरुश्च वक्ष्य-
त्यस्मद्वार्तां भवति पततामीश्वरे पार्श्वसंस्थे ॥ ६६ ॥

पततां पक्षिणां ईश्वरे नाथे । पक्षिश्रेष्ठे इत्यर्थः । भवति त्वयि पार्श्वसंस्थे तस्याः पार्श्वे स्थिते सति । तस्याः श्रेयःशंसि वामं नयनं स्फुरति । वामः ऊरुश्च अस्मद्वार्तां कुशलिनीं मदवस्थां वक्ष्यति । कीदृशं नयनम् । मन्दं उदञ्चता प्रचलता पवनेन हेतुना विचलतः पद्मस्य पत्रमिव अभिरामं मन्दोदञ्चत्पवनविचलत्पद्मपत्राभिरामम् । कीदृश्याः तस्याः । त्रस्यतः सभयस्य बिपिनहरिणीशाबस्य बालवनहरिण्याः इव मुग्धं मनोहरं ईक्षणं यस्याः तस्याः त्रस्यद्विपिनहरिणीशावमुग्धेक्षणायाः ॥ ६६

वक्ति ह्येतन्मम सुशकुनं वाञ्छितार्थोपलम्भं
प्रेयोवार्तानिशमनमृते प्रेप्सितं वा किमन्यत् ।
जानातीशः किल सकलमित्युत्सुका नूनमास्ते
मुग्धा युक्त्या किमपि कुतुकोदर्कमातर्कयन्ती ॥ ६७ ॥

१ कुतुकोदकया तर्कयन्ती.

एतत् सुशकुनं वामचक्षुषः वामस्य ऊरोश्च स्फुरणात्मकं वाञ्छितार्थोपलम्भं इष्टार्थलाभं वक्ति हि सूचयति हि। प्रेयसः प्रियतमस्य वार्तायाः निशमनं ऋते श्रवणं वर्जयित्वा अन्यत् किं मम प्रेप्सितं अस्ति। ईशः ईश्वरः सकलं सर्वं जानाति किल। इति सा उत्सुका सती युक्त्या यया कयापि संघटनया किमपि कुतुकोदर्कं कुतुकं तोषकरं भाविफलं आतर्कयन्ती आस्ते नूनम्॥ ६७

तस्मिन् काले तरलिमजुषां विस्मयोदञ्चितानां
लक्ष्यीभूतो मुहुरनुचरस्त्रैणनेत्राञ्चलानाम्।
मत्कान्ताया मदनदहनप्लुष्टसर्वाङ्गयष्टे-
रग्रे तिष्ठन् निगदितुमना मद्गिरं प्रारभेथाः॥ ६८॥

तस्मिन् काले यदा सा आतर्कयन्ती आस्ते तदा। तरलिमानं चञ्चलतां जुषते इति तरलिमजुट्। तादृशानाम्। चञ्चलानामित्यर्थः। विस्मयोदञ्चितानां विस्मयात् उदञ्चितानां उन्मीलितानाम्। अनुचरस्त्रीणां इमानि अनुचरस्त्रैणानि। तादृशानि नेत्राञ्चलानि अनुचरस्त्रैणनेत्राञ्चलानि। तेषां मुहुः लक्ष्यीभूतः सन्। तस्या अनुचरीभिः सविस्मयं चञ्चलैर्नेत्रैः निरीक्ष्यमाणः इत्यर्थः। मदनदहनेन कामाग्निना प्लुष्टा दग्धा सर्वाङ्गयष्टिः यस्याः तस्याः मदनदहनप्लुष्टसर्वाङ्गयष्टेः मत्कान्तायाः अग्रे तिष्ठन् मद्गिरं मत्सन्देशं निगदितुं मनः यस्य सः निगदितुमनाः। तथा सन् प्रारभेथाः मद्गिरं वक्तुं प्रारभेथाः॥ ६८

माङ्गल्यं ते भवतु मदिरापाङ्गि मारार्तिभाजा
त्वद्भर्त्राहं तव परिसरं प्रेषितः प्रोषितेन।
आकारो मे कथयति कुलं केवलं यद्भवानां
बालक्रीडा जगदघकृतां भोगिनां भञ्जनानि॥ ६९॥

हे मदिरापाङ्गि सुन्दरि ते माङ्गल्यं भवतु जीवद्भर्तृकतारूपं शुभं भवतु। प्रोषितेन त्वया वियुक्तेन अत एव मारार्तिं भजते इति मारार्तिभाक्। तेन

१ प्लुष्ट Corrected in to प्लुष्ट.

त्वद्भर्त्रा तव परिसरं समीपं प्रति अहं प्रेषितः। मे आकारः आकृतिः कुलं मम वंशं कथयति। यद्भवानां यस्मिन् कुले जातानां मयूराणाम्। जगतः अघं दुःखं कुर्वन्ति इति जगदघकृतः। तेषां भोगिनां सर्पाणां भञ्जनानि केवलं बालक्रीडाः अनायासेन साध्यानि एव। जगतां जनानां स्त्रीजनानां अघं अपराधं चारित्रभङ्गरूपं ये कुर्वन्ति तेषां भोगिनां विटानां भञ्जनानि विनाशनानि इत्यपि प्रतीयते ॥ ६९

आकर्ण्यैनाममृतलहरीमुद्गिरन्तीं गिरं ता-
मानन्दाब्धेर्मनसि चलतो वीचिभङ्गायमानैः।
संछन्नाङ्गी[1] पुलकनिकरैर्मद्दशाकर्णनेच्छां
बाला संसूचयति कुतुकोत्तानितैर्[2]नेत्रपातैः ॥ ७० ॥

बाला अमृतलहरीं अमृतप्रवाहं उद्गिरन्तीं प्रवर्तयन्तीं तां एनां गिरं आकर्ण्य मनसि तस्याः हृदये चलतः। आनन्द एव अब्धिः समुद्रः आनन्दाब्धिः। तस्य वीचिभङ्गायमानैः वीचिभङ्गाः तरङ्गभङ्गाः इव आचरद्भिः पुलकनिकरैः रोमाञ्चसमूहैः संछन्नं अङ्गं यस्याः सा संछन्नाङ्गी। तादृशी सती कुतुकोत्तानितैः कुतुकेन उन्मुखीकृतैः नेत्रपातैः मद्दशाकर्णनेच्छां मम दशायाः अवस्थाया आकर्णने श्रवणे विषये इच्छां सूचयति ॥ ७०

तां प्रब्रूयाः पुनरिति ननु त्वत्प्रियो विप्रयोग-
क्लिष्टो दृष्टः सुमुखि स मया हन्त पूर्वेद्युरेव।
स्यानन्दूरे[3] पुरि मुरभिदः साध्वि तत्सूक्तिमाध्वी-[4]
धारामास्वादयतु मधुरामेष ते चित्तभृङ्गः ॥ ७१ ॥

पुनः तां इति एवं प्रब्रूयाः। किम्। ननु इत्यवधारणे। हे सुमुखि विप्रयोगक्लिष्टः विरहेण दुःखितः सः त्वत्प्रियः पूर्वेद्युरेव स्यानन्दूरे मुरभिदः विष्णोः पुरि मया दृष्टः। हन्त इति विप्रयोगक्लिष्टत्वे दुःखप्रकटनार्थम्। हे

---

१. सच्छनाङ्गी २. कुतुकोत्मानितै. Corrcetd into कुतुकोत्तानितै.
३. स्थानंदूरे. ४. मद्धा.

साध्वि एषः ते तव चित्तं एव भृङ्गः चित्तभृङ्गः मधुरां तत्सूक्तिमाध्वीधारां तस्य सूक्तिः वचनमेव या माध्वी पुष्परसः तस्याः धारां आस्वादयतु। अवहिता शृणु इत्यभिप्रायः ॥ ७१

त्वद्विश्लेषप्रभृति तरलापाङ्गि विध्वस्तधैर्यो
यः कश्चिन्मे शिव शिव मनोवागतीतप्रकारः।
मूर्च्छाविद्यावितरणगुरुर्दुर्निवारो[1] विकारो
जागर्ति स्म प्रविहृतसमस्तेन्द्रियार्थप्रवृत्तिः ॥ ७२ ॥

हे तरलापाङ्गि सुन्दरि दुर्निवारः निवारयितुमशक्यः त्वद्विश्लेषप्रभृति त्वद्वियोगकालादारभ्य मे यः कश्चित् अनिर्वचनीयः विकारः शिव शिव जागर्ति स्म। कीदृशो विकारः। विध्वस्तं नाशितं मे धैर्यं येन सः विध्वस्तधैर्यः। मनः वाचं च अतीतः मनोवागतीतः। तादृशः प्रकारः स्वरूपं यस्य सः मनोवागतीतप्रकारः। मूर्च्छाविद्यावितरणगुरुः मूर्च्छा एव या विद्या तस्य वितरणे गुरुः आचार्यभूतः। मूर्च्छाजनक इत्यर्थः। मूर्च्छायाः अविद्यायाः मूढतायाः च वितरणेन जननेन गुरुः असह्यः इति वा। प्रविहृता निरुद्धा समस्तानां इन्द्रियाणां अर्थेषु स्वस्वविषयेषु प्रवृत्तिः येन सः प्रविहृतसमस्तेन्द्रियार्थप्रवृत्तिः ॥ ७२

स्वव्यापारेऽप्यपटु बत मे चित्तमुद्दामताप-
ग्रस्तं धत्ते कथमिव कुरङ्गाक्षि बाह्याक्षसाह्यम्।
कष्टं कष्टं कलयति परं घोरकान्तारवह्नि-
प्लुष्यद्[2]भूमीरुहबिलवलत्कीरपोतोपमानम् ॥ ७३ ॥

हे कुरङ्गाक्षि सुन्दरि मे चित्तं हृदयं उद्दामतापग्रस्तं उद्दामेन उत्कटेन तापेन ग्रस्तं अत एव स्वव्यापारे अपि अपटु असमर्थं कथमिव बाह्याक्षाणां बहिरिन्द्रियाणां साह्यं साहाय्यं धत्ते करोति बत। नैव करोति इत्यर्थः। कष्टं कष्टम्। तत् चित्तं परं केवलम्। घोरेण कान्तारवह्निना दावाग्निना प्लुष्यतः

---

१. दुन्निवारो Corrected into दुर्निवारो. २. प्लुष्य.

दह्यमानस्य भूमीरुहस्य वृक्षस्य बिले कोटरे वलन् भ्रमन् यः कीरपोतः शुकशावः तस्य सादृश्यं कलयति । तद्वत् पीडामनुभवति इत्यर्थः ॥ ७३

मारो वैरी मलिनितदिशाचक्रवालः करालः
कालः सोऽयं मधुपपटली केवलं कालपाशः ।
क्ष्वेलोद्गारी परिमलभरः केतकीजालकानां
प्राणान् वोढुं प्रणयिनि कथं प्राभवं धारयामि ॥ ७४ ॥

मारः कामः वैरी संवृत्तः इति शेषः । मलिनितं श्यामवर्णं कृतं दिशाचक्रवालं दिङ्मण्डलं येन सः मलिनितदिशामण्डलः । तादृशः कालः करालः भयङ्करः भवति इति शेषः । मधुपानां भ्रमराणां पटली पङ्क्तिः केवलं कालपाशः यमस्य पाशः संवृत्ता इति शेषः । तद्वत् प्राणहारिणी भवति इत्यर्थः । केतकीजालकानां केतकीमुकुलानां परिमलभरः । क्ष्वेलं विषं उद्गिरति वमति इति क्ष्वेलोद्गारी भवति इति शेषः । हे प्रणयिनि अहं प्राणान् वोढुं धारयितुं कथं प्राभवं सामर्थ्यं धारयामि । अहं प्राणान् वोढुं शक्तो नैव भवामि इति भावः ॥ ७४

तन्वानस्य स्मरशरमहानक्रनीरन्ध्रितेऽस्मिन्
विश्लेषाख्ये महति जलधौ मज्जनोन्मज्जनानि ।
मूर्च्छालार्तेर्मम बत दशा यादृशी तादृशोऽस्या
वेत्ता सोऽयं न पुनरपरः सोऽप्ययं पञ्चबाणः ॥ ७५ ॥

स्मरशरमहानक्रनीरन्ध्रिते स्मरस्य कामस्य शराः एव ये नक्राः जलजन्तवः तैः नीरन्ध्रिते पूर्णे । अत्र नक्रशब्दः क्रूरजलजन्तुसामान्यस्य उपलक्षकः । तादृशे अस्मिन् विश्लेषाख्ये विश्लेषः विरहः इति आख्या नामधेयं यस्य तस्मिन् । विरहरूपे इत्यर्थः । महति जलधौ महासमुद्रे मज्जनोन्मज्जनानि मज्जनानि उन्मज्जनानि च तन्वानस्य कुर्वतः । मूर्च्छाला उत्कटा आर्तिः दुःखं यस्य तस्य मूर्च्छालार्तेः मम । बत कष्टम् । दशा अवस्था यादृशी तादृशः तादृश्याः अस्याः दशायाः । कियान् मे सन्तापः इत्यस्य इत्यर्थः । वेत्ता ज्ञाता सः यथोक्तः अयं अहम् । सः यथोक्तः अयं पञ्चबाणः कामः अपि । न

पुनरपरः। अहं कामश्च इत्युभावेव मम दशां जानीतः। नान्यः इत्यभिप्रायः॥ ७५

सत्यं लोको वदति सततं मोहनान्यङ्गनाना-
मङ्गानीति त्वयि सुवदने यत् पुरा सङ्गतायाम्।
मोहं प्रापं मुहुरहमहोरात्रमानन्दभूम्ना
मूर्च्छालेन त्वनिशमधुना मन्मथार्तिप्रथिम्ना॥ ७६॥

हे सुवदने सुन्दरि। अङ्गनानां युवतीनां अङ्गानि सततं मोहनानि मोहजनकानि इति लोकः सत्यं वदति। यत् यतः पुरा त्वयि संगतायां सत्यां अहं मुहुः अहोरात्रं आनन्दभूम्ना तोषाधिक्येन मोहं प्रापम्। अधुना तु त्वद्वियोगकाले तु मूर्च्छालेन उत्कटेन मन्मथार्तिप्रथिम्ना कामदुःखस्य अतिरेकेण अनिशं मोहं प्राप्नोमि। सङ्गमे वियोगे च त्वदङ्गं मम मोहमेव जनयति इति भावः॥७६

निःश्वासैर्मे दहनलहरीमुद्गिरद्भिः समन्ता-
न्निःसर्पद्भिः परिसरजुषो दीर्घिका दीर्घनेत्रे।
शोशुष्यन्ते नयनगलितैः सन्ततैरम्बुपूरै-
श्चित्रं चित्रं पुनरपि दशां प्राक्तनीं प्राप्नुवन्ति॥ ७७॥

हे दीर्घनेत्रे सुन्दरि दहनस्य वह्नेः लहरीं प्रवाहं उद्गिरद्भिः। अतितरां उष्णैरित्यर्थः। समन्तात् निःसर्पद्भिः मे निःश्वासैः परिसरजुषः परिसरवर्तिन्यः दीर्घिकाः शोशुष्यन्ते नितरां जलरहिताः भवन्ति। ता दीर्घिकाः नयनगलितैः मम नयनाभ्यां पतद्भिः सन्ततैः अविच्छिन्नैः अम्बुपूरैः पुनरपि प्राक्तनीं दशां जलपूर्णतां प्राप्नुवन्ति। चित्रं चित्रं अत्याश्चर्यम्॥ ७७

दूरं याते निजसहचरे दीर्घनिःश्वासवीची-
मुन्मुञ्चन्तीं मधुपनिकरच्छद्मना पद्मिनीं ताम्।
आलोक्यारादहरपगमे त्वामनुध्यायतो मे
द्वैगुण्येन ज्वलति दयिते दारुणस्तापवह्निः॥ ७८॥

हे दयिते अहरपगमे वासरावसाने निजसहचरे पद्मिन्याः सहचरे सूर्ये दूरं याते अस्तंगते सति मधुपनिकरच्छद्मना भ्रमरकुलव्याजेन दीर्घनिःश्वासान्

वीचीं तरङ्गम्। परम्परामित्यर्थः। उन्मुञ्चन्तीं पद्मिनीं आरात् समीपे आलोक्य त्वां अनुध्यायतः पुनः पुनः मनसि धारयतः मे मम दारुणः तापवह्निः द्वैगुण्येन ज्वलति ॥ ७८

**कोपावेशात् कुसुमधनुषा क्रूरकाकोलदिग्धं**
**वेगोन्मुक्तं विजितजगता बालचूताङ्कुरास्त्रम्।**
**त्वत्तो वाणीमधुरिमगुणाध्यायिनां कोकिलानां**
**प्रीतिस्थानं परमिति न मे कर्षति प्राणशेषम् ॥ ७९ ॥**

विजितं जगत् येन तेन विजितजगता कुसुमधनुषा कोपावेशात् क्रूरकाकोलेन उत्कटविषेण दिग्धं वेगात् बलेन उन्मुक्तं वेगोन्मुक्तं बालचूताङ्कुर एव अस्त्रं बालचूताङ्कुरास्त्रं मे प्राणशेषं न कर्षति मां न मारयति। कुतः। त्वत्तः तव सकाशात् वाण्याः शब्दस्य मधुरिमगुणं माधुर्यगुणं अधीयते इति वाणीमधुरिमगुणाध्यायिनः। तेषां कोकिलानां परं प्रीतिस्थानं बालचूताङ्कुरः इति हेतोः ॥ ७९

**प्रेक्ष्योपान्ते पृथुकुचनतां पक्वबिम्बाधरोष्ठीं**
**वर्षारात्रौ झटिति तडिता दर्शितां प्रेयसि त्वाम्।**
**प्रेम्णा बाढं मयि बत परीरब्धुमारिप्समाने**
**दैवाद्वल्ली भवसि मुकुलैः पल्लवैश्चोल्लसन्ती ॥ ८० ॥**

पृथुभ्यां कुचाभ्यां नतां पृथुकुचनताम्। पक्वं बिम्बं बिम्बफलं इव अधरोष्ठः यस्याः तां पक्वबिम्बाधरोष्ठीं वर्षारात्रौ झटिति सद्यः तडिता विद्युता दर्शितां त्वां त्वमिति मया सम्भावितं वस्तु। उपान्ते मत्समीपे प्रेक्ष्य मयि प्रेम्णा सह परीरब्धुं आलिङ्गितुं आरिप्समाने उद्युक्ते सति। बत कष्टम्। दैवात् मम भाग्यदोषात् त्वं त्वमिति मया यत् संभावितं तत् मुकुलैः पल्लवैश्च उल्लसन्ती वल्ली भवसि ॥ ८०

**नृत्तारम्भग्रहिलहृदयैरुद्धतैः केकिवृन्दै-**
**र्बद्धाभोगाः प्रतिवनमतिस्निग्धशाखाद्रुमौघाः।**

व्योम श्यामाम्बुदकवलितं व्याप्तमाशान्तरालं
कादम्बोद्यत्कुसुमरजसा कुत्र नेत्रे क्षिपामि ॥ ८१ ॥

प्रतिवनं वने वने। अतिस्निग्धाः शाखाः येषां तेषां द्रुमाणां वृक्षाणां ओघाः समूहाः अतिस्निग्धशाखाद्रुमौघाः। नृत्तारम्भस्य ग्रहणं शीलं अस्य इति नृत्तारम्भग्रहिलम्। तादृशं हृदयं येषां तैः नृत्तारम्भग्रहिलहृदयैः। उद्धतैः मत्तैः केकिवृन्दैः मयूरसमूहैः बद्धः आभोगः परिपूर्णता येषां ते बद्धाभोगाः भवन्ति। सर्वत्र वृक्षेषु मत्ता मयूराः नृत्तमारभन्ते इति भावः। व्योम गगनं श्यामाम्बुदकवलितं श्यामाम्बुदैः कालमेघैः कवलितं ग्रस्तं भवति। आशान्तरालं दिक्चक्रं कादम्बेन कदम्बसंबन्धिना उद्यता उद्गच्छता कुसुमानां रजसा कादम्बोद्यत्कुसुमरजसा व्याप्तम्। अहं नेत्रे मम लोचने कुत्र क्षिपामि। सर्वत्र कामोद्दीपकान्येव वस्तूनि सन्ति। अतः अहं आलोकने अशक्तः इति भावः ॥ ८१

स्वप्ने दृष्ट्वा कलहकलुषां स्वामिनि त्वां पुरस्ता-
दाकाशाङ्घ्रिप्रणतिजनिताघातजातप्रबोधः।
क्रन्दन् कोपात् क्वचन दयिता हन्त याता ममेति
स्थाप्ये मित्रैः कथमपि कृतस्वप्नवृत्तान्तबोधः ॥ ८२ ॥

हे स्वामिनि मम जीवनाथे अहं कलहकलुषां प्रणयकलहितां त्वाम्। अथवा स्वामिनि तव नाथे मयि विषये कलहकलुषां त्वां इति योजना। स्वप्ने पुरस्तात् अग्रे दृष्ट्वा आकाशे शून्ये देशे या अङ्घ्रिप्रणतिः तव पादयोः प्रणामः तया जनितेन आघातेन जातः प्रबोधः यस्य सः आकाशाङ्घ्रिप्रणतिजनिताघातजातप्रबोधः। तथा सन्। मम दयिता कोपात् क्वचन याता हन्त इति क्रन्दन् विलपन् मित्रैः कथमपि। कृतः स्वप्नवृत्तान्तस्य बोधः यस्य सः कृतस्वप्नवृत्तान्तबोधः। तथा सन् स्थाप्ये स्वस्थः क्रिये ॥ ८२

आप्रत्यूषं प्रियसहचरीविप्रयोगार्तिमग्र्यां
धृत्वा चित्ते कथमपि सरस्तीरभाजं रथाङ्गम्।

**प्रातः प्रेम्णा निजदयितयालिङ्गितं पश्यतो मे**
**स्थैर्यं याति प्रणयिनि पुनः सङ्गमाशानुबन्धः ॥ ८३ ॥**

हे प्रणयिनि आप्रत्यूषं यावत् प्रभातं तावत् अभ्यां उत्कटां प्रियसहचर्याः प्रणयिन्याः विप्रयोगात् विरहात् या आर्तिः तां प्रियसहचरीविप्रयोगार्तिं कथमपि महता प्रयत्नेन चित्ते धृत्वा । सहमानः इत्यर्थः । प्रातः प्रातःकाले सरस्तीरं भजते इति सरस्तीरभाक् । तम् । निजदयितया कर्त्र्या प्रेम्णा सह आलिङ्गितम् । तं रथाङ्गं चक्रवाकं पश्यतः मे मम सङ्गमाशानुबन्धः सङ्गमे पुनः विषये या आशा तस्याः अनुबन्धः पुनः स्थैर्यं स्थिरतां याति । स्थिरतरो भवति इत्यर्थः ॥ ८३

**विश्लेषाख्यप्रबलपवनक्षोभविश्लिष्टमूला**
**मारग्रीष्मग्रहपतिमहोत्तापसंजातशोषा ।**
**संकल्पोर्वीरुहविरचितोपघ्नदण्डा न चेत् स्यात्**
**पातं प्रायात् कथमिव न मे प्रेयसि प्राणवल्ली ॥ ८४ ॥**

हे प्रेयसि मे प्राणाः एव वल्ली प्राणवल्ली । संकल्प एव यः उर्वीरुहः वृक्षः तेन विरचितः निर्मितः उपघ्नदण्डः आश्रयदण्डः यस्याः सा संकल्पोर्वीरुहविरचितोपघ्नदण्डा । "स्यादुपघ्नोऽन्तिकाश्रये"इत्यमरः । तथाभूता न स्यात् चेत् कथमिव पातं न प्रायात् निपतिता न भवेत् । कीदृशी प्राणवल्ली । विश्लेषः विरह इति आख्या नामधेयं यस्य तस्य प्रबलस्य पवनस्य वायोः क्षोभेन विश्लिष्टं मूलं यस्याः सा विश्लेषाख्यप्रबलपवनक्षोभविश्लिष्टमूला । मारः कामः एव यः ग्रीष्मग्रहपतिः ग्रीष्मकालसूर्यः तस्य महता उत्तापेन संजातः शोषः यस्याः सा मारग्रीष्मग्रहपतिमहोत्तापसंजातशोषा ॥ ८४

**अम्भोदाम्भोरुहशशिसुधाशैलशैवालवल्ली-**
**व्योमश्रीमत्पुलिनकदलीकाण्डबालप्रवालैः ।**
**त्वद्गात्रश्रीग्रहणसुभगंभावुकैश्चित्तरम्यै-**
**स्तैस्तैर्भावैः कथमपि कुरङ्गाक्षि कालं क्षिपामि ॥ ८५ ॥**

हे कुरङ्गाक्षि सुन्दरि तैस्तैः भावैः वस्तुभिः अहं कथमपि महता प्रयत्नेन कालं क्षिपामि नयामि। कीदृशैर्भावैः। त्वद्गात्राणां तव अवयवानां या श्रीः तस्याः ग्रहणेन स्वीकारेण। सुभगाः प्रियाः भवितुं शीलं एषां इति सुभगंभावुकाः। तैः त्वद्गात्रश्रीग्रहणसुभगंभावुकैः। अत एव चित्तरम्यैः मनोहरैः। के ते भावाः। अम्भोदः मेघः यः केशश्रियं गृह्णाति। अम्भोरुहं पद्मं यन्नेत्रश्रियम्। शशी चन्द्रः यः मुखश्रियम्। सुधा अमृतं या अधरश्रियम्। शैलः पर्वतः यः कुचश्रियम्। शैवालवल्ली या रोमावलीश्रियम्। व्योम आकाशः यन्मध्यदेशस्य श्रियम्। श्रीमत्पुलिनं यन्नितम्बश्रियम्। कदलीकाण्डः यः ऊर्वोः श्रियम्। बालप्रवालः यः पादश्रियम्। एतैः त्वद्गात्रश्रीग्रहणसुभगंभावुकैः भावैः इति योजना॥ ८५

त्वद्विश्लेषादिति समुदितामस्मदीयामवस्थां
विज्ञायाशु प्रशमय शुचं शारदाम्भोजनेत्रे।
मुग्धे संस्थापय च सुतरामात्मनात्मानमास्व
स्वैरं यावन्मदभिगमनं जातविश्वासयोगा॥ ८६॥

शारदाम्भोजं शरत्कालपद्मं इव नेत्रं यस्याः सा शारदाम्भोजनेत्रा। हे तथाभूते मुग्धे। इति एवंप्रकारां त्वद्विश्लेषात् त्वद्विरहात् समुदितां संजातां अस्मदीयां अवस्थां विज्ञाय त्वं शुचं दुःखं आशु प्रशमय। यावत् मदभिगमनं मम पुनः समागमः तावत्। जातः विश्वासस्य योगः यस्याः सा जातविश्वासयोगा। तथा सती आत्मना स्वयमेव आत्मानं सुतरां भृशं संस्थापय स्थिरं कुरु। स्वैरं आस्व च॥ ८६

कान्ते तत् किं स्मरसि ननु यत् सार्धमालीजनेन
स्वैरं सायं कुसुमविचये प्रस्तुते पुष्पवाट्याम्।
आश्लेषोत्के मयि सविधगे भीतभीतेव हा हा
बाध्ये भृङ्गैरहमिति सरोमाञ्चमालिङ्गथा माम्॥ ८७॥

हे कान्ते तत् स्मरसि किम्। किं तत्। यत् आलीजनेन सखीजनेन सार्धं सायं सायाह्ने स्वैरं पुष्पवाट्यां त्वया कुसुमविचये प्रस्तुते प्रारब्धे सति सविधगे

तव समीपस्थिते मयि आश्लेषोत्के त्वां आलिङ्गितुं सकामे सति । हा हा अहं भृङ्गैः बाध्ये बाधिता पीडिता अस्मि इति भीतभीता अत्यधिकं भीता इव । न तु यथार्थतो भीता । सरोमाञ्चं पुलकसहितं मां त्वं आलिङ्गथाः । इति यत् तत् स्मरसि किं इति योजना ॥ ८७

**त्वद्वक्त्रालोकनरसभृशस्विन्नगात्रं मुहुर्मां**
**पश्यन्ती त्वं गुरुसविधगा शङ्कमानान्यसङ्गम् ।**
**आसीः कोपात् कलुषनयना तावदेवात्मबाणो**
**हन्त्यात्मानं परमिति सखीबोधितागाः प्रसादम् ॥ ८८ ॥**

गुरुसविधगा मातापित्रोः समीपे स्थिता त्वम् । त्वद्वक्त्रालोकने यः रसः तेन भृशं स्विन्नं स्वेदयुक्तं गात्रं यस्य तं त्वद्वक्त्रालोकनरसभृशस्विन्नगात्रं मां मुहुः पुनः पुनः पश्यन्ती अन्यसङ्गं अन्यस्त्रिया सह सम्भोगं मत्कृतं शङ्कमाना कोपात् कलुषनयना आविलनेत्रा आसीः । तावदेव तदानीमेव आत्मबाणः स्वेन विसृष्टः शरः कोपरूपः आत्मानं परं आत्मानं केवलं हन्ति । इति इत्थं सखीभिः बोधिता प्रसादं अगाः प्रसन्ना अभूः । यदि त्वं वृथा कुपिता भवसि तर्हि तवैवापायो भविष्यति इति सखीनामाशयः ॥ ८८

**भुक्त्वा सायं प्रहसितमुखीं पद्मिनीं षट्पदोऽसौ**
**भोक्तुं भूयः कुवलयवनीं पश्य याति प्रदोषे ।**
**इत्थं सायंसमयविभवं वर्णयन्तं प्रिये मां**
**निर्यद्बाष्पैर्निभृतमभिनः कोपरूक्षैः कटाक्षैः ॥ ८९ ॥**

आसायं यावत् सूर्यस्यास्तंगमनं तावत् प्रहसितमुखीं पद्मिनीम् । विकसितानि पद्मानि इत्यर्थः । भुक्त्वा असौ षट्पदः भृङ्गः भूयः पुनरपि प्रदोषे निशारम्भे कुवलयवनीं भोक्तुं याति । पश्य । एकां नायिकां चिरं भुक्त्वा अन्यां नायिकां प्रति गच्छन् कश्चन नायकोऽपि अत्र प्रतीयते । इत्थं सायंसमयविभवं सायंकालस्य सन्ध्यावेलायाः मनोहरतां वर्णयन्तं मां हे प्रिये त्वम् । निर्यन्ति बाष्पाणि अश्रूणि येभ्यः तैः निर्यद्बाष्पैः । कोपरूक्षैः कोपेन रूक्षैः

कटाक्षैः निभृतं भृशं अभिनः विदारितवती । नायिकाद्वयभोगोत्सुकनायकप्रतीतिं मनसि कृत्वा तस्याः कोपः ॥ ८९

विज्ञायेत्थं कुशलिनमभिज्ञानवाचानया मां
कातर्यं मा कथमपि मुधा कातरापाङ्गि यायाः
निश्चिन्वाना निरुपमरसां भाविनीं सङ्गमाशां
पश्चात्कुर्या मनसिजरुजां दुश्चिकित्सामधीरैः ॥ ९० ॥

हे कातरापाङ्गि लोलापाङ्गि सुन्दरि इत्थं अनया श्लोकत्रयोक्तया अभिज्ञानवाचा मां कुशलिनं जीवन्तं विज्ञाय मुधा वृथा कथमपि कातर्यं मा यायाः अकातरा भवेः । निरुपमः साम्यरहितः रसः आस्वादः यस्याः तां निरुपमरसां भाविनीं मत्प्रत्यागमनानन्तरं संभविष्यन्तीं सङ्गमाशां निश्चिन्वाना त्वं अधीरैः धैर्यरहितैः जनैः दुश्चिकित्सां चिकित्सितुमशक्यां मनसिजरुजां कामव्यथाम् । धीराणामेव कामपीडाप्रतिविधिः साध्यः इति आशयः । पश्चात्कुर्याः पृष्ठतः कुरु । इदानीं त्यजेः इति भावः ॥ ९०

सम्पाद्यैतन्मदभिलषितं संश्रितैकान्तबन्धो
भूयाः पत्रिप्रवर भुवने पुण्यभाजां पुरोगः ।
विश्लेषार्ता मयि सति जगत्याप्तमित्रे युवानः
के का वा स्युः स्त्रिय इति यथार्थो हि केकारवस्ते ॥ ९१ ॥

हे संश्रितैकान्तबन्धो संश्रितानां परमबन्धो पत्रिप्रवर पक्षिश्रेष्ठ एतत् मदभिलषितं सम्पाद्य भुवने लोके पुण्यभाजां सुकृतिनां पुरोगः अग्रयायी भूयाः । जगति अस्मिन् लोके मयि मयूरे आप्तमित्रे सति के वा युवानः विश्लेषार्ताः स्युः । का वा स्त्रियः विश्लेषार्ताः स्युः । न केऽपि इत्यभिप्रायः । इत्येवं ते केकारवः यथार्थः हि ॥ ९१

विश्लेषार्तां मम सहचरीमित्थमाश्वास्य युक्त्या
पश्चादच्छाशय परिपत भ्रातराशामभीष्टाम् ।

स्मर्तव्योऽहं प्रियसख पुनस्तत्र तत्रान्तरे ते

मा भूत्कान्ताविरहघटना किं च जन्मान्तरेऽपि ॥ ९२ ॥

हे अच्छाशय शुद्धहृदय विश्लेषार्तां विश्लेषेण विरहेण आर्तां पीडितां मम सहचरीं पत्नीं इत्थं युक्त्या आश्वास्य। हे भ्रातः त्वं अभीष्टां आशां दिशं परिपत। यथेष्टं गच्छ इत्यर्थः। हे प्रियसख पुनः इतः परं तत्र तत्र अन्तरे सन्दर्भे अहं ते स्मर्तव्यः। किं च जन्मान्तरेऽपि कान्ताविरहघटना प्रणयिनीवियोगसंभवः मा भूत्। तव मम च इति भावः॥ ९२

इति मयूरसंदेशे उत्तरभागः समाप्तः।

मयूरसन्देशः समाप्तः।

---

# NOTES

## PART I

1. Such a *maṅgalaśloka* does not usually occur in *Sandeśakāvyas*. This is in imitation of the practice found in a Malayalam *Sandeśakāvya* named *Uṇṇunīlīsandeśa*, slightly older than *Mayūrasandeśa*. In the second *pāda*, read उद्घोपित, also in lines 5 and 6 of the commentary.

2. Such an enunciation of the *kāvya* is also not usually found in *Sandeśakāvyas*. This too is in imitation of the same *Sandeśakāvya* in Malayalam. श्रीकण्ठोर्वीपति-बहुमतम् । This word need not suggest that the heroine is the wife of Śrīkaṇṭha. It may simply mean that she is an honoured citizen of the country ruled over by king Śrīkaṇṭha. In the corresponding verse in the *Uṇṇunīlīsandeśa*, the heroine is described as a necklace worn by king Maṇikaṇṭha of Bimbili, yet the heroine is not the wife of king Maṇikaṇṭha, but of a junior member of the Bimbili royal family. Māracemantikā is one of the important characters that appear in a Malayalam poem called *Candrotsava*, a poem of the same age as *Mayūrasandeśa*.

3. This is the usual beginning of a *Sandeśakāvya*. As stated in the notes to the previous verse, the hero need not be Śrīkaṇṭha himself, although I have said that he is the hero, in the commentary. The third *pāda* may be compared with लक्ष्म्या रङ्गे शरदि शशिनः सौधशृङ्गे which is the first *pāda* of the opening verse in the *Śukasandeśa*.

4. Since the wife is definitely mentioned as Umā, it is likely that the hero is Śrīkaṇṭha himself. But he may

also be a junior member of Śrīkaṇṭha's family; the idea may be that the celestials mistook for Śrīkaṇṭha, one who is only a claimant to the Title of Śrīkaṇṭha. This possible interpretation is supported by the *Uṇṇunīlīsandeśa.*

6. Syānadura is modern Trivandrum, the Capital of the Travancore State.

8. In the commentary, read नीरन्ध्रिता : in line 6.

10. In the commentary read मन्दहासानन्तरं in line 6.

11. पम्फुल्यन्ते is the यङन्त form of the root फल्. In the commentary read फलवन्तः for कुसुमवन्तः in line 6. The form पम्फुल्यन्ते is to be explained as: चरफलोश्च (7.4.87); उत्परस्यातः (7.4.88) इति अभ्यासस्थस्य अकारस्य उकारादेशे रूपम्।

13. I have not been able to find out the authority for the statement that तार्क्ष्य is descended from मयूर (त्वत्प्रसूतिः).

16. Note the *yamaka* in the beginning of the last two lines.

21. There is *dvitīyākṣaraprāsa* in this verse in all the four lines. This is a familiar feature in Dravidian poetry and has been taken over even when Malayalam poems are written in Sanskrit metres. The *yamaka* in the beginning of the first two lines may also be noted.

22. This may be contrasted with the following verse in the *S'ukasandeśa.*

आस्था लोके विपुलमनसामन्यसामान्यमभ्ये-
त्यर्थानर्थोपगमविगमेष्वर्थिता चातुराणाम्।
न्यक्षेणैषा निजगुरुतया नेक्षते तद्विशेषं
सान्द्रा तस्मिन्नपि च सहजं द्वन्द्वमेतद्द्वयेषु॥ १–६

23. *Annakara* is translated into Sanskrit:as श्वेतच्छदतट. *Anna* in Malayalam means swan and *kara* means neighbourhood.

26. In line 3, read शेषाहीशे instead of शेषाहीश.

27. In line 3, read भूयोऽवात्सीरिह instead of भूयोवात्सीरिह and in the commentary read अब्धिमध्ये instead of अब्धिमध्ये in line 4. Remove the quotation marks.

32. The verse may be compared with the following verse in *Śukasandeśa*.

तत्सेवार्थं तरुणसहितास्ताम्रपादारविन्दा-
स्ताम्यन्मध्यस्तनभरनतास्तारहारावलीकाः ।
तारेशास्यास्तरलनयनास्तर्जिताम्भोदकेश्य-
स्तत्रस्थाः स्युस्तबकितकरास्तालवृन्तैस्तरुण्यः ॥ १–४३

In the commentary read चन्द्रादभेदं in line 4.

33. This verse is also to be compared with the verse from *Śukasandeśa* quoted in the note on the previous verse.

34. This may be compared with verse 35 in the first part of the *Meghasandeśa*, in the description of Ujjayinī.

36. The first half may be compared with the follow- in the *Śukasandeśa* : मध्ये बद्धाञ्जलिजयगिराबद्धकोलाहलानाम् । १.४३.

37. The second line may be compared with the following in the *Śukasandeśa*, in describing the temple of Tripunithura (see note on verse 74 below.) मुक्ताहारे हरिमाणिरिव भ्राजते.

38. This may be compared with the verse in *Śukasandeśa* :

रत्यायासग्लपितवपुषां योषितां घर्मलेशैः
सिक्तो नक्तं पथिकमिथुनप्रेक्षितैः पीतशेषः ।
वातस्तोकोच्छ्वसितकमलोद्गन्धिरुद्बोधयेस्त्वा-
माविस्तर्षैरलिभिरुषसि व्यक्तमङ्गल्यगीतिः ॥ १-४४

50. The identity of the Śiva temple mentioned in the third line is not definitely known. In the *Uṇṇunīlīsandeśa*, there is the description of the ocean and of a Śiva temple after leaving Trivandrum. But in the *Mayūrasandeśa*, one is not sure if it is the same temple that is described. The epithet जलधिवलयम् suggests a temple within the sea. There is archaeological evidence of a temple having once been in the sea and now submerged in the sea. Valkala temple mentioned in the fourth line is the famous temple of Janārdana at Varkala, twenty-five miles to the north of Trivandrum and eighteen miles to the south of Quilon.

51. The tank with its clear water at Varkala is famous. This is what is mentioned in the first line. कोलम्ब is the town of Quilon. The kings were known as Kūpaka kings. In the *Uṇṇunīlīsandeśa*, the kings of Quilon are also referred to as Veṇāṭ kings. They belonged to the Yādava dynasty (*Uṇṇunīlīsandeśa* I—88)

52. Such an imaginary etymology is quite a common thing in this poem. Compare the etymology of Kaṇṭiyūr in verse 58, Cūrṇī in verse 68 and the heroine's house name in the second part, verse 16. For the second half, compare the passage in the *Śukasandeśa* : लोकत्रय्यामखिलतनुभृल्लोचनैकावलम्बे (२.५६).

54. For the use of the unfamiliar word पुष्पवन्तौ meaning "sun and moon", instead of सूर्यचन्द्रौ which would well satisfy the needs of metre, the only explanation

is the *prāsa*. After पुष्यतः one expects पुष्पवन्तौ rather than सूर्यचन्द्रौ.

55. This verse may be compared with the verse in the *Śukasandeśa :*

कूले भान्तीमथ कुलपुरीं कूपकाधीश्वराणां
लक्ष्मीसाक्षात्कृतिसमुचिते पश्य रत्नाकरस्य ।
भूयोऽप्यात्मप्रमथनभिया तेन विश्वोपभोग्ये
न्यस्तेवास्मिन्नुदरकुहराद्या पुरां रत्नभूता ॥ १–५४

In the commentary read संघर्षः in line 3.

56. अस्याः is in the feminine since the antecedent noun is नगरीम् in verse 51. But in verse 54, सान्द्रान्धकारे is not in feminine; since here the *viśeṣya* is यत्र, which is an *avyaya*, neuter is used, although यत्र means यस्यां नगर्याम्.

57. The country described here is Oṭanāṭ. *Oṭa* means *iṅgudī* and *nāṭ* means "country." So it is called इङ्गुदीभूविभाग in Sanskrit.

58. Note the imaginary etymology of the name Kaṇṭiyūr. The *yamaka* in the beginning of the last two lines may also be noted. Kaṇṭiyūr is the Capital of the Kāyaṅkulam country in Oṭanāṭ. The king of this country was subjugated by king Mārtāṇḍa Varma of Travancore in the middle of the eighteenth century and the country is now a part of the Travancore State. It is just to the north of Quilon. In the commentary read नानालोकानां in line 9. The *anusvāra* is placed above का instead of above ना.

59. The place is well known for the handsome ladies there. *Uṇṇunīlīsandeśa* also mentions the handsome ladies of this place.

60. The temple of Kāli mentioned in the first half is Panayanār, also mentioned in the *Uṇṇunīlīsandeśa*.

The temple mentioned in the second half is the one at Tiruvalla, about twenty miles to the south of the modern town of Kottayam.

63. The Maṇikaṇṭha temple is dedicated to Viṣṇu. There is also a shrine dedicated to Pārvatī; the Goddess is supposed to be the giver of food.

64. The river Vañculā starts from the Western Ghats and joins the back-waters along the Western sea-coast south of Kottayam.

67. This is the famous Śiva temple at Ettumānur, a few miles to the north of Kottayam. *Ettam* in Malayalam means "fame;" *āna* means "having" and *ūr* means "village". Thus ettam-ān-ūr means Kīrti--mad-grāma.

68. Sindhudvīpa is the place called Katalturuttu. *Katal* means "sea" (sindhu) and *turuttu* means "island". This was the capital of the northern branch of the Bimbili kings. North of Quilon there is the coastal strip of land and behind this is the back-water. Beyond the back-water is the main land. This portion was called the Bimbili country with its southern and northern divisions. The hero in the *Uṇṇunīlisandeśa* belonged to this royal family. The second half of the verse may be compared with the passage in the *Śukasandeśa*: घननिभैरावृतं सिन्धुरेन्द्रैः ।.
(८१. ६१)

69. In the commentary read कीदृश्य : in line 1.

70. The reading विसृते conjectured has not given me full satisfaction. I have accepted it as the best possible. In the second *pāda* read दध्युः for दघ्यु :.

71. Phullā river is now called Muvvāttupuzha. It starts from the Western Ghats and joins the back-waters

along tbe west coast, south of Ernakulam. Note the *Yamaka* in the beginning of the last *pāda*.

73. त्वरितगतिमान् is not a happy word. त्वरितगतिः would be enough. There is the rule : न कर्मधारयान्मत्वर्थीयः ।

74. Ravipura is the modern Tripunithura, the residence of the Cochin Royal Family. The passage शास्त्रार्थालोचनचतुरताशालिभिः श्रोत्रियाग्र्यैरात्तस्थेमा may be compared with the verse in the *Śukasandeśa* in the same context ;

प्राज्ञोत्कर्षप्रकटनकृते प्राश्निके प्राज्ञलोके
कल्लोलाभैर्मतिजलनिधेरुत्थितैस्तर्कजालैः ।
स्पर्धाबन्धादवहितधियः स्पष्टमत्रार्थरत्नं
श्रौते लीनं सदसि रहसि श्रावकाः श्रावयेयुः ॥ १–६३

The expression पन्नगाधीशपीठम् may be compared with the expression पन्नगानां मुख्ये ( १. ६२ ) in the *Śukasandeśa.* Compare the passage of the *Mayūrasandeśa* in the description of the Idol at Trivandrum with the passage in the *Śukasandeśa* in describing the idol at Tripunithura ( Note 37 ).

75. The first half of this verse is very corrupt. From the parallelisms between *Mayūrasandeśa* and *Śukasandeśa*, it would be found that the former closely follows the latter. If this similarity is any evidence of value, we may take it that the place described here is the same place described in the corresponding portion of the *Śukasandeśa.* After describing Tripunithura in the *Śukasandeśa*, the next place taken up is a Subrahmaṇya temple called Vayattil two miles to the north of Tripunithura. The passage is as follows :

दत्तप्रेमा शिखिनि दलयन् दानवान् बाणमुक्त्या
सुब्रह्मण्यः पथि सुमनसां यूथनेता निषेव्यः ।

अक्षोभ्यत्वं दधति कृतिनामद्भुतार्थान्यमीषां
छिद्रास्कन्दिच्छिदुरतरसा यस्य शक्त्या पदानि ॥ १–६४

It is on the basis of this verse that I have reconstructed the verse in the *Mayūrasandeśa* as meaning Subrahmaṇya. कीलाकल्पाक्षिति must be the Sanskrit translation of the name of the temple Vayattil, which in Malayalam means "in the stomach". It is as follows: कीलः ज्वाला आकल्प : भूषणं यस्य स : कीलाकल्प : वह्नि : । तस्य क्षिति : उदरम् ।

I know that the interpretation is extremely strained. Until a better interpretation is suggested, this may remain. There is another way of interpreting. In a commentary on the *Śukasandeśa* called *Cintātilaka*, of which only one manuscript is available, there is given a verse as an interpolation, after the description of the Subrahmaṇya temple. It is as follows:

मध्येमार्गं महितमहिलामण्डितं मन्दिरं त्वां
मन्ये मोदं नयति नितरां मध्यपूर्वो विहारः ।
यस्मिन् नित्यं वसति वसुधावासवो बाडवेन्द्रो
लीलारक्तोत्पलपरिलसत्केशपाशो रमायाः ॥

This is about the king of Idappalli, a Brahmin Royal Family which continues even today. The country is to the north of Ernakulam and is now a part of the Travancore State. The name of the king is Jayanta. मध्यपूर्वो विहार : is the Sanskrit translation of Idappilli. *Ida* means "middle" and *Palli* means "a Church" (here Buddhistic monastery). The last line records a story. The king was blessed by the Goddess by placing her red lotus flower on his head. If we accept this interpolated passage as earlier than the *Mayūrasandeśa* and if we assume that the author of *Mayūrasandeśa* is describing the king of Idappalli here, the passage has to be reconstructed as follows:

मध्येमध्यक्षिति रिपुगणैर्दुर्जयं तं जयन्तं
लीलारक्तोत्पलवहमुपस्थाय भूयोऽपि यास्यन् ॥

In this passage, मध्येमध्यक्षिति would mean "in the middle of the मध्यक्षिति or Idappalli country" (*Palli* can also mean "a place"). Jayanta is the name of the king. लीलारक्तोत्पलवहम् records the story contained in the last line of the *Śukasandeśa* verse. This latter interpretation seems to be more acceptable. I was able to get at this possibility only after printing this portion.

The second half of the verse describes a famous Śiva temple. The identity of this temple is also uncertain. After describing the Subrahmaṇya temple and also the king of Idappalli ( in the interpolated passage ), there is the description of a Śiva temple in the *Śukasandeśa* also. All that we can say with certainty is that in both it is the same temple that is described. The editors of the *Śukasandeśa*, both in Malayalam and in Devanagari script, suggest that this is the once famous ( but now decayed ) temple at Tṛkkākkara, to the East of Idappalli. The reason is that there are many minor Deities installed in this temple and the *Śukasandeśa* passage speaks of thirty-three gods installed here. The verse is as follows :

तच्च क्षेत्रं पथि पशुपतेर्यत्र च द्वादश द्वा-
वष्टावेकादश च निवसन्त्यस्तकम्पा निलिम्पाः ।

But the Deities installed in the temple are not the thirty-three gods of Bṛhadāraṇyakopaniṣad mentioned in this verse. Another suggestion is that the temple is the Peruvāram temple at Parūr. Parūr was also another ancient kingdom, to the west of the northern branch of the Alwaye river. Here also there is no basis for the assumption, except that it is a famous Śiva temple. The only evidence

I have been able to find out is the description of a Śiva temple in this neighbourhood, which has some close affinity with this same description. This is found in another Malayalam *Śandeśakāvya* called *Kokasandeśa*, of which only a part of the first canto is available (this part is published in the Quarterly Journal of the Pan-Kerala Literary Academy, Vol. XI, Part 1 ; 1942 ). The following is a free English rendering of the verse :

> God Śiva was defeated in his quarrel with Kāmadeva and he had to surrender half his body to the daughter of Himavān. As for the other half, it had to occupy the thirty-third position. (90)

The mention of Śiva occupying the thirty-third position suggests that all the thirty-three gods are installed in the temple. This position is in respect of the enumeration in the Upaniṣad where Prajāpati is the last. In the *Mayūrasandeśa*, the expression अचलतनयाचित्तचन्द्रोपलेन्द्रो : suggests the idea contained in the first half of the Malayalam verse and the सकलसुमनःसेवितम् corresponds to the second half here and to the description in the *Śukasandeśa*. It is certain that all the three describe the same temple. This is the Ulanāṭ temple in Parūr, not far from Peruvāram temple. This is the only evidence I have seen for the identification of this temple.

76. I am not sure of the identity of Śaṅkara. Perhaps he is the author of the *Jayamaṅgalā* on *Kāmandakīya* and *Arthaśāstra*. If this be so, the date of these commentaries is also fixed, as Śaṅkara is a contemporary of this poem ( early in the fifteenth century ).

77. This is in imitation of *Meghasandeśa* 1. 27

79. The identity of the country called Balyakṣoṇī is also very uncertain. *Balya* can mean "having great *bala*

(army)". रूपादाहतप्रशस्तयोः (५. २. १२०)। अन्येभ्योऽपि दृश्यते (वा) इति प्रशस्तबलवान् बल्यः इति लभ्यते।

In this case the word may be a Sanskrit translation of *Perumpaṭappu*. *Perum* means "great" and *Paṭa* means "army". The reference must be to the Perumpaṭappu country. Perumpaṭappu Royal Family is the present Cochin Royal Family. They ruled at Tiruvañcikkulam (see 90), the Capital of the ancient Cera kings. Their country extended to the east of the Parūr country, which has just been decribed in the previous verse.

The manuscript reads भूतिवाहिन्या(न्या)ख्या। This would mean that भूतिवाहिनी is the name of the capital city. But the Malayalam *Kokasandeśa* uses the expression वसुततिमहावाहिनीजुष्टपार्श्वम् with reference to the Idappalli kingdom, which is to the south of this country. There can be no doubt that the two expressions भूतिवाहिनी and वसुतति-महावाहिनी mean the same thing. This must be a river and since this river is mentioned in connection with both the countries, that must separate Idappalli from the Perumpaṭappu country.

In the commentary read दुष्प्रधर्षा in,both the places in line 6.

80. The term अस्मदीयत्वबुद्ध्या is a little puzzling. The hero is not a member of this royal family. Since the Perumpaṭappu kings were the overlords, the hero, who also belonged to a royal family, speaks of the Perumpaṭappu country as "ours" on account of this overlordship. The expression means "considering the country as belonging to our overlord".

83. Uddaṇḍa is the famous poet, the author of *Kokilasandeśa* and the drama *Mallikāmāruta*. Tuṇḍīra

country is the area around Canjeevaram extending to Tirupati in the north. In the last *pāda* read वागधाटी. In the commentary also read वागधाटी in line 5.

84. This Kāli temple is the Putiyakāvu temple. *putiya* means "new" (अभिनव). It is close to the Vallārappalli palace, the earlier residence of the Cochin Royal Family.

86. Cūrṇī is the name of the northern arm of the Alwaye river after it branches off into two and after it is joined by the Chalakuḍi river further down. The word मार्जाली is not found in lexicons in this particular meaning. The word found is मार्जालीय. But I am sure that this is the meaning. The author had the following verse from *Raghuvaṁśa* in his mind.

यस्यावरोधस्तनचन्दनानां
प्रक्षालनाद्वारिविहारकाले ।
कलिन्दकन्या मथुरां गतापि
गङ्गोर्मिसंसक्तजलेव भाति ॥ ६–४८

*Śukasandeśa* also speaks of the water sports of the ladies of Tiruvañcikkulam (Mahodayapurī) in this river, in the passage : चूर्णी माहोदयपुरवधूरोजचूर्णाङ्कितोर्मिः (१.६५).

